प्रकाशन प्रत्येक माह की 1 तारीख

ISSN 2249-698X

# भारती

## संस्कृत-मासपत्रिका

एकस्याः प्रतेः २५/-
वार्षिक-शुल्कम् २५०/-
पञ्चवार्षिकशुल्कम् ११००/-
पञ्चदशवार्षिकशुल्कम् ३१००/-

वर्षम् 76, अङ्कः -01, कार्त्तिकमासः, विक्रमाब्दः 2082, युगाब्दः 5127, नवम्बर, 2025



# विषय-सूची


| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | सम्पादकीयम् | प्रोफेसर श्रीकृष्णशर्मा | ४ |
| २ | मङ्गलाचरणम् | आशुकविः श्रीहरिः शास्त्री | ९ |
| ३ | 'भारत्यै' शुभाशंसा | श्री एम्. अनन्तशयनम् अय्यङ्गारः | १० |
| ४ | सम्पादकीयम् | स्वामी सुरजनदासः | ११ |
| ५ | चित्तौडदुर्गस्य विजयस्तम्भः | स्वामी सुरजनदासः | १४ |
| ६ | संस्कृतभाषाविषये संस्कृतज्ञानां कर्तव्यम् | भट्ट-मथुरानाथशास्त्री | १५ |
| ७ | वेदस्य सर्वविद्यानिधानत्वम् | वेदवीथिपथिकः पण्डित-मोतीलालशास्त्री | २३ |
| ८ | पृथुवंशम् | कविसार्वभौम अभिराजराजेन्द्रमिश्रः | ३० |
| ९ | अलङ्कारमण्डने काव्यप्रयोजनम् | डॉ. सत्यव्रतवर्मा | ३४ |
| १० | राजस्थानस्य संस्कृतज्ञाः क्रान्तिकारिणः | डॉ. नाथूलालसुमनः | ३७ |
| ११ | सीमन्तसिन्दूरम् | डॉ. महेशचन्द्रशर्मा गौतमः | ४६ |
| १२ | श्रीहनुमद्विभीषणकृटनिर्बन्धविमर्शः | प्रो. सुरेन्द्रकुमारशर्मा | ४९ |
| १३ | सा 'भारती' पत्रिका | पं. ताराशङ्करपाण्डेयः | ४३ |
| १४ | संस्कृत-समाचारः | सम्पादकः | ५४ |
| १५ | राष्ट्रस्य सर्वाङ्गीणविकासस्य आधारः ..... | डॉ. नन्दसिंहनरूकाः | ५५ |
| १६ | दीपावलिः | डॉ. प्रीति आर. पुजारा | ५८ |
| १७ | सुधर्मः श्रेयसे पुंसाम् | डॉ. महेशचन्द्गुर्जरः | ५९ |
| १८ | 'भारती'त्यस्याः संस्कृतमासिकपत्रिकायाः ... | डॉ. तारेशकुमारः शर्मा | ६० |
| १९ | अभिमानोऽहङ्कारः | डॉ. अञ्जना शर्मा | ६२ |
| २० | संस्कृतभाषायां विश्वभाषायाः साक्षात्कारः | पं.श्री.दा. सातवलेकरः | ६४ |
| २१ | कविः कालिदासः | श्रीचारुदेवशास्त्री | ६९ |
| २२ | तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थिती | पण्डित-कालिकाप्रसादशुक्लः | ७४ |
| २३ | अद्यतनीयं निर्वीर्या विद्या | श्रीकृष्णदत्तभट्टः | ७९ |
| २४ | नारी-स्तम्भः | डॉ. राजेश्वरी भट्टः | ८२ |
| २५ | आयुर्वेद-स्तम्भः | प्रो. बनवारीलालगौडः | ८४ |


लेखकेभ्यो निवेदनम् - कृपया स्वलेखान् 'चाणक्य Font' द्वारा टंकयित्वा अशुद्धिसंशोधनं च कृत्वा 'PDF' एवं 'Word' द्वारा प्रेषयन्तु।
ग्राहकेभ्यो निवेदनम् - किसी मास का अंक दिनाङ्क 10 तक प्राप्त न हुआ हो तो कृपया Whatsapp द्वारा चलदूरभाष सं. 93520 30291, 8005813613 (व्यवस्थापक) पर अपने नाम, पते सहित सूचना करें।

**पाठकेभ्यो निवेदनम्**

संस्कृतसुधियः पाठकाः निवेदनं यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाटकमित्यादयो भवद्भ्यः कथं रोचन्ते ? स्वविचारपूर्णपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु- सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी-15, न्यू कॉलोनी, जयपुर-302001

दूरभाष: 0141-2379014, मो. 9799011085

(धनादेश/चेक/ड्राफ्ट केवल ''भारतीय संस्कृत प्रचार संस्थान'' के नाम से ही भेजें- प्रबन्ध सम्पादक)

ISSN2249-698X

॥ श्रीश: ॥

# भारती

## संस्कृत-मासपत्रिका

संस्थापकौ
स्व. उमाकान्तकेशव आप्टे ( बाबा साहब आप्टे )
स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षका:
श्रीश्यामशरणदेवाचार्य:
( निम्बार्कपीठम्, सलेमाबाद: )
स्वामी रामभद्राचार्य:
( चित्रकूट: )
स्वामी अवधेशानन्दगिरि:
( हरिद्वारम् )
महन्त: गोविन्ददेवगिरि:
( पुणे )
श्रीमज्जगद्गुरुद्वाराचार्याग्रपीठाधीश्वरो
मलूकपीठाधीश्वरश्च
स्वामी श्रीराजेन्द्रदासमहाराज:
( अग्रपीठम्, रेवासा )
महन्त: प्रतापपुरी
( तारातरामठम्, बाडमेरम् )
श्रीदामोदरदासमोदी ( जयपुरम् )

सम्पादकमण्डलम्

सम्पादक:
प्रोफेसर श्रीकृष्णशर्मा

प्रबन्धसम्पादक:
सुदामा शर्मा

सहसम्पादकौ
प्रोफेसर सुरेन्द्रकुमारशर्मा
शिवशरणनाथत्रिपाठी

सहायकसम्पादक:
डॉ. स्नेहलता शर्मा

भारतीयसंस्कृतप्रचारसंस्थानम्

अध्यक्ष:
प्रोफेसर बनवारीलालगौड:

उपाध्यक्षौ
डॉ. नाथूलालसुमन:
डॉ. नन्दसिंहनरूका:

सचिव:
डॉ. सुधीरकुमारशर्मा

सहसचिव:
कृष्णाकुमारशर्मा

व्यवस्थापक:
राजीवदाधीच:
9352030291

केन्द्रीय संस्कृत विश्वविद्यालय ( शिक्षा मंत्रालय, भारत सरकार के अधीन ) के द्वारा संस्कृत पुस्तकों के प्रकाशनार्थ वित्तीय सहायता की योजना के तहत प्रदत्त वित्तीय सहायता से प्रकाशित।

कार्यालय:
बी-15, भारतीभवनम्
न्यू कॉलोनी, जयपुरम् ( राज. )
ई-मेल sanskritbharti09@gmail.com
वेबसाईट : www.bhartipatrika.org

वर्षम् 76 अङ्क: -01
कार्त्तिकमास:
विक्रमाब्द: 2082
युगाब्द: 5127
नवम्बर, 2025

एकस्या: प्रते: 25/-
वार्षिकशुल्कम् 250/-
पञ्चवार्षिकशुल्कम् 1100/-
आजीवनसदस्यताशुल्कम् 3100/- ( 15 वर्षाणि )

सम्पादकीयम्

# 'भारती' पत्रिकाया विकासयात्रा

...✍ प्रोफेसर श्रीकृष्णशर्मा

'भारती' संस्कृत-पत्रिकाया **कौस्तुभजयन्ती**-वर्षे समेषामभिनन्दनम्।

'भारती' संस्कृत-मास-पत्रिका 1950 ईशवीतोऽनवरतं प्रकाशमाना ऐषमो 'दीपावलि' पर्वणि **षट्सप्तति-( 76 )** तमे वर्षे साफल्येन सम्प्रविशती मन्ये राष्ट्रे कीर्त्तिमानमधिगतवतीति मोमुदीति चेतः। **'भारती'** मासिक-संस्कृत-पत्रिका सम्पूर्णेऽपि भारतवर्षे **प्राचीनतमा** पत्रकारता-क्षेत्रे महनीयं योगदानं प्रदत्तवती। एतदाकलय्य 11.08.2022 तमे दिनाङ्के नवदिल्लीस्थेन केन्द्रीयसंस्कृत-विश्वविद्यालयेन संस्कृतसप्ताहान्तर्गतकार्यक्रमेषु पत्रिकेयम् **एकलक्ष**-रूप्यकराशिप्रदानपुरस्सरं **प्रशस्तिपत्रेण** आचार्य (डॉ.) श्रीनिवासबरखेडी (कुलपतिः), डॉ. सुभाष सरकार (केन्द्रसर्वकारस्य शिक्षाराज्यमन्त्री) महोदयानां करकमलैः सभाजिता।

पञ्चसप्ततिवर्षतोऽनवरतरूपेण प्रकाशमानेयं 'भारती' संस्कृतपत्रिका-जगति राराज्यते। प्रकृतोऽयमस्याः कौस्तुभजयन्तीवर्षः। अतश्चायमङ्कः **कौस्तुभजयन्तीविशेषाङ्कः**। नियमितरचनानां प्रकाशनेन सहैव प्रथमं समारब्धस्य प्रथमं सम्पादकीयं, प्रथमं मङ्गलाचरणम्, पत्रिकाप्रकाशनप्रवर्त्तकस्य श्री उमाकान्त केशव (बाबा साहब) **आप्टे**महोदयस्य श्री **विनोबाभावे**महोदयस्य च व्याख्याने, मध्ये मध्येऽङ्कान्तरेषूपनिबद्धाश्रिता आदर्शभूता विशिष्टा लेखा अस्मिन्नङ्के समावेशिताः। आशासे पाठकेभ्यो रुचिकरा ज्ञानवर्धकाश्च भवेयुरिति। 'भारती' पत्रिकाया प्रारम्भिक-प्रथमाङ्कस्य मुखपृष्ठे **'चितौड-दुर्गस्तम्भः'** **(Victory Tower)** प्रदत्तोऽस्मिन्नङ्केऽपि चिरस्मृतिं पुनर्नवीकर्तुं गृहीतः। १५७ सोपानयुतोऽयं राजस्थानस्य प्रथमो विजयस्तम्भो वीरवर-**महाराणाकुम्भा**द्वारा खिलजी-महमूदशाहं पराजित्य १४४०-४८ खीष्टाब्देषु स्वविजयोपलक्ष्ये निर्माप्य स्वेष्टदेवाय श्रीविष्णवे समर्पित आसीत्। स्तम्भस्यास्य प्रमुखः शिल्पी 'जेता'ऽभिधो मन्यते।

संक्षेपेणास्या पत्रिकाया विकासयात्राया वृत्तं प्रस्तूयते - 'भारती' संस्कृतमासपत्रिका **बाबासाहब-आप्टे**-महोदयानां सत्प्रेरणया 1950 तमे ख्रिस्ताब्दे **'दीपावलि'** पर्व-दिनात् समारब्धाऽऽसीत्। आप्टे-महोदयाः श्रीसन्तं गिरिराजशास्त्रिणं **प्रथमप्रबन्धसम्पादकपदे** न्ययुञ्जत। जयपुरतः 'संस्कृतरत्नाकरः' इति नाम्ना संस्कृत मासपत्रिकायाः 1904 ख्रिस्ताब्दतः प्रकाशनमारब्धमासीत्, 1949 ईशवीयाब्दे सा जयपुरतः काशीं प्रति स्थानान्तरिता जाता। सौभाग्यात् किञ्चित्कालानन्तरं तदानीं राष्ट्रीयस्वयंसेवक-सङ्घस्य केन्द्रीयकार्यसमितेः प्रचारप्रमुखाः **श्रीउमाकान्त-केशव-आप्टे** (बाबा साहब-आप्टे) महोदयाः जयपुरमागच्छन्। यदा तेऽज्ञासिषुर्यदितः कापि संस्कृतपत्रिका न प्रकाश्यते, तदा तेऽवदन् यदितः 'संस्कृतमासपत्रिकाऽवश्यं प्रकाश्येत' इति ममाभिलाषः। एतदर्थं जयपुरस्थ-महाराज-संस्कृत-महाविद्यालयीय-**म.म.गिरिधरशर्माचतुर्वेद-भट्ट- मथुरानाथशास्त्रिप्रमुखानां** विदुषाम् उपवेशनमायोजितम्, यत्र प्रान्तप्रचारकं **श्रीलेखराजशर्माणं**

संस्कृतमास-पत्रिकाप्रकाशनाय 'आप्टे' महोदयाः समादिष्टवन्तः। तत्रैवोपविष्टाः श्रीमन्तो **गिरिराजशास्त्रिणः** (दादाभाई) परस्पर-विचारविमर्शानन्तरं 'संस्कृपत्रिका'प्रकाशनाय दृढप्रतिज्ञा अभूवन्।

**श्रीगिरिराजशास्त्री 'दादाभाई' ( 1921-2012 ई. )** - 'आप्टे' महोदया गिरिराजशास्त्रिवर्याणां कर्मठतामाकलय्य तान् संस्कृतमासपत्रिकायाः '**प्रबन्धसम्पादक**' इति पदे न्ययुञ्जत। श्रीगिरिराज-शास्त्रिणः संस्कृतमासपत्रिकाया नामकरणार्थं महाराजसंस्कृतमहाविद्यालयस्य तदानीन्तनैः प्राचार्यवर्यैः मीमांसा-केसरिभिः पण्डित-**पट्टाभिरामशास्त्रिभिः** सह परामर्शं विधाय 'सञ्जीवनी' 'भारती' वेति नामद्वयं पञ्जीकरणाय केन्द्रसर्वकाराय प्रार्थनापत्रं प्रेषितवन्तः। पञ्जीकरणकार्यालयतो '**भारती**' इति पत्रिकाभिधानम् अनुमोदितम्। इत्थं पञ्चाशदधिकैकोनविंशतिशततमे (1950) ख्रिष्टाब्दे 'भारती' ति नाम्ना संस्कृतमास-पत्रिका पञ्जीकृता। ततः 1950 तमस्येशवीयवर्षस्य **दीपावलिदिवसाद्** 'भारती' नाम्ना संस्कृतमासपत्रिका समारब्धा। श्रीगिरिराजशास्त्रिणां सम्पादकत्वे प्रगतिपथ-मारूढा निर्बाधं प्रचलन्ती सम्प्रति श्री-सुदामाशर्मणां प्रबन्धसम्पादकत्वे पञ्च-सप्ततितम (75) वर्षाणां यात्रां कृतवती।

**श्री-सुदामा शर्मा -**

'दादाभाई' श्रीगिरिराजशास्त्रिणां विश्रमानन्तरं 2010 ईशवीयाब्दतो राष्ट्रीयस्वयंसेवक-संघस्य वरिष्ठः प्रचारकः श्री-सुदामा शर्मा महोदयः प्रचारककार्येण सह 'भारती' ति संस्कृतमासपत्रिकाया प्रकाशनाय कटिबद्धः सर्वात्मना प्रयतते। इदानीमस्य महोदयस्याथकप्रयासैरथ च विदुषः प्रति निष्ठापूर्णव्यवहारेण पत्रिकैषा निर्बाधगत्या प्रकाशतां याति। पत्रिकाप्रकाशनाय अर्थप्रबन्धस्य महती चिन्ता भवति-एतदर्थमेते महानुभावा अहर्निशं परस्परं परामृशन्ति प्रबन्धं च विदधति। सर्वेषामेते शीलभूषणाः समादरभाजः।

इदानीं यावद् अस्या 'भारती' संस्कृतमास-पत्रिकाया विकासयात्रायां सम्पादकानां महद् योगदानमित्थं वर्तते -

**1. स्वामि-सुरजनदासः ( 1910-1990 ई. )-**

'भारती' पत्रिकाया प्रथमसम्पादकोऽयं विद्वान् व्याकरण-साहित्य-सांख्ययोग-वेदान्तशास्त्रेषु लब्धाचार्यपदवीकः, संस्कृते 'एम.ए.' इति परीक्षायामपि लब्धस्वर्णपदकः, स्वामि-**मंगलदासानाम**न्तेवासी, महाराजा कॉलेजे प्राध्यापकचरः जोधपुरविश्व-विद्यालयस्य प्रथम-संस्कृत-विभागाध्यक्ष-चरश्च 1950 तः 1952 ईशवीयाब्दं यावद् वैदुष्योपेतं सम्पादनकर्म समाचरितवान्।

**2. पण्डित-वृद्धिचन्द्रशास्त्री ( 1904-1964 ई. )**

महामहोपाध्याय-गिरिधरशर्मचतुर्वेदानां शिष्यः, '**आदर्श-दम्पती**'लघुपन्यासस्य लेखकः, महाराज-संस्कृत-कॉलेजे धर्मशास्त्रविभागस्याचार्योऽध्यक्षचरः, 'संस्कृतरत्नाकर' इति प्रतिष्ठितसंस्कृतपत्रिकायाः सहसम्पादकचरो व्याकरण-धर्मशास्त्रयोर्लब्धप्रतिष्ठो मनीषिप्रवरो धर्मधुरीणः पण्डितवृद्धिचन्द्रशास्त्रिमहोदयः 1952 तः 1954 ई. पर्यन्तं 'भारती' पत्रिकां समपादयत्।

**3. भट्ट-मथुरानाथशास्त्री ( 1889-1964 ईशवीयाब्दः ):**

'रसगङ्गाधर' नाम्नः काव्यशास्त्रीयग्रन्थस्य '**सरला**'

टीकाकारः, **जयपुर-साहित्य-गोविन्दवैभवानां** प्रणेता, जयपुरस्थमहाराजसंस्कृतकॉलेजे साहित्यविभागाध्यक्षचरः, 'संस्कृतरत्नाकरपत्रिकायाः' (1904-1949 ई.) कुशलः सम्पादकचरः 'भारती' मास-संस्कृत-पत्रिकायाः सम्पादकत्वं 1954 ई. वर्षत उररीकृत्य 1964 ई. वर्षं यावत् (निधनं यावत्) सम्पादनकार्यं निर्व्यूढवानयं कविशिरोमणिः भट्टमथुरानाथशास्त्रिमहोदयः।

**4. आशुकविः पण्डितहरिशास्त्री ( 1893-1970 )**

जयदेवमिश्रविरचित-'गीतगोविन्द' रचनामनुहरतः '**रामचन्द्रस्तवः**' इति काव्यस्य प्रणेता, साहित्यशास्त्रपारावारपारीणः, साधनाप्रवीणो महाराज-संस्कृत-कॉलेजस्य साहित्यशास्त्रप्राध्यापको **महोपाध्याय** आशुकविवरेण्यः , 'भारती' पत्रिकाया प्रथमो मङ्गलाचरणपद्यानां कविः पण्डितहरिशास्त्रिमहोदयः 'भारती' पत्रिकामिमां 1964 तः 1969 ई. यावत् (पञ्च वर्षाणि) सम्पादितवान्।

**5. पण्डित-दीनानाथत्रिवेदी 'मधुपः' ( 1914 - 1982 )-**

महाराज-संस्कृत-महाविद्यालये न्यायशास्त्र-प्राध्यापकचरः, **सागरगर्वोक्ति**-दरिद्रतैकादश्यादि-हास्य-व्यङ्ग्योद्दीपकरचनाकारः, भारत्यां '**नारी-स्तम्भ**' लेखनसमारम्भकः, पण्डितप्रवरः श्रीदीनानाथ-त्रिवेदी 'मधुपः' 1969 तः 1980 ईशवीयाब्दं यावत् 'भारतीपत्रिकाम्' समपादयत्।

**6. पण्डित-जगदीशशर्मा ( 1910 - 1997 ) -**

वीरेश्वरशास्त्रिद्राविडानां व्याकरण-न्याय-मीमांसा-धर्मशास्त्रेषु सच्छिष्योऽथ बिहारिलालशास्त्रिणां सविधे साहित्यशास्त्रेऽधिगतप्रावीण्यो जयपुरस्थ-महाराज-संस्कृतकॉलेजे साहित्यविभागस्याचार्योऽध्यक्षचरो **राष्ट्रपति-सम्मानितः** साहित्यशास्त्रस्य प्रौढो विद्वान् पण्डितजगदीशशर्मा 'भारती' पत्रिकायाः सम्पादनकार्यं अक्तूबर, 1980 ई. तः दिसम्बर, 1996 ई. यावत् निरवहत्।

**7. पण्डित-रामगोपालशास्त्री ( 1921 - 1992 ) -**

साहित्य-धर्मशास्त्राचार्यः, राजस्थानसंस्कृतशिक्षा-विभागे धर्मशास्त्रे प्राध्यापकः, राजस्थानसंस्कृतशिक्षा-निदेशालये उपनिरीक्षकपदे कार्यं निर्वहन्नसौ निम्बार्क-सम्प्रदाये दीक्षितः पण्डितरामगोपालशास्त्रिमहोदयः 'भारती' पत्रिकायै पण्डितजगदीशशर्मणा प्रधान-सम्पाकत्वे सह-सम्पादकरूपेण नैकवर्षाणि सम्पादन-कार्यं निर्व्यूढवान्।

**8. देवर्षि-कलानाथशास्त्री ( १९३६-२०२५ ) -**

ब्रजभाषायाः कवित्त-सवैयाप्रभृतिवृत्तेषु संस्कृत-कवनेन नूतनसरणिप्रवर्त्तकस्य मञ्जुकवितानिकुञ्जकाव्य-मालाया प्रकाशकस्य कविशिरोमणेर्भट्टमथुरानाथ-शास्त्रिणस्तनूजो **विद्वज्जनचरितामृता**द्यनेकग्रन्थानां सर्जको भाषाविभागसंस्कृतशिक्षाविभागयोर्निदेशक-चरः, राजस्थानसंस्कृताकादम्या अध्यक्षचरो **राष्ट्रपति-सम्मानितो** देवर्षिकलानाथशास्त्री 1954 तः 1962 पर्यन्तं स्वपित्रा सह भारत्याः सहसम्पादनकार्यम् 1997 ईशवीयाब्दतः फरवरी 2025 (निधनं) यावत् प्रधानसम्पादकरूपेण सम्पादनकार्यं निर्व्यूढवान्।

**9. पण्डित-प्यारेमोहनशर्मा -**

राजस्थान-संस्कृत-शिक्षाविभागीयाचार्यसंस्कृत-महाविद्यालयेषु साहित्यशास्त्रे आचार्यप्राचार्यचरः,

साहित्य-शास्त्रे नदीष्णानामाचार्य-**जगदीशशर्मणां** सच्छिष्यो राजस्थानसंस्कृताकादम्या **निदेशकचरः** पण्डित- प्यारेमोहनशर्मा 1997 ख्रिष्टाब्दतः 2019 ईशवीयाब्दं यावद् 'भारती' पत्रिकायाः सम्पादनकार्यं कृतवान्। चतुर्णवति-वर्षदेशीयोऽयं विद्वान् सम्प्रति भगवदाराधनैकव्रतो जयपत्तने चकास्ति।

**10. आचार्यः ( डॉ. ) श्रीकृष्णशर्मा -**

जोधपुरस्थ-जयनारायणव्यासविश्वविद्यालयीय-संस्कृतविभागस्याचार्योऽध्यक्षचरः, पण्डित-मधुसूदन-ओझा-शोधप्रकोष्ठ-परामर्शदातृमण्डलस्याध्यक्षचरश्च, वाराणसीस्थकाशी-हिन्दू-विश्वविद्यालयीय-व्याकरणविभागे प्रगताचार्यचरः (Visiting Professor), जयपुरस्थ-जगद्गुरु-रामानन्दाचार्य-राजस्थान-संस्कृतविश्वविद्यालये म.म. गिरिधरशर्माचतुर्वेदी-व्याकरणपीठाध्यक्षचरः, **मैथिलपण्डितखड्गनाथ-मिश्राणामन्तेवासी,** 'वृत्तिमीमांसा'कारोऽधीत-व्याकरण-न्याय-साहित्यशास्त्रः **'स्वरमङ्गला'** (PEER REVIEWD RESEARCH JOURNAL) त्रैमासिक-संस्कृत-शोध-पत्रिकाया अपि सम्पादकः प्रोफेसर-श्रीकृष्णशर्मा सम्प्रति (नवम्बर, 2019 ई. तः) 'भारती' संस्कृतमास-पत्रिकायाः सम्पादनं विदधाति।

अस्याः 'भारती' पत्रिकायाः **सह/सहायक-सम्पादनकार्यं** कृतवन्तः कुर्वाणाश्च विद्वांसः सन्ति-

**पण्डितश्रीरामदवेः** (1922-2013 ई.)

**'भृत्याभरणम्'** इत्याद्यनेककाव्यग्रन्थानां प्रणेता, शाखाप्रबन्धकरूपेण बैंकसेवातोऽपि संस्कृतस्य श्रेष्ठकविः, विश्वसंस्कृत-प्रतिष्ठानस्य प्रदेशसंघटनमन्त्री, राष्ट्रीयस्वयंसेवकसंघस्य समर्पितसदस्यः, जोधपुर-वास्तव्यः पण्डितश्रीरामदवेमहोदयो भारत्याः द्विसहस्र-खिस्ताब्दतो नवम्बर, 2012 यावत् सहसम्पादक आसीद्।

**आचार्यः ( डॉ. ) हिन्दकेसरी ( 1947-2009 )-**

विद्वत्सु लब्धप्रतिष्ठो निविष्टवैयाकरणो राष्ट्रिय-संस्कृतसंस्थान-जयपुरपरिसरस्य **प्राचार्यचरो** विनम्रताया प्रतिमूर्तिः डॉ. हिन्दकेसरी-महोदयः 'भारती' पत्रिकायाः सह-सम्पादकरूपेण द्विसहस्रखिस्ताब्दतो जून, 2009 खिस्ताब्दं यावत् मनोयोगपूर्वकं समर्पितभावनया सम्पादनकर्म व्यधात्।

**पण्डितपद्मशास्त्री ( सन् 1935-2015 )**

'लेनिनामृतम्' 'पद्यपञ्चतन्त्रम्' 'वेदविज्ञानामृतम्' इत्याद्यनेककृतीनां सर्जको **राष्ट्रपतिसम्मानितः** श्रीपद्मादत्तशास्त्रिमहोदयः द्विसहस्रखिस्ताब्दतो नवम्बर, 2012 पर्यन्तं सुदीर्घकालं यावदस्यै 'भारती' पत्रिकायै सह-सम्पादकरूपेण सेवां प्रदत्तवान्।

**डॉ. शिवचरणशर्मा -**

राजस्थानसंस्कृतशिक्षाविभागीय-राजकीय-वरिष्ठ उपाध्यायविद्यालये सम्प्रति प्रधानाचार्यः, संस्कृत-सम्भाषणे कुशलप्रशिक्षकः, बङ्गकविवरेण्य-बंकिमचन्द्रचटर्जी-विरचित-**'आनन्दमठ'** इत्युपन्या-सस्य संस्कृतेऽनुवादको डॉ. शिवचरणशर्मा ख्रीष्टाब्द-2012 तः जून, 2016 पर्यन्तं 'भारती' पत्रिकायाः 'सह-सम्पादक' रूपेण कार्यं सम्पादितवान्।

**आचार्यः सुरेन्द्रकुमारशर्मा**

राजस्थानसंस्कृतशिक्षा**निदेशकचरः**, राजकीय महाराज-संस्कृत-कॉलेजस्य प्राचार्यचरः, साहित्य-

शास्त्रस्य प्रौढो विद्वान् प्रोफेसर-सुरेन्द्रकुमारशर्मा 2012 ईशवीयाब्दतो 'भारती' पत्रिकायाः 'सह-सम्पादक' रूपेण सपरिश्रमं कार्यं कुर्वन्नधुना जयपत्तने चकास्ति।

**पण्डित-शिवशरणनाथत्रिपाठी -**

साहित्य-व्याकरणशास्त्राचार्यः, अखिलभारतीय-संस्कृतसम्भाषणप्रतियोगितायां लब्धस्वर्णपदकः, समस्यापूर्तौ कुशलः, राजस्थानसंस्कृतशिक्षाविभागे **साहित्यशास्त्रव्याख्यातृचरः** श्रीशिव-शरणनाथत्रिपाठी 'भारती' पत्रिकायाः 2006 ई. तः 'सह-सम्पादक' कर्मणि संलग्नोऽस्ति।

**डॉ. स्नेहलता शर्मा -**

राजस्थानसंस्कृतविश्वविद्यालये सम्प्रति साहित्य-शास्त्रस्य सुयोग्या विनम्रा च विदुषी सहायकाचार्य-पदमलङ्कुर्वती 'भारती' पत्रिकायाः 'सहायक-सम्पादक'रूपेण नवम्बर, 2019 ख्रिष्टाब्दतः सम्पादनकर्मणि साहाय्यं विदधाति।

**राजीवदाधीचः -**

'भारती' कार्यालये व्यवस्थापकपदे नियुक्तोऽत्यन्तं विनम्रः सन् 'भारती' पत्रिकाप्रकाशने विगतेभ्य द्वात्रिंश (32) वर्षेभ्यः साहाय्यं विदधाति। एवमेव '**अविनाश आचार्यः**' अपि पत्रिकाप्रकाशनकर्मणि कार्यालये मनोयोगपूर्वं साहाय्यमाचरति।

पत्रिकायां द्वौ स्थायिस्तम्भौ वर्षेभ्यः प्रचलतः- 1. नारीस्तम्भः 2. आयुर्वेदस्तम्भः।

**1. नारीस्तम्भः**- अस्य लेखिका साधना-पुरस्काराद्यनेकपुरस्कारैस्सभाजिता, सोमनाथसंस्कृत-विश्वविद्यालय (गुजरात) द्वारा प्रदत्त-मानद **'डी.लिट्'** इत्युपाधिनाऽलंकृता, लालबहादुरशास्त्रिकालेजे संस्कृतविभागाध्यक्षचरा परम-वैयाकरण-डॉ. गङ्गाधरभट्टस्मृती **'राजगंगा ट्रस्ट'** इत्यस्य न्यासी डॉ. राजेश्वरीभट्ट-महोदया 1976 ईशवीयाब्दतः (49 वर्षेभ्यो) निरन्तरं 'भारती' पत्रिकायां सरलसंस्कृते नारीमहत्त्वप्रदर्शकं प्रेरणास्पदं हिन्दी-अनुवादसहितं सामयिकं यथाकालं लेखं लिखति।

**2. आयुर्वेदस्तम्भः** - जयपुरस्थ-राष्ट्रियायुर्वेद-संस्थानस्य निदेशकचरः, जोधपुरस्थ-राजस्थान आयुर्वेद-विश्वविद्यालयस्य कुलपतिचरः, **राष्ट्रपति-सम्मानितो** डॉ. बनवारीलालगौडमहोदयः प्राञ्जल-संस्कृतभाषायां हिन्द्यनुवादसहितां प्रतिमासमायुर्वेद-सम्मतां दिनचर्यां ऋतुचर्याञ्च 1986 ईशवीयाब्दतः (39 वर्षेभ्यः) निरन्तरम् आयुर्वेदस्तम्भरूपेण 'भारती' पत्रिकायां लिखति। सितम्बर, 2023 तः भारतीय-संस्कृतप्रचारसंस्थानस्याध्यक्षपदमप्यलङ्करोति।

**- सम्पादकः**

जोधपुरस्थ-जयनारायणव्यासविश्वविद्यालये
संस्कृतविभागाध्यक्षचरः,
जयपुरस्थ-जगद्गुरु-रामानन्दाचार्य-
राजस्थान- संस्कृत-विश्वविद्यालये
व्याकरणपीठाध्यक्षचरश्च।
दूरभाषाङ्कः: 8386943655

## मङ्गलाचरणम् *

❑ आशुकविः श्रीहरिः शास्त्री

सत्साहित्यसुधाझरान् सुरुचिरान् भावान् भरन्ती नृषु
यच्छन्ती बहुशःश्रुतिस्मृतिभरान् दिव्योपदेशान् परान्।
नाना दार्शनिकानि चानवरतं दिव्यानि तत्त्वान्यलं-
कुर्वन्ती भविकाय भूमिवलये विभ्राजतां '**भारती**'।।१।।

दीव्यन्ती जयपत्तनोदयगिरेर्जाड्यं हरन्ती नृणां
वाग्मित्वं ददती कलं द्विजकुले रागं किरन्ती भुवि।
सिञ्चन्ती द्रुफलेष्वथो सुमनसां वृन्देषु दिव्यं रसं
सेयं भूवलये हरेरिव विभा विभ्राजतां '**भारती**'।।२।।

शास्त्रीयगूढसन्देशान् एषा साहित्यसूनृतान्
विकाशयन्ती बोभूयादस्मद्भव्याय '**भारती**'।।३।।

– प्रोफेसर, महाराज-संस्कृत-कॉलेजः, जयपुरम्।

---

* प्रथमं मङ्गलाचरणमिदं 'भारती'पत्रिकायां-पूर्वं (वर्षः-१, अंकः-१, वि.सं.२००७) प्रकाशितम्।


## ऐसे बन सकते हैं आप भारती पत्रिका के ग्राहक :-

भारती पत्रिका का वार्षिक शुल्क रुपये 250/–, पंचवर्षीय शुल्क 1100/–, आजीवन सदस्यता ( 15 वर्ष ) शुल्क 3100/– मात्र है। आप केनरा बैंक की किसी भी शाखा में जाकर हमारे निम्नलिखित खाते में राशि जमा करा कर जमा रसीद की फोटो प्रति ई-मेल से या डाक द्वारा भिजवा देवें।

खाते का नाम - **भारतीयसंस्कृतप्रचारसंस्थान**
खाता संख्या - 2139101912498
IFS Code - CNRB0002139


**भारतीयलोकसभायाः प्रवक्तुः संस्कृतभाषायाः प्रकामं स्नेहिनः श्रीमदनन्तशयनम् अय्यङ्गारमहोदयस्य**

# 'भारत्यै' शुभाशंसा

[सुरगिरः परमस्नेहिनां, संस्कृतविदुषां श्रीअय्यङ्गारमहोदयानामयं सन्देशो न केवलं 'भारती' परिवारायैव, अपि तु सर्वेषां संस्कृत-संस्कृति-सेविनां प्रबलं प्रोत्साहक इति समनूद्य प्रकाश्यते ।]

❑ सहसम्पादक, देवर्षिः कलानाथशास्त्री

**श्री एम्. अनन्तशयनम् अय्यङ्गारः**
उपप्रवक्ता, लोकसभा,
९ अशोकमार्गः, नवदेहली
१२ दिसंबर, १९५५



'भारती'- संस्कृतमासिकपत्रं, यस्य प्रकाशनं पञ्चवर्षेभ्यः पूर्वं समारब्धं, भारतवर्षे संस्कृतगिरः संस्कृतेश्च पुनर्जागर्त्तेः कृते महतीमावश्यकीं च सेवां कुर्वाणं वर्तते। यदि भारतवर्षम् अद्यत्वे विश्वस्मिन् विश्रुतम्, यदि अद्येदं जगति समादरदृष्ट्या कीर्त्यते, तस्य कारणमेतन्नास्ति यद्भारतस्य समीपे अणुबम्बं, उद्जनबम्बं वा वर्त्तन्ते, अथवा इदं खलु विश्वस्यापराणि राष्ट्राणि वित्तीयसहायतयाऽनुग्रहीतुं शक्नुते । भारतवर्षस्य, महत्त्वं विश्वस्मिन् केवलमस्य प्राचीनायाः संस्कृतसभ्यतायाः कारणादेव।

भारतवर्षस्य प्राचीना सभ्यता सेवायाः, बलिदानस्य चाधारेण निर्मिताऽभूत्। अद्यापि सामाजिकमूल्यानां महत्त्वस्य परिमाणदण्डः पुनः परिवर्त्तनं वाञ्छति। पूर्वं भारतीयसंस्कृतौ सर्वप्रथमं महत्त्वस्थानं त एव जना आसन् ये बलिदानं त्यागं वा कृतवन्तः। द्वितीयं स्थानं तेभ्यो दीयते स्म, ये खलु राष्ट्रस्य सुरक्षायै सर्वदैव स्वार्थानां त्यागपुरस्सरं प्राणपणेन सन्नद्धा अभूवन्। केवलं तृतीयं स्थानं तेषां कृते दीयते स्म, ये धनिनः, उत्पादका, व्यवसायिनो वाऽऽसन्।

अन्याः संस्कृतयः विभिन्नेष्वादर्शेषु आधारिताः सन्ति। अद्य पुनरपि 'सेवा' एव जगति सामाजिक-महत्त्वस्य मानवीयमूल्याङ्कनस्य च परिमाणदण्डः सम्पद्येत इत्येतदावश्यकमस्ति।

अन्यैः राष्ट्रैः वैज्ञानिकप्रगतिद्वारा प्रकृतेः बाह्य-स्वरूपं विजितं, किन्तु भारतेन सर्वदैवान्तरिकस्या-त्मनो विजयाय प्रयत्ना विहिताः। स्पर्द्धा हि पशुताया नियमरूपा। युगेऽस्मिन् तस्याः स्थानं मानवसमाजे पारस्परिकसहकारिता गृह्णीयात् अनेकतायाश्च स्थानमेकता गृह्णीयात् इत्यावश्यकम्।

'भारती' सदृशान्यन्यान्यपि पत्राणि प्राचीन-सभ्यताया आदर्शानां पुनरुज्जीवनायावश्यकानि। इदं पत्रं, अन्यान्यपि चैवंविधानि पत्राणि, भारतीयायाः संस्कृतेः संस्कृतभाषायाश्च प्रसाराय समीचीनानि प्रयतनानि विधास्यन्ति।

अहमेतस्याः पत्रिकायाः उज्ज्वलं भविष्यत् कामये।

**- एम्. अनन्तशयनम् अय्यङ्गारः**

[विशिष्टोऽयं लेखो 'भारती' पत्रिकायां पूर्वं (वर्ष-६, अङ्कः-६, चैत्रमासः, वि.सं.२०१२) प्रकाशितोऽधुनाऽऽदर्शरूपेण कौस्तुभ-जयन्त्यवसरे पुनः प्रकाश्यते।] - सम्पादकः

# सम्पादकीयम्

❑ स्वामी सुरजनदासः
प्रथमसम्पादकः

बहोः कालात् आसीत् अस्माकं मनोरथः जयपुरनगरात् एकं संस्कृतपत्रं प्रकाशयितुम्। अतीतेषु द्वित्रेषु मासेषु कतिपयानां गुरुजनानां मित्राणां च प्रेरणया सहयोगेन च प्रोत्साहिता वयं सञ्जाताः समर्थास्तं मनोरथं कार्यरूपे परिणमयितुम्। यद्यपि आसीदस्माकं विचारः विजयदशमीत एव प्रकाशयितुमिदं पत्रम्, तथापि राजकीयानुमतेः कतिपयानामन्येषां साधनानां च अभावेन न शक्ता वयं तदवसरे तथा कर्तुम्। अतः साम्प्रतं दीपावली-महोत्सवावसरे वयमस्य पत्रस्य प्रथममङ्कमुप-हाररूपेण समर्पयामः संस्कृतसेविनां करकमलयोः।

**विश्वभाषाणां जननी संस्कृतम्** -

विश्वस्मिन् जगति यदि उपलभ्यते प्राचीनतमं किमपि वाङ्मयं तर्हि तदस्ति संस्कृतभाषानिबद्धं वैदिकं साहित्यं नाम। कालक्रमेण शनैः शनैः यदा इतरा जातय उन्नतिपथे प्रवृत्ताः, तदा वैदिकसाहित्या-देव ताभिः प्राप्ता प्रेरणा पथः प्रदर्शनं च। तत एव पथः प्रदर्शनं प्राप्य निर्धारितस्ताभिः स्वीयः अभ्युदयस्य पन्थाः। अत एव वयं विश्वस्य प्राचीनेषु धर्मग्रन्थेषु जगतो विविधासु भाषासु च न केवलं संस्कृत-भाषायाः शब्दानां साम्यमेव उपलभामहे अपितु पश्यामः बहूनि कथानकान्यपि तेनैव रूपेण।

**संस्कृतभाषाया इतिहासः** -

वर्षाणां सहस्रेभ्यः प्राक् वर्तमानात् वैदिककालात् आरभ्य अद्य यावत् अविच्छिन्नरूपेण प्रवर्तमाना दृश्यते संस्कृतसाहित्यस्य धारा। एतावति दीर्घे काले न जाने कियत्यः भाषाः उत्पन्नाः समृद्धा विनष्टाश्च कालमहिम्ना। परं सैषा अमरभाषा (संस्कृतं) बाध्यमानापि बहुभिर्बाधाभिः अमृता सती चरितार्थयामास स्वस्या अमरभाषात्वम्। अस्यां भाषायां वयं सामाजिकानां, सांस्कृतिकानां, राज-नैतिकानां, अर्थशास्त्रीयाणां, वैज्ञानिकानां, दार्शनिकानां च सर्वेषां विषयाणां शतशोऽनुभूतान् प्रयोगान् उपलभामहे, येषां सूक्ष्मेण अध्ययनेन शक्ता वयं इदानीमपि सांस्कृतिकं, राजनैतिकं सामाजिकं, च आदर्शं स्थापयितुं विश्वस्मिन् जगति।

परमस्माकं दौर्भाग्यात्, अज्ञानात्, कालदुर्वि-पाकाद्वा वयं वञ्चिताः सञ्जाता एतावत्कालं अस्मादपूर्वात् निधेः। 'मोहिनी' विद्यानिपुणानां वैदेशिकानां मोहजाले निपतिता वयं पथभ्रष्टाः सन्तः उपेक्षितवन्तः संस्कृतभाषां (अमरभाषां) मृतां मन्यमानाः सेवितवन्तश्चाध्ययनाध्यापनादिभिः वैदेशिकीः एव भाषाः।

**प्रान्तीयानां भाषाणां विवादशमनम्** -

वर्षसहस्रात्पूर्वं आसीत् संस्कृतभाषैवाऽस्माकं देशे सर्वजनीना व्यावहारिकी भाषा। ब्राह्मणादारभ्य नापितरजकपर्यन्तं सर्वे संस्कृतभाषामेव व्यवहारे प्रयुञ्जते स्म। क्रियतां दृष्टिपातः राज्ञो भोजस्य समय

एव, तदानीं खलु तन्तुवायादयः अपि न केवलं संस्कृतभाषाया ज्ञातारः, अपितु कवयः आसन्। एतत् भोजप्रबन्धस्य नीचैरुद्धृतेन सन्दर्भेण स्पष्टं ज्ञायते –

'ततः कुविन्दः राजानमासाद्य राजानं प्रणम्य प्राह– 'देव भवदमात्यो मां मूर्खं ज्ञात्वा गृहान्निःसारयति। त्वं तु पश्य, अहं मूर्खः पण्डितो वा इति।

**काव्यं करोमि न हि चारुतरं करोमि,**
**यत्नात्करोमि यदि चारुतरं करोमि।**
**भूपालमौलिमणिमण्डितपादपीठ!**
**हे साहसाङ्क! कवयामि वयामि यामि॥'** इति ॥

– किन्तु यदा वैदेशिकानामाक्रमणैः अखण्डं भारतं खण्डितं सत् विच्छिन्नमभवत्, प्रतिप्रान्तं विभिन्नं शासनं पदमाप, केन्द्रीयसत्ताया उच्छेदेन प्रान्तेषु परस्परं एकसूत्रता विनष्टा, तदा प्रान्तीया भाषाः संस्कृतभाषायाः स्थानमगृह्णन्। किन्तु प्रान्तीयाः सकला भाषाः संस्कृतभाषात एवं जन्म लेभिरे, अतस्तासु भाषास्वपि प्राचुर्येण (अधिकतया) संस्कृतभाषाया एव तत्समाः तद्भवाश्च शब्दाः स्थानमापुः, उपलभ्यन्ते चेदानीमपि। 'बङ्गला, गुजराती, मराठी, राजस्थानी, तेलगू' प्रभृतिभाषासु प्रतिशतं षष्टिशब्दाः संस्कृतभाषायाः सन्ति। एतादृश्यां परिस्थितौ यदि सर्वत्र भारते संस्कृतभाषायाः प्रचारः स्यात्, जायेत तदा स्वत एव प्रान्तीयानां भाषाणामहमहमिका– समस्यायाः समाधानम्, दूरीभवेत् च अस्माकं देशनेतृणां महती शिरोवेदना।

**भ्रान्ता धारणा** –

बहूनां भारतीयानां वर्तते एषा धारणा यत् संस्कृतभाषा अतीव क्लिष्टा दुर्बोधा च, वर्तते च अस्या भाषाया व्याकरणमपि अतीव कठिनं यस्याध्ययने एव भवन्ति द्वादश वर्षाणि व्यतीतानि। अस्या धारणाया मूलन्तु अतीते वर्षाणां शतद्वये शतत्रये वा संस्कृतविदुषां क्लिष्टभाषाप्रयोग एव। तत्रापि च प्रधानं कारणं व्यवहारे संस्कृतभाषाया अप्रयोग एव। व्यवहार एव भाषां सरलां करोति, अव्यवहारश्च कठिनाम्। अत एव यदा संस्कृतं व्यवहारे प्रयुज्यते स्म न तदाऽऽसीत् तस्यां काठिन्यम्। पूर्वतनैः आचार्यैः अतीव सरला सुबोधा च भाषा प्रयुज्यते स्म स्वीयेषु ग्रन्थेषु।

आदिकवेः वाल्मीकेः, भगवतो व्यासस्य, वैयाकरणधुरीणस्य पाणिनेः, महाभाष्यकारस्य पतञ्जलेः, दार्शनिकशिरोमणेर्भगवतः शङ्कराचार्यस्य महाकवेः कालिदासस्य च रचनासु केन अनुभूयते भाषायाः कठिनता। अवलोकयन्तु सहृदयास्तेषां संस्कृतं, आस्वादयन्तु च भाषायाः सारल्यं माधुर्यं च। यथा –

**'किं च भोः श्लोका अपि प्रमाणम्। किं चातः? यदि श्लोका अपि प्रमाणम्, अयमपि श्लोकः प्रमाणं भवितुमर्हति।'**

**'बृहस्पतिश्च प्रवक्ता, इन्द्रश्चाध्येता, दिव्यं वर्षसहस्रमध्ययनकालः, न चान्तं जगाम, किं पुनरद्यत्वे। यः सर्वथा चिरं जीवति वर्षशतं जीवति'**। इति पतञ्जलिः।

**'नेश्वरो जगतः कारणमुपपद्यते। कुतः?**

**वैषम्यनैर्घृण्यप्रसङ्गात्। कांश्चिदत्यन्तसुखभाजः करोति देवादीन्, कांश्चिदत्यन्तदुःखभाजः पश्वादीन्, कांश्चिन्मध्यमभोगभाजो मनुष्यादीन्, इत्येवं विषमां सृष्टिं निर्मिमाणस्य ईश्वरस्य पृथग्जनस्यैव रागद्वेषोपपत्तेः**'। इति शङ्कराचार्यः।

पुरा या रचना सरलतासम्पादकेन माधुर्येण प्रसादेन च गुणेन युक्ता भवति स्म, गण्यते स्म सैव सर्वोत्कृष्टा रचना। अस्मादेव कारणात् अनुभूयते कालिदासादीनां उत्कृष्टता माघादिभ्यः कविभ्यः।

इदानीमपि यदि संस्कृतं व्यवहारस्य भाषा स्यात्, स्यादेषा अतीव सरला सुबोधा च।

संस्कृतस्य व्याकरणमपि नातिकठिनम्। अन्यासां भाषाणां व्याकरणवत् विनापि सूत्राणि, सरलैर्नियमैः व्यवहारेण च पठितुं शक्यते एतत्। न तदर्थं आवश्यकता एकान्ततः पाणिनिव्याकरणाध्ययनस्य।

अस्मिन् पत्रेऽपि विधास्यते एतादृशः प्रयासः सरलतया व्याकरणस्य ज्ञानार्थम्। अतः संस्कृतभाषा कठिनेति भ्रान्ता निर्मूला च धारणा संस्कृतसेविभिः संस्कृतानुरागिभिश्च स्वहृदयात् दूरीकरणीया एव।

**उपसंहारः**

अस्ति हि संस्कृतं अस्माकमतिप्राचीनात् कालात् प्रवर्तमानस्य उत्तमस्य इतिहासस्य भव्यायाः संस्कृतेश्च आधारभूतम्। एतस्य अध्ययनेन एव भारतीया युवकाः स्वीयस्य प्राचीनसाहित्यस्य शक्नुवन्ति गवेषयितुं निगूढानि तत्वानि। 'इतिहास आवर्तयति आत्मानम्' इति लोकोक्तिमनुसृत्य वयमस्माकं पुरातनमितिहासमनुचिन्त्यैव समर्था निर्मातुं उज्ज्वलं भविष्यम्।

संस्कृतस्य उपर्युक्तां विशिष्टतां विचार्यैव अस्माभिः नानाविधैः सरलैः संक्षिप्तैश्च लेखैः अलंकृतेन अनेन पत्रेण समस्ते देशे संस्कृतभाषायाः संस्कृतसाहित्यस्य भारतीयसंस्कृतेश्च प्रचार आत्मनो लक्ष्यं निर्मितम्।

संस्कृतभाषां प्रति सर्वसाधारणभारतीयानाम् अभिरुचेः उत्पादनाय, विवादग्रस्तविषयान् विहाय सरलया भाषया सारगर्भितायाः संस्कृतपरिपोषिकायाः पाठ्यसामग्र्याः उपस्थापनम्, संस्कृतसाहित्यस्य अनुपमनिधेश्च आस्वादनं प्रधानमुद्देश्यमस्य पत्रस्य।

यदि नाम स्यात् अस्मिन् कार्ये विदुषां, शिक्षाशास्त्रिणां, विद्यार्थिनां, धनिकानां च सहयोगो विशेषेण, तर्हि न केवलमियमस्माकमाशा, अपितु दृढो विश्वासः यत् पत्रमेतत् स्वलक्ष्यं साधयित्वैव विरमेत्। इति शम्।

[विशिष्टोऽयं लेखो 'भारती' पत्रिकायां पूर्वं (वर्ष-१, अङ्कः-१, कार्त्तिकमासः, वि.सं.२००७) प्रकाशितोऽधुनाऽऽदर्शरूपेण कौस्तुभ-जयन्त्यवसरे पुनः प्रकाश्यते।] – सम्पादकः सम्प्रति

# चित्तौडदुर्गस्य विजयस्तम्भः

(मुखपृष्ठस्थ-विजयस्तम्भवर्णनम्)

❑ स्वामी सुरजनदासः
(प्रथमसम्पादकः)

मेवाड़प्रदेशे विद्यमानं चित्तौड़दुर्गं महाराणा-वंशजानां त्यागेन, क्षत्रियवीराङ्गनानां सतीत्वेन स्वस्य दृढ़तया विशालतया च न केवलं भारते अपि तु समस्ते भूमण्डले प्रसिद्धमस्ति।

इदं तदेव दुर्गं यत्र हमीर-कुम्भा-सांगा-प्रताप-भामाशाहप्रभृतीनां वीराणां पुरुषाणां पद्मिनी, पन्ना, मीराप्रभृतीनां वीराङ्गनानां च नेतृत्वे सहस्रशः स्त्रीभिः पुरुषैश्च देशरक्षार्थं निजबलिं दत्त्वा अस्या भूमेः प्रतिकणं पवित्रं कृतम्। राजस्थानभाषायामस्य विषये इयं लोकोक्तिः प्रसिद्धाऽस्ति 'चित्तौड़दुर्गमेव दुर्गं अन्यानि दुर्गाणि तु नामतो दुर्गाणि' इति। (गढ़ तो चित्तौड़गढ़ और सब गढ़ैया हैं।)

इदं दुर्गं सार्धक्रोशं (३ मील) आयतम्, क्रोशचतुर्थांशं च विशालम्। यद्यपि अस्मिन् जयमलपत्तादीनां स्मारकाणि, महाराणाकुम्भावीरस्य प्रासादः, महासतीस्थानम्, पद्मिन्या राजभवनम्, इत्यादीनि दर्शनीयानि अत्यन्तं स्फूर्तिदायकानि च स्थानानि सन्ति, तथापि विजय-स्तम्भस्तु तेषु सर्वेषु मुख्यतमः।

इमं स्तम्भं महाराणाकुम्भा 'मण्डू' सुल्तानं महमूदं विजित्य स्वविजयोपलक्ष्ये १४४८ तमे ईशवीये संवत्सरे निर्मापितवान्। अस्य औन्नत्यं (ऊंचाई) १२० फीटपरिमाणयुतं, निम्नप्रदेशे अस्य वर्तुलता (गोलाई) ३० फीटपरिमाणमिता विद्यते। एष स्तम्भः प्रस्तरनिर्मितः महादृढ़ नवभूमिकश्च (९ मंजिला)। अस्मिन् निम्नभागात् उपरिभागपर्यन्तं गवाक्ष (झरोखा) युक्तानि सोपानानि विद्यन्ते। अस्य सर्वोऽपि बाह्यः भागः प्रस्तरमूर्तिभिः अलङ्कृतः, यासां प्रस्तरमूर्तीनां आर्यधर्मस्य पौराणिकगाथाभिः सम्बन्धोऽस्ति। श्रूयते एष बहिरङ्कितप्रस्तरमूर्तिभिः भारतस्य सर्वेषां सम्प्रदायानां प्रतिनिधित्वं करोति।

कर्नलटॉडमहोदयेन स्वनिर्मितराजस्थानस्य इतिहासे अस्य तुलना इन्द्रप्रस्थ (दिल्ली) स्थितेन 'कुतुबमीनार' स्तम्भेन कृता। सौन्दर्यं तु अस्य (विजयस्तम्भस्य) ततः (कुतुबमीनारस्तम्भात्) अपि अधिकम् इति लिखितम्।

फरगूसनमहोदयस्तु कलादृष्ट्या अयं विजयस्तम्भः रोमदेशीयात् ट्रेजनस्तम्भात् अपि उत्कृष्टतरः इति वर्णितवान्।

– महाराजाकॉलेजः, जयपुरम्।

[विशिष्टोऽयं लेखो 'भारती' पत्रिकायां पूर्वं (वर्ष-१, अङ्कः-१, कार्त्तिकमास, वि.सं.२००७) प्रकाशितोऽधुनाऽऽदर्शरूपेण कौस्तुभ-जयन्त्यवसरे पुनः प्रकाश्यते।] – सम्पादकः सम्प्रति

# संस्कृतभाषाविषये संस्कृतज्ञानां* कर्तव्यम्

❑ भट्ट-मथुरानाथशास्त्री

संस्कृतभाषा आर्याणामुज्ज्वलपरम्परायाः प्रदीप्तिमानेको निधिः। संसारस्य सर्वभाषाणां मध्ये संस्कृतभाषा सुतरां पुरातनी। भारतस्य प्रायः सर्वा एव भाषाः संस्कृततः समुद्भूताः। इतिहासेन तदिदं सर्वथा प्रमाणीकृतं यत् संस्कृतस्य प्रभावो न केवलं भारतवर्षे एवास्ति, अपितु तिब्बत-चीन-जापान-कोरिया-लङ्का-मलाया-जावा-सुमात्रा-तुर्कस्थान-अफगानस्थानप्रभृतिषु, तथा दूरातिदूरवर्तिषु मिश्रमैक्सिकोप्रभृतिदेशेष्वपि सुतरां वर्तमानोऽस्ति। संस्कृतस्य साहित्यं सुन्दरतायां मौलिकतायां च सर्वतः श्रेष्ठं परिगणितम्। संस्कृतस्य शब्दकोषो यथा अत्यन्तं विपुलस्तथा संस्कृतस्य व्याकरणं तथा तस्य अन्यान्यसाहित्यमपि अत्यन्तं परिनिष्ठितम्, विशुद्धतायामनुपमम्।

संस्कृतभाषायाः सर्वतोऽधिकमेकमन्यदपि महत्त्वमिदं वर्तते यत्-ऐतिहासिकेऽस्मिन् समये भारतोपरि बभूवुरनेकान्याक्रमणानि। शकाः, हूणाः, यवनाः अनेके अत्राऽऽगताः। स्वशासनं भारते प्रचाल्य सर्वे ते प्रतिनिवृत्ताः। तदनन्तरं भारते ते आङ्ग्लदेशीया अपि समागताः, येषां राज्ये कदाचिदपि सूर्यो नास्तमगात्। शासनं च तेषां सार्द्धशताब्दीपर्यन्तमेकच्छत्रमभूत्। एवंविधानां बहिर्देशीयचक्राणां प्रभावो भारतीयभाषाणामुपरि प्रबलतया भवेदिति स्वाभावसिद्धमासीत्। इतिहासः साधयति यत् हिन्दीभाषा पारस्य-आरब्य-भाषाशब्दानां मिश्रणेन हिन्दुस्तानी-अथवा उर्दू रूपं जग्राह। महाराष्ट्रभाषाऽपि पारस्यादिभाषामिश्रणेन उर्दूसहचरी अभवत्। केवलं संस्कृतभाषैव तादृशी अभवत्, यस्यां वैदेशिकसंसर्गेऽपि न काचिद्रूपपरिवृत्तिरभूत्। संक्रमणकालेऽप्यस्मिन् संस्कृतभाषा अन्तः, बहिश्च सर्वथा अविकृताऽतिष्ठत्। न केवलमियं स्वयं शुद्धा अतिष्ठत्, प्रत्युत आरब्य-पारस्य-उर्दू भाषाणां मिश्रणेन सर्वथा दूषिता या अन्यान्या भारतीया भाषा आसन्, तासां शुद्धीकरणस्याऽऽधारोऽपि सेयं संस्कृतभाषैव समभवत्।

संपूर्णोऽपि संसारः साम्प्रतमपि सर्वथा विजानाति यत् दर्शनानाम् आर्यधर्माणां चाऽध्ययनार्थं संस्कृतभाषाया अध्ययनमनिवार्यम्। हिन्दुभिः स्वतन्त्रतया अनेकानि शास्त्राणि, अनेके संप्रदायाश्च प्रवर्तिताः, एका प्रभावशालिनी धर्मपरम्परा परिचालिता, किन्तु सर्वेषामेषां प्रचारसंबन्धि साहित्यं संस्कृतभाषायामेव लिखितमभूत्। अतएव यदि भारतीया वयमस्माकं राष्ट्रस्य वास्तविकं परिचयं चेत्कामयामहे तर्हि संस्कृताध्ययनमस्माकं कृते नितरामावश्यकम्।

संस्कृतं चिरकालाद्भारतस्य राष्ट्रभाषा। बहोः कालादेतस्या अध्ययनं राष्ट्रभाषारूपेणैव देशेऽभवत्। देशस्य शासका राजानो महाराजाश्च संस्कृतभाषायाश्चिरजीवनप्रचारार्थं संस्कृतपण्डितेभ्यः, संस्कृतपाठशालाभ्यश्च उदारतापूर्वकं राजाश्रयमददुः।

* श्रीबाबासाहेब आप्टे-महोदयस्य लेखमाधारीकृत्य।

अस्मिन् युगे अंग्रेजीभाषायाः साम्राज्यं भारतस्य गृहे गृहे विलोक्यते। किन्तु पूर्वसमये संस्कृतस्य प्रभुता ततोऽप्यधिकायते स्म। भारतीयाः पुरुषाः संस्कृतभाषामात्मनो राष्ट्रीयसत्तास्थिरीकरणस्य प्रधानं साधनं मन्यन्ते स्म। जन्मनः समारभ्य मृत्युपर्यन्तं - जायमानाः षोडश संस्काराः सर्वेऽपि संस्कृतभाषाद्वारैव संपन्ना अभूवन्, ये वर्तमान-कालपर्यन्तमपि येन केनचित्प्रकारेण समाजे प्रचलिताः सन्ति। प्रत्येकं बुद्धिशाली पुरुषो राष्ट्रियसंस्काराणां महत्त्वं सर्वभावेन मानयति। प्रत्येकधर्मे प्रत्येकसमाजे चाऽपि संस्काराणां महत्त्वं स्वीकृतमस्ति, किन्तु हिन्दुसमाजे संस्काराणां महत्त्वं विशेषरूपेण संमानितं, नूनम् अस्माकमविचलो विश्वासोऽस्ति यत् संस्काराणां प्रभावादेव वयं यथार्थमानवा भवामः। इयं वार्ता संप्रति सर्वैरेव शिक्षितैः सुदृढीकृता यत् संस्काराणां (अर्थाद्-व्याकरणस्य) सुदृढतया परिचालनादेव सेयं संस्कृतभाषा प्राणघातकानामाक्रमणानां सत्त्वेऽपि निजं जीवितमद्यावधि सुरक्षितं चकार।

संस्कृतभाषायाः स एष महिमा, युगयुगान्तरेभ्यः प्राप्तं राष्ट्रियतायास्तदिदं गौरवं, अंग्रेजसदृशानां धूर्तबुद्धीनामाक्रमणकारिणां दृष्टावपि समायाति स्म। अंग्रेजानां काकदृष्टितो नेदं गुप्तीकृतमतिष्ठद् यत् भारतोपरि अनन्तानामाक्रमणानां संकटे सत्यपि, संस्कृतभाषाया उदात्तविचाराणां पौष्टिकभोज्य-सेवनादेव अत्रत्यसमाजस्य धारणा पूर्ववत् अक्षुण्णा अतिष्ठत्। अनेकेषामाघातानां सहनस्य आत्मिकं बलं तस्मिन्नतिष्ठत् । एतत्सर्वं विचार्य, अस्माकं दुर्भाग्यात्, निजशासनस्य प्रारम्भे एव तैरतिदुर्लक्ष्यरूपेण नानाविधैर्गुप्तप्रकारैरस्माकं राष्ट्रियभाषाया उपरि आघातं कृत्वा एतस्या उच्छेदस्य प्रयत्नः प्रारब्धः। अस्माकं भाषायाः स्थाने आङ्ग्लभाषा राष्ट्रभाषारूपेण अस्माकमुपरि संस्थापिता। शनैःशनैराङ्ग्लभाषान-भिज्ञो ग्रामीणो, मूर्खश्च संसिद्धो देशे। आङ्ग्लानां तदिदं कुटिलं षड्यन्त्रं बहुध्वंशेषु सफलमभवत्। आङ्ग्लानामनुकरणेन अस्मद्देशीयाः शिक्षिता अपि संस्कृतभाषां 'मृतभाषाम्' अकथयन्। दौर्भाग्यात् अस्माकं हस्तादेव अस्माकं राष्ट्रभाषाया उच्चाटनं सोत्साहमभवत्।

'साधारणजनाः संस्कृतं न बुध्यन्ते' इति मिषेण धार्मिकसंस्कारा अपि प्रान्तीयभाषासु भवेयुरिति प्रयासः प्रारब्धोऽभून्नूनम्। संस्कृतपण्डितानामुपहासः प्रारभ्यत। पुरा हि प्रत्येकधनवान् पुरुषः संस्कृत-पण्डितेभ्यः समुचितमाश्रयं ददाति स्म। किन्तु नानाव्यपदेशैः अंग्रेजा भारतीयधनिकानां भूम्यादिसंपत्तीरपहरन्ति स्म, येन हि संस्कृतभाषाया आश्रयः स्वत एव उच्छिन्नोऽभवत्। एवं शनैः शनैर्जीविकादिविलोपात् पण्डितपरिवाराः नाममात्रार्थं संस्कृतं शिक्षित्वा अंग्रेजीशिक्षाऽभिमुखाः समभवन्। दिवसा एवंविधाः समागच्छन् यत् 'येस्, नो' इत्येवंमात्रशिक्षिता अपि जनाः सानन्दं **पञ्चविंशति**-मुद्रावेतनं लभन्ते स्म। किन्तु घोरपरिश्रमेण अनेकशास्त्रज्ञस्यापि पण्डितस्य निजपरिवार-पोषणमपि दुष्करमभूत्। ततो येन केनाप्युपायेन निजोदरपूरणस्य प्रवृत्तिर्मनुष्यस्याऽस्य स्वाभाविकी। ततो वराकाः पण्डिता एव प्रवृत्तेरस्या अपवादभूताः कथं भवेयुः? अस्याः परिस्थितेः परिणामः

अतिविचित्रो भयानकश्चाभवत्।

गतायाः शताब्द्या उत्तरार्द्धे अस्माकं समाजे ये नवीना नेतारः समुदभवन्, ते भारतीयैरादर्शैः, भारतीयविद्याभिश्च सह नितान्तमपरिचिता आसन्। किन्तु अस्मिन्नेव समये परतन्त्रताजनिता नानाविधाः क्लेशाः परितः प्रासरन्। अस्य प्रतीकारार्थं नानाविधा उपायाः प्राचरन्। समाजस्य युवकजनानां बलवृद्ध्यर्थं स्थाने स्थाने व्यायाम-मल्लक्रीडादिरङ्गाः प्रतिष्ठिता अभवन्। सामूहिकव्यायामस्य तन्त्रं प्रारभ्यत। राजनीतिमुद्दिश्य स्वदेशीयस्य संग्रहो विदेशीयस्य बहिष्कारोऽपि-प्राचलत्। ततः शनैरियमपि भावना प्रबलाऽभूद् यद् यावत्कालमङ्ग्रेजा भारते स्थास्यन्ति तावत् अस्मत्कृतानां प्रयासानां फलं न भविष्यतीति। अतएव संघर्षस्य भावना बलवती अभवत्। सर्वेषामपि जनानामवधानं राजनीतिं प्रति आकृष्टमभूत्। अङ्ग्रेजानां भारताद् बहिष्करणमेव मुख्यं लक्ष्यमभूत्। कस्याऽपि विचारशीलस्य एतां वार्तां प्रति लक्ष्यमपि नाऽभवद् यत् अस्मिन् संघर्षयुगे अस्माकं भारतीयानामपि विचाराः साम्प्रतम् अभारतीयाः संपन्नाः। अस्माकमभिरुचिः पाश्चात्त्यप्रकाराणां संजाता। राष्ट्रीयवृत्तेः कृते ये सद्गुणा आवश्यकास्ते सर्वेऽपि नाशमगमन्।

भारतीयसंस्कृतिं परिचालयितुं यादृशी दिनचर्या, यादृग् वातावरणमुपयुक्तं सर्वं तद् विलुप्तम्। किन्तु एतां वार्तां प्रति विचारस्य, अवधान-दानस्य वा अवसर एव नाऽभवत्। दुर्भाग्येन सह वक्तव्यं भवति-यद् अद्यतने भारते समन्ताद् दृश्यमानो विचारसंबन्धी संभ्रमः, राष्ट्रीयभावेषु पतितो विच्छेदः, तस्यैव अकारणात्मकस्याऽऽन्दोलनस्य परिणामः। भारतस्याऽस्य राष्ट्रीयं स्वरूपं कीदृक्, अस्माकं श्रद्धाभाजनानि के के? अस्माभिः केन मार्गेण गत्वा उद्देश्यपूर्तिः कर्तव्या, एतेषां विषयेऽपि संदेहाः समुपस्थिताः। हन्त! इतोऽधिका राष्ट्रिया आपत्तिः काऽन्या भवेत्।

एवंविधे विचारसंकटे एव १५ अगस्तदिवसे (१९४७ तमे ख्रिष्टवत्सरे), भारतस्य (पाकस्तान-हिन्दुस्थानेतिरूपेण) विभागं कृत्वा अङ्ग्रेजाः स्वदेशं प्रति निवृत्ताः। एतेन सहैव अस्माकं नेतृ-समाजे कृतकृत्यतायाः (विजयप्राप्तेः), स्वार्थपूर्तेश्च यथा प्रवृत्तिर्जागरूकाऽभवत्तथा द्वितीयपार्श्वे निराशाया विफलताया वा वातावरणमुत्पन्नमभूत्। साधारण-जनैर्विचारितं यत् संप्रति भारतं स्वतन्त्रं जातम्। येऽस्माकं प्रतिपन्थिनः स्वार्थरोधकाश्च विदेशीया आसन् संप्रति ते दूरेऽभवन्। साम्प्रतमस्माकं परिश्रमस्य, कठिनप्रयासकरणस्य च नास्त्या-वश्यकता। इदानीं भारतस्य शासकाः अस्मद्देशीयाः अस्माकं भ्रातर एव। अत एव सर्वं साधनीयं सर्वकार एव साधयिष्यति। हन्त, अस्या अकर्मण्यतायाः परिणामं यद्यपि विचारशीलाः सर्वत्र द्रष्टुं विचारयितुं च शक्नुयुः, किन्तु तस्याः सर्वतोमुखो भयानकः परिणामोऽस्या संस्कृतभाषाया उपरि समभवत्।

उपरि यथा वर्णितवानस्मि तथा राष्ट्रियताऽभि-मानस्य जागरणार्थं सेयं संस्कृतभाषाऽप्रतिमं साधनम्। देशस्य सर्वतोमुखं बलवत्त्वाऽर्थम्, आत्माभिमानस्य प्रोत्साहनं निजसंस्कृतेः पुनरुज्जीवनं च सर्वथा आवश्यकम्। अतएव एवंविधस्य सर्वस्यापि कर्तव्यस्य सिद्ध्यर्थं संस्कृतभाषायाः, तन्निष्ठविद्यानां च पुनरुज्जीवनं

सुतरामावश्यकमासीत्। संस्कृतस्य समुन्नयनार्थ-मनेकविधैरपि दृष्टिकोणैः प्रगाढः प्रयत्नः कर्तव्योऽभूत्। किन्तु दुर्भाग्यवशाद् वक्तव्यं भवति यत् स्वराज्यप्राप्तेः **सप्त**वर्षानन्तरमपि संस्कृतभाषाया वनवासो न समाप्यते! राज्यतन्त्रम् (सर्वकारः) अस्मिन् विषये न किञ्चिदपि करोति। संस्कृतपण्डिता अपि पूर्ववत् उदासीनाः। सुस्पष्टा सा वार्ता यत् सेयं संस्कृतभाषा भारतीयसंविधानद्वारा संमानितासु चतुर्दशभाषासु अन्यतमा परिगणिता। प्रतिदशवर्षोत्तरं भाविन्यां जनगणनायां वयं निजमातृभाषां उपभाषां वा संस्कृतं लेखयितुं पारयामः। किन्तु सेयं वार्ता संस्कृतपण्डितानां स्मरणशक्तितो दूरीभूता। **१९५१** तमे ख्रिष्टवत्सरे या जनगणनाऽभवत् तस्याः नानाभाषाभाषिणां लोकानां प्रकाशितसूच्याम् आसेतुहिमाचलं संपूर्णेऽपि भारते संस्कृतभाषिणां संख्या केवलं **५५५** निर्दिष्टा!!

अस्माकं स्वतन्त्रभारतस्य योऽयं 'शिक्षा-विभागः' तस्य तु कथैव का? भारतोपरि योऽयमुपकारः स कैरक्षरैर्वर्ण्यताम्? निर्धार्मिकताया व्यवधाने बालबुद्धिभ्यश्छात्रेभ्यस्ता वार्ताः शिक्ष्यन्ते या अभारतीयाः अर्थात् अराष्ट्रियाः। एतद्विभागद्वारा कुत्रचिद् **गीताध्ययनोपरि प्रतिबन्धः** स्थाप्यते, तर्हि कुत्रचित् अस्माकं राष्ट्रियतायाः सर्वथा उन्मूलकानि पुस्तकानि पाठ्यत्वेन निर्धार्यन्ते। बहुषु स्थानेषु तु संस्कृतम् अतिकठिनमस्तीति व्याजेन संस्कृतभाषायै अर्द्धचन्द्रः प्रदीयते। अहह! अस्माकमुच्चपदस्थाः सर्वकारीयाः अधिकारिणः कर्मचारिणश्च महामहत् नामधेयं दत्त्वा, घोरमाडम्बरं च कृत्वा एतद्भाषमाणाः श्रूयन्ते यत् 'संस्कृतभाषां प्रति अस्माकं महान् अनुरागः, एषैव भाषा राष्ट्रभाषासिंहासनार्थं सुयोग्या।' किन्तु केवलं वागाडम्बरेणाऽनेन किं सिध्येत्? 'वनमहोत्सव' सदृशानां स्वल्पफलानामाडम्बराणां प्रदर्शने कोटिशो मुद्राः व्ययीक्रियन्ते। आरब्य-पारस्यप्रभृतीनाम् अभारतीयभाषाणां प्रचारार्थं लक्ष-लक्षमुद्राणां पौष्टिकं भोजनं प्रच्छन्नराष्ट्रद्रोहिभ्यः सर्वकारः प्रतिवर्षं सोत्साहं प्रददाति। किन्तु संस्कृत-भाषारक्षकेभ्यः पण्डितेभ्यः प्रश्रयं दत्त्वा एक-द्वानां संस्कृतविश्वविद्यालयानां परिचालनस्यावश्यकता न कदाचिदप्यनुभूता राज्यशासकैः? अस्माकं संस्कृत-पण्डिताः केवलं संस्कृतसंमेलनम्, संस्कृतपरिषदा-मायोजनं विहाय संस्कृतप्रचारस्य मार्गमेव न जानन्ति।

संस्कृतभाषा अस्माकं राष्ट्रियसंपत्तिः। किञ्चिदप्यस्यामीदृशं नास्ति यस्य नाशः सहनीयो भवेत्। सर्वमप्यस्यामैश्वर्यसूचकम्, आर्यत्वाऽभिमा-नार्हं च। संस्कृतभाषायाः सर्वस्वमिदमस्माभिः पुनरुज्जीवनीयं भवेत्। संस्कृतस्य परम्परा नाद्यापि सर्वथा विनष्टा। अद्यापि दशसहस्रं 'पञ्चदशसहस्रं' वा पण्डिता भारतेऽस्मिन् भवेयुः। किन्तु ते सर्वे संप्रति विपद्ग्रस्ताः। तेषामग्रे कठिनसमस्या सेयं यत् तेषां पाठनाय (अध्यापनाय) विद्यार्थिनो न लभ्यन्ते। ये किल शिक्षासमुचितं वयः प्राप्य शिक्षाक्षेत्रे प्रविशन्ति, ते हि बाह्यप्रतिष्ठायाः, तात्कालिकस्याऽर्थलाभस्य च लोभे निमग्ना आङ्ग्लभाषाध्ययने एव निपतन्ति।*

---

*[विशिष्टोऽयं लेखो 'भारती' पत्रिकायां पूर्वं (वर्ष-५, अङ्कः-४, माघपूर्णिमा, वि.सं.२०११) प्रकाशितोऽधुनाऽऽदर्शरूपेण कौस्तुभ-जयन्त्यवसरे पुनः प्रकाश्यते।] – सम्पादकः

एका भ्रान्तिः सर्वतः सेयं प्रसृता, यत् संस्कृतस्य पुनरुज्जीवनं केवलमेकस्या भाषाया एव पुनरुज्जीवनमिति। संस्कृतभाषा केवलमेका भाषा नास्ति, अपि तु संस्कृतविद्या। पाश्चात्यपण्डितैः संस्कृतस्य गुणविचारे प्रोक्तम् - 'यत् इयं केवलं भाषामात्रं न अपि तु विद्या।' संस्कृतभाषायां प्रवेशाऽधिकारे जाते संस्कृतसाहित्यं सरलीभवति, येन न केवलं भोजन-वस्त्रादिप्राप्तेरेव लाभः, अपि तु आध्यात्मिकोऽपि लाभः। मनुष्यस्य हृदयपरिष्कारो भवति, येन आत्मा परिशुद्धः सन् सांसारिक-बन्धनाद्विमुक्तो भवति। अयमेव आर्याणां सर्वतोऽधिकः पुरुषार्थः। एतस्यैव कृते संसारमात्रेऽपि भारतस्य जगद्गुरुत्वेन प्रसिद्धिः।

अन्या भ्रान्तिरियमस्ति यत् 'संस्कृतस्य प्रचुरे प्रचारे जाते प्रान्तीयभाषाणां मृत्युर्भविष्यति' इति। किन्तु सेयं निराधारा कल्पना। बहवो जनाः प्रवदन्ति यत् प्रान्तीय-भाषाणां विकासार्थं वैज्ञानिकी परिभाषा पर्याप्ता। एतन्मात्रार्थं संस्कृतभाषाया उपयोगश्चेदसौ निरर्थकः। भारतस्य स्वल्पसंख्यैरेव जनैः संस्कृतभाषायाः संरक्षणे स्वीकृते सर्वतः संस्कृतस्य प्रचारे प्रयासो विफलः।

अपरा अपि बह्व्यो भावनाः सन्ति यत् 'संस्कृतभाषा राष्ट्रभाषारूपेण न कदापि व्यवहर्तुं शक्यते' 'संस्कृतभाषा न कदापि पुरापि व्यवहारभाषारूपेण प्रचारमलभत' इत्यादि। किन्तु एवंविधाभिर्भ्रान्तधारणभिर्दूषितं वातावरणं, न केवलं संस्कृतपण्डितैरेव, अपि तु तैः सर्वैरेव शिक्षित-महोदयैः शोधयितुं शक्यते, ये हि संस्कृतभाषां प्रति अनुरागं रक्षन्ति। ये किल संस्कृत-भाषाया महत्त्वं जानन्ति, 'संस्कृतभाषाद्वारा इह लोके परलोके च भारतीयानां कल्याणं भवेदिति' येषां हृदयविचारस्ते सर्वे एव संस्कृतभाषायाः प्रसारार्थं चेद् बद्धपरिकरा भवेयुस्तर्हि अनायासमेव कलङ्कशोधनं भवेत्। संस्कृतभाषायाः पुनः प्रसारश्च संभवेत्।

## इदानीं किं कर्तव्यम्

वैदेशिकानामग्रेजानां शासनकाले यथा सेयं संस्कृतभाषा वैकल्पिको विषयः कल्पितोऽभूत्तथा स्वराज्यशासनेऽपि संस्कृतपठनमैच्छिकं निर्धारितमिति महानन्यायः। अधुना हि संस्कृताध्ययनमनिवार्यं कर्तव्यम्। किन्तु प्रचलितैः शिक्षालयैरेतत् संपादयितुं न शक्यम् यतस्ते सर्वेऽपि राजतन्त्रीयशिक्षा-विभागस्याऽधीनाः। तेभ्य एतस्याऽऽशा दूराऽपास्ता। परं केवलं संस्कृतमेवाध्यापयन्त्योऽपि पाठशालाः समस्तेऽपि भारते **दशसहस्रानुमिताः**। अत एव अभिभावका यदि निजान् बालकान् आसु पाठशालास्वेव प्रेषयितुं दृढनिश्चया भवेयुस्तर्हि संस्कृतप्रचारकार्यं भूयस्सु अंशेषु सुकरं भवेत्। अध्यापनसमर्थानामपि पण्डितानां सकाशे विद्यार्थिनो न सन्तीति सेयं विषमसमस्या च दूरीभवेत्। आङ्गलभाषाऽध्यायिनामपि विषये प्रौढजनानामय-मनुभवः - यत् प्राथमिकशिक्षां लभमानेषु सहस्रच्छात्रेषु बुद्धिमन्तः, शिक्षायां रुचिमन्तः, द्रव्यसौकर्यवन्तश्च अतिस्वल्पा एव शिक्षार्थिनो

निष्पद्यन्ते। एवमेव प्रतिवर्षं लक्षावधिच्छात्रेषु संस्कृताध्ययनमारभमाणेष्वपि कतिपये बुद्धिमन्तः, शास्त्ररुचिसंपन्ना एव शिक्षार्थिनः शास्त्राध्ययनकर्मठाः संपत्स्यन्ते। किन्तु प्रवृत्तिप्रेरणा अस्माकमभिभावकानामेव आयत्ता। अपि राष्ट्रस्याभ्युदयं कामयमाना देशप्रेमिणो यथाशक्ति संस्कृतपाठशालानामार्थिकीं सहायतां निजबालकानां संस्कृतपाठशालासु स्वल्पसमयार्थं प्रेषणमपि किं नाङ्गीकुर्युः? महाविशालस्य देशस्य प्रचुरकल्याणाय किम् एतावन्तमपि प्रयासं ते न स्वीकुर्युः?

बहुषु विद्यापीठेषु संस्कृतपरीक्षाणामपि पाठ्यक्रमो यद्यपि स्थापितः, किन्तु पाठ्यक्रमेऽस्मिन् कुत्रापि एकता न विलोकिता। देशस्य विभिन्न-विभिन्नविश्वविद्यालयानां संस्कृतशिक्षासम्बन्धिनी नीतिर्विभिन्न-विभिन्नैव समवाप्यते। शिक्षायाः पूर्णतायां, लोकानां शिक्षासौविध्ये च सोयं महान् अन्तरायः।

एवमेव संस्कृतपरीक्षाणां पाठ्यक्रमः आङ्गलभाषापरीक्षाणां बी. ए., एम. ए. परीक्षापर्यन्तः, कुत्रचित्कुत्रचित् ततोऽप्युन्नतोऽस्ति, किन्तु एतत्परीक्षोत्तीर्णा बी. ए., एम. ए. परीक्षोत्तीर्णवत् न संमान्यन्ते। किमत्र कारणम्? कारणमेतदेव, यत् ते केवलं संस्कृतमेव अधीतवन्तः, अंग्रेजीभाषाया बी.ए., एम.ए. परीक्षा तैर्नोत्तीर्णा। हन्त स्वतन्त्रताप्राप्तेरनन्तरम्, एतावत्समयोल्लङ्घनोत्तरमपि, आङ्गलभाषां प्रति एतावद्विवशता-प्रदर्शिका नीतिः सर्वकारस्य कृते नूनं लाञ्छनास्पदमेव। पर्वतसमानेन अनेनैव हृदयशूलेन संस्कृतपरीक्षोत्तीर्णा भग्नोत्साहा निराशाश्च वराकाः संपद्यन्ते। विद्यापीठानां ये कर्णधारास्तैः सोयं घातको व्यतिकरस्त्वरितमेव दूरीकरणीयः।

संस्कृतभाषा भारतस्य सर्वस्वम्। आर्षविज्ञानेनैव भारतस्य सर्वस्मिन्नपि विश्वे मस्तकमुन्नतम्। ततश्च संस्कृतविषये भारतीयानामभिमानः शोभते। विज्ञानाऽभिमानेन 'यः संस्कृतं न पठितवान्, असौ असंस्कृतः', इति रूढिः कामं देशे प्रसरेत्, शोभते च। किन्तु संस्कृत-भाषायां परिनिष्ठितत्वेऽपि, अंग्रेजी-भाषाऽनभिज्ञत्वमात्रेण तस्मै 'ग्रामीणता' पुरस्कारः किं समुचितः? अस्तु एवमवसरो न भवेदित्येव परिस्थितिः संपाद्या स्यात्।

किन्तु सेयं परिस्थितिर्देशकल्याणं विचारयद्भिः पुरुषैः परिवर्तनीयैव भवेत्। संस्कृतज्ञानां परम्परा नवजीवनं संचार्य पुनः प्रभावशालिनी संपादनीयैव भवेत्। हन्त वस्तुतो मृतभाषा **हिब्रूभाषापि इस्रायलस्य राष्ट्रभाषा** परिगण्यते, तदर्थमपि च इस्रायलस्य देशभक्ताः तनु-मनो-धनैः प्रयतमानाः सफला भवन्ति, तर्हि किं संस्कृतसेविन एव निराशा भवितुमर्हन्ति? येषामात्मबलं सर्वसंसारेऽपि सर्वतोऽधिकं प्रबलं परिगण्यते। केवलमावश्यकताऽस्ति दृढतापूर्वकं प्रबलप्रयत्नस्य।

एतदर्थं त्रय उपायाः कर्तव्याः स्युः। १-संस्कृत-भाषाया व्यावहारिकः प्रयोगः परितः

प्रवर्द्धनीयो भवेत्। २- संस्कृतविषये ये मिथ्याभ्रमाः प्रचारितास्तेषां दूरीकरणम्। ३- तथा संस्कृतशिक्षितानां योगक्षेमस्य व्यवस्थाकरणम्।

१- एतेषु प्रथम उपायः सर्वदृष्ट्यामेव सरलः। केवलं संस्कृतपण्डितानामेवाधीनः। एतदर्थं न तावद् धनव्ययस्याऽऽवश्यकता। नापि च राज्याधिकारिणां द्वारोपरि यातायातस्य। आवश्यकता केवलमियमेव ये संस्कृतपण्डिताः, संस्कृतं पठन्तश्च जनाः, प्राप्तस्य संस्कृतज्ञानस्य उपयोगं वाग्व्यवहारद्वारा निश्चयपूर्वकं कुर्युः। प्रतिपदं वयं पश्यामो यत् स्वल्पामपि आङ्ग्लभाषां शिक्षमाणा लोका एकत्र संमेलने मिथः आङ्ग्लभाषयैव व्यवहरन्ति। यदि निभृतं द्वावपि अंग्रेजीशिक्षितौ क्वचिन्मिलतस्तर्हि आङ्ग्लभाषया संलापमेव अभिरोचयतः। मिथः पत्रलेखने तु अंग्रेजीभाषामेव नियमेन स्वीकुर्वन्ति। इतः संस्कृतज्ञान् पश्यत। ते यत्र मिलन्ति तत्र प्रान्तीयभाषयैव व्यवहरन्तो दृश्यन्ते। यत्र ते संस्कृतं संलपन्ति सा लोकदर्शनार्थं संयोज्यमाना सभैव प्रायो भवति। तत्रापि एकस्मात्पण्डितादपरः पण्डितः संस्कृतं संलपन् बहुधा संकुचन् दृष्टो यन्मम मुखात्काचिदशुद्धिर्न भवेदिति। अस्त्यपि किञ्चित् तत् तथा। यदि कस्यचिन्मुखाद् व्याकरणस्य स्खलितं भवति तर्हि द्वितीयः पण्डितस्तदेतत् छिद्रं प्राप्य अपरस्य पराभवाय प्रयतते, न कदाचित् क्षमते। अतएव सोयं संलापः शनैः शनैः शास्त्रार्थसभायामेव परिणमति। अतएव संस्कृतशिक्षितानां मध्ये संस्कृतवाग्व्यवहारः शनैः शनैरव्यवहृतः संपद्यते। पत्रं मिथः प्रायः संस्कृत एव लिखन्ति, किन्तु वर्तमानव्यवहारं दृष्ट्वा तेऽपि हिन्दीमेव अमन्दीकुर्वन्ति। अपि सरलः, स्वाधीनोऽप्युपायः किं संस्कृतज्ञैर्नाऽनुष्ठेयो भवेत्? यद्ययमुपायः संस्कृतज्ञैरवमन्व्येत तर्हि अर्द्धतोऽप्यधिकाः बाधा दूरीभवेयुः।

२- द्वितीय उपायः संस्कृतभाषां प्रति लोकानां भ्रमनिवारणम्। इमे भ्रमा बहुविधाः सन्ति। अद्य सर्वेषामेव धारणाऽस्ति यत् संस्कृतं कठिना भाषा। किन्तु तेषां विचारे सेयं वार्ता न कदाचित् स्वयमायाति नाऽपि च कश्चित् शिक्षाकर्णधारस्तान् बोधयति यत् प्राचीनपुस्तकद्वारा भाषाशिक्षणस्य कृत्रिमा पद्धतिर्नाऽद्यापि केनचित् शोधिता। भाषा हि भाषणेनैव शिक्ष्यते, अतएव पुस्तकद्वारा पाठनस्य स्थाने यदि परस्परसंभाषणद्वारा संस्कृतं चेत् शिक्ष्यते तर्हि सा अनायासमेव अधिगता भवति। राजस्थानीयः पुरुषः परस्परं भाषणात्, श्रवणाच्च गुर्जरभाषां, महाराष्ट्रभाषां वा शिक्षते। सानन्दं च मिथो व्यवहरति। तर्हि किं संस्कृतभाषा प्रारम्भत एव शनैः शनैः संभाषणद्वारा न शिक्षितुं शक्येत? ये जना हिन्दीभाषां जानन्ति तेषां कृते संस्कृतज्ञानं किं कठिनम्? वर्तमानायां हिन्दीभाषायां अत्यधिकाः संस्कृतशब्दाः प्रविष्टाः। अन्येऽपि ये शब्दाः सन्ति ते संस्कृतस्य सकाशादेव अपभ्रष्टाः सन्ति। यथा- 'घर से दूर तालाब और पहाड दिखाई देते हैं' अस्मिन् वाक्ये 'घर' 'दूर' 'तालाब' 'पहाड' शब्दान् संस्कृतज्ञ एकवारं बोधने एव ज्ञातुं शक्नुयात्, न च

कदाचिद्विस्मरेत् । संस्कृतस्य व्याकरणं किञ्चित्कठिनं प्रतीयते, किन्तु नवीनेन प्रकारेण बोधने तस्याऽपि काठिन्यं न प्रतीयते । किञ्च व्याकरणज्ञाने सति भाषायां भ्रमः प्रमादो वा न पुनः संभवतीत्येव संस्कृतस्य महत्त्वम् ।

### पण्डितानां कर्तव्यम्

आधुनिकसंसारसंबन्धिनो यस्य ज्ञानस्य, येषामनुभवानां चाऽभावेन वर्तमानकाले शिक्षितः अपूर्णः परिगण्यते, तादृशस्य ज्ञानस्य संपादनार्थं सामयिकपुस्तकानां निर्माणं संस्कृतप्रचारवाञ्छुकानां नायकानां पण्डितानां च सामयिकं कर्तव्यम् । तथा एवंविधज्ञानप्रचारकाणां संवादपत्राणां, मासिकादि-पत्रिकाणां च संस्कृते प्रकाशनं कृत्वा शिक्षार्थिनां बोधसौकर्यं संपाद्यं स्यात् । यत्र चैवंविधा परिस्थितिरुपस्थिता स्यात्तत्र पुरातनग्रन्थैः सह नवीनं पाठ्यक्रमं संपाद्य द्वयोरपि समन्वयेन संस्कृत-पाठशालानां सामयिकी पाठ्यप्रणाली परिचालनीया भवेत् । किन्तु पाठ्यप्रणाल्यां तदिदं सर्वथा अवधातव्यं स्यात् यत् नवीनेन पाठ्यक्रमेण सेयं देववाणी भ्रष्टा, विकृता वा न भवेत् । अन्यथा **आयुर्वेदस्येव सांप्रतं विडम्बना स्यात्** । संप्रति आयु-र्वेदः सोयम् 'आर्याङ्गलवैद्यक' नाम्ना जनैः परिचीयते ।

साम्प्रतम् 'ऐलोपैथी' (आङ्गलचिकित्सा-शास्त्रम्) साहाय्यं विना चिकित्साकरणे चतुरो वैद्यः (आयुर्वेदाचार्यः) सुदुर्लभो जातः । एवमेव देववाण्या अपि सुदुर्दशा स्यात् । द्विसहस्रवर्षाणि व्यतीतानि, अनया संस्कृतभाषया घोराण्याक्रमणानि सोढानि । सांप्रतमपि संस्कृतस्याऽस्य भ्रष्टीकरणे, विकारोप-स्थापने च ये प्रयासा विरोधिनां भवेयुस्तेषां प्रतीकारः, सांमुख्यं च संस्कृतसेविभिर्वीरतापूर्वकं कर्तव्यं स्यात् । अस्मिन् संकटसमयेऽपि यदि वयमुदासीनाः शिथिलाश्च भविष्यामस्तर्हि राष्ट्रियसंपत्तेरस्या विलोपनापराधस्य, नामशेषीकरणपातकस्यापि भागिनो वयमेव भविष्यामः । भगवान् भद्रं भावयेत् ।

[विशिष्टोऽयं लेखो 'भारती' पत्रिकायां पूर्वं (वर्ष-५, अङ्कः-५, फाल्गुनपूर्णिमा, वि.सं.२०११) प्रकाशितोऽधुनाऽऽदर्शरूपेण कौस्तुभ-जयन्त्यवसरे पुनः प्रकाश्यते ।] - सम्पादकः

# वेदस्य सर्वविद्यानिधानत्त्वम्

यः कश्चिदपि मुक्तरक्तशर्मा[1]-आङ्गिरसो भारद्वाजः-जयपत्तनाभिजनः

**वाचं देवा उपजीवन्ति विश्वे**
**वाचं गन्धर्वाः पशवो मनुष्याः।**
**वाचीमा विश्वा भुवनान्यर्पिता**
**सा नो हवं जुषतामिन्द्रपत्नी ॥१ ॥**
**वागक्षरं प्रथमजा ऋतस्य**
**वेदानां माताऽमृतस्य नाभिः।**
**सा नो जुषाणो यज्ञमागादवन्ती**
**देवी सुहवा मे अस्तु ॥२ ॥**

**प्राक्कर्मोदयतो हि यस्य मिथिलादेशे शरीरोदयः**
**श्रीविश्वेशदयोदयाच्च समभूत् काश्यां सुविद्योदयः।**
**राज्ञा प्रीत्युदयादभूज्जयपुरे सम्पत्तिभाग्योदयः**
**सिद्धस्तन्मधुसूदनाय गुरवे नित्यं प्रणामोदयः ॥3 ॥**
**सर्वान् सावयवाञ्छब्दान् वक्तुं वा लेखितुं तथा।**
**यया सर्वो जनः शक्तस्तां भाषां संस्कृतां नुमः ॥४ ॥**
**ओष्ठापिधाना नकुली दन्तैः परिवृता पविः।**
**सर्वस्यै वाच ईशाना चारु मामिह वादयेत् ॥५ ॥**

नूनमेव महान् महोत्सवो यदद्य विविधभाषाभिज्ञाः सर्वैरप्यार्य्यजनैर्व्यवह्रियमाणानां सर्वासां भाषाणां मूलभूतायास्तत्रभवत्या गीर्वाणभाषाया अभ्युदयायाजस्रं प्रयतमानास्तत्रभवन्तो भवन्तः सभ्या अदभ्या बुभूषन्त सुशोभन्ते। तदत्र महामाङ्गलिकेऽस्मिन्नवसरे धर्मक्षेत्रात्मके पुण्यतमे कुरुक्षेत्रे सर्वतन्त्रस्वतन्त्रप्रज्ञभारतराष्ट्रस्य राष्ट्रपतिपदे राजेन्द्र इव प्रतिष्ठितानां 'प्राच्यसंस्कृतिनिष्ठ-महामहिम-राष्ट्रपति-**श्रीराजेन्द्रप्रसाद**महाभागानामध्यक्षत्त्वे राष्ट्रीय-मूलसंस्कृतिरूपस्य संस्कृतवाङ्मयस्य प्राणप्रतिष्ठार्थं समुपस्थितानां नीरक्षीरविवेकविचक्षणानां तत्रभवतां भवतां समक्षे किञ्चिद्वक्तुमुपक्रमे ।

साम्प्रतं हि राष्ट्रीयप्रजा सर्वतन्त्रस्वातन्त्र्यसुखमनुभूयमाना स्वच्छन्दरूपेण विहरति राष्ट्रप्राणेऽस्मिन् भारताग्निप्रधाने भारतवर्षे। अवश्यमेव सञ्जातानि भारतीयराष्ट्रमानवस्य चान्द्रभावप्रधानानि मनस्तन्त्राण्यपि सर्वथैव स्वतन्त्राणि, पार्थिवभावप्रधानानि शरीरतन्त्राण्यपि च। किन्तु सौरभावानुगतानि धर्म-ज्ञान-वैराग्य-ऐश्वर्य्यभेदेन चतुर्द्धा विभक्तानि विद्याबुद्धितन्त्राणि, एवं परमेष्ठिगर्भित-अव्यक्त-स्वयम्भु-प्रजापतिभावनिबन्धनानि आत्मतन्त्राणि तु अद्यावधि अपि एकान्ततः 'पर'तन्त्रानुगत-प्रतीच्यशिक्षा-संस्कृति-सभ्यता-आचार-व्यवहारादिनिबन्धनेन वारुणपाशबन्धनेन आबद्धानि परतन्त्राण्येवेति मुकुलितनयनैरेव तत्रभवद्भिर्भवद्भिराकलनीयमन्तर्जगति। आत्म-बुद्धि-तन्त्रस्वरूपविघातिका सर्वस्वसंहारिणी सैषा आत्मबुद्धिपरन्त्रता कथमभिभूता भवेदस्य राष्ट्रस्य, इति जिज्ञासायां गीर्वाणवाणी सुरभारती एवास्माकं पुरतः प्रस्फुटिता जायते ।

यतो ह्यस्ति संस्कृतभाषायामेव भारतराष्ट्रस्य मौलिकज्ञानकोशः सुप्रतिष्ठितः। तद् विज्ञानं तु संस्कृतभाषाधीनमेवेति न प्रच्छन्नं विदुषाम्। संस्कृतभाषाबोधविरहे स्वज्ञानकोशवञ्चिता वयं

---

१. मोतीलालशर्मा
१. वेदवीथिपथिकः पण्डित-मोतीलालशास्त्री
(पं.मधुसूदन ओझः साक्षाच्छिष्यः)

भारतीया असंस्कृताः, यथाजाताः प्राकृता एवेति नास्त्यत्र सन्देहलेशावसरः। भारतवर्षस्यास्य संस्कृति-सभ्यता-शिक्षा-ज्ञान-विज्ञान-शिल्पकला वाणिज्य-राजनीति धर्म्मनीति-समाजनीति-परराष्ट्रनीति-भावनारहस्यविश्लेषणात्मकस्य, स्मृति-आगम-पुराण-दर्शन-आयुर्वेद-धनुर्वेद शिक्षा-कल्प छन्दो-निरुक्त ज्यौतिष-शास्त्रप्रतिष्ठा-भूमित्वेन सर्वशास्त्रप्रतिष्ठात्मकस्य, अतएव **सर्वविद्या-निधानस्य मन्त्रब्राह्मणात्मकवेदशास्त्रस्य** हृदयाकाशेएव किञ्चिदिवान्वेषणीयं भवति प्रश्नदिशायामिति नात्र तिरोहितमिवास्ति। अतीतेऽपि भारतराष्ट्रे असंख्यसंख्यानुगता विद्यन्ते स्म संस्कृतविद्यालयाः। वर्त्तमानभारतराष्ट्रेऽपि वर्तन्त एव संस्कृतकालेजा यत्र तत्र प्रान्तेषु। तत्र शिक्षिता विद्वांसोऽपि शास्त्री-आचार्य महामहोपाध्यायादि-विविधोपाधिभारसमन्विता इतस्तो दन्द्रम्यमाणा अवलोक्यन्त एव। किन्तु संस्कृतवाङ्मयस्य मूलोद्देश्यभूतस्य सर्वविद्याकोशात्मकस्य वेदशास्त्रस्य ज्ञानविज्ञानसम्मतपारिभाषिक-स्वाध्याय-वञ्चितेन-केवल-अङ्गशास्त्रभक्ति-समन्वितेन संस्कृतेनैव भारतराष्ट्रस्य सुगुप्तकोशस्य समुद्धारो नैव सम्भाव्यते कदापि।

अतश्च संस्कृतप्रतिष्ठानेषु पुरातनेषु, संकल्पितअभिनवसंस्कृतविद्यालयेषु च अङ्गशास्त्रा-ध्ययनपरम्परा-प्रतिष्ठापनार्थं बद्धपरिकरा विद्वांसो राष्ट्रीयनेतारश्च मन्त्रब्राह्मणात्मकवेदशास्त्रस्य प्रतिष्ठापनं यदवधि न करिष्यन्ति, तदवधि केवलसंस्कृतभक्त्या न भारतीयसंस्कृतेः समुद्धारः सम्भाव्यते, इति स्पष्टं ब्रूमः। नातोऽन्यथा लक्ष्यसिद्धिसम्भावनापीति-उररीकृत्य संस्कृतवाङ्-मयाधारभूतायां 'छन्दोभ्यस्तेति' नाम्ना प्रसिद्धायां वेदभाषायामुपनिबद्धस्य वेदशास्त्रस्योपासना-साफल्याय राष्ट्रीयप्रजोद्बोधनाय राष्ट्रस्वातन्त्र्य-प्राणभूतायाः, वेदविद्यासम्बन्धे एव **वेदस्य सर्व 'विद्यानिधानत्वम्'** इति विषयमवलम्ब्य किञ्चिदिव निवेदयति यः कश्चिदपि मुक्तरको मोतीलाल-शर्म्मोपाह्वो राजपत्तनस्थः आङ्गिरसो भारद्वाजो वेदवीथिपथिकः। आशास्यते तच्छ्रुत्वा परिस्थितिविशेषकृत - सहजदोषानुपेक्ष्य उत्साहयुक्तं भावविष्यन्ति मां तत्रभवन्तो भवन्त इति।*

इह ननु जगतीतले लब्धजन्मानः सर्वेऽपि मानवाः स्वाभ्युदयमैकान्तिकं सुखं च नित्यं कामयन्ते। कामयमानाश्च ते मन्यन्ते उपागतं दुःखं विषसंपृक्तान्नमिव। तदुन्मूलनाय बहुशः प्रयतमाना अपि ते निराशासमुद्र इतस्ततो दन्द्रम्यमाणा एवावलोकयन्ते। तदित्थं भूपृष्ठेऽवतीर्णानां सर्वविधप्राणिजातेः ज्ञानक्रियार्थशक्तिविषये मूर्द्धन्य-भूतानां, पुरुषार्थाधिष्ठातृत्वेन पुरुषपदाभिधानानां, मनुवंशे समुत्पन्नानामेतादृशां मानवानामन-वरतमुद्योगेनापि कुतो न लेशतोऽपि सुखमाप्तिरिति सुलभतयैव प्रष्टुं शक्यते भवद्भिः। तस्यैतस्य प्रश्नस्यानेकान्यपि प्रत्युत्तराणि दीयन्तां नाम लोकैस्तथाप्यस्माकं त्वेष एव दृढनिश्चयः यत्सर्वविद्यानिधानस्य, ज्ञानविज्ञानप्रवर्त्तकस्य, सर्वेषां

*[विशिष्टोऽयं लेखो 'भारती' पत्रिकायां पूर्वं (वर्ष-१०, अङ्कः-४, माघमासः, वि.सं.२०१६) प्रकाशितोऽधुनाऽऽदर्शरूपेण कौस्तुभ-जयन्त्यवसरे पुनः प्रकाश्यते।] - सम्पादकः

श्रौतस्मार्त्तधर्म्माणां, कर्मणाञ्च मूलप्रभवस्य ब्रह्मणो निःश्वसितस्यात एवापौरुषेयाभिधस्य वेदपुरुषस्योपासनाविरह एवात्र प्रश्ने समाधानरूपेण परिस्फुरति नाममात्रेण श्रीमतामप्यश्रीमतां तत्रभवतां भवतामङ्ग-भक्तानां विदुषामग्रे-इति।

क्षमाशीलास्तत्र भवन्तो गीर्वाणवाणीभक्ताः। आतश्च क्षमयन्तु मे धृष्टताम्। व्याकरणसाहित्य-न्याय-ज्योतिष-छन्दः-कल्पादीनामङ्गानामेवाध्ययनाध्यापने बद्धपरिकरा अद्यतना भारतीया विद्वांसो वेदार्थपरिशीलने सर्वथा तटस्था एवेति सार्वजनीनम्।

**'योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम्।**
**स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः'।।**

– मनुः 2.168

इति हि राजर्षि-मनोरुक्तमपि साम्प्रतं सर्वात्मनान्वर्थतामगादित्यपि सार्वजनीनम्। अश्माखण(ण्डा)त्मकेऽभेद्यमूले वेदपुरुषे प्रतिष्ठितः सनातनधर्म्मप्रासादोऽद्य कम्पित इव भग्न इव भूत्वा भूयो भूयस्तान् वेदविरहितान् धर्मरक्षकान्, धर्म्मोपदेशकान्, महामहोपदेशकांश्च अभिशप्यतीत्यपि सार्वजनीनम्। ज्ञानलवदुर्विदग्धाः पाश्चात्यशिक्षोच्छिष्टभोगिनो भारतीया अद्य वेदप्रतिष्ठसनातनधर्ममेव सर्वविधोन्तेः परिपन्थिनमाकलयन्तीत्यपि सार्वजनीनम्। 'भारतीयाः केवलमात्मदर्शन एव निपुणाः। **'नित्यं विज्ञानमानन्दं ब्रह्म'** ति मुहुर्जल्पन्तोऽपि ते विज्ञानशून्याः, अत एव ते सर्वशून्याः' इत्येवंरूपेणास्ति पाश्चात्यानां यो घण्टाघोषस्तं प्रत्यहं शृण्वन्तोऽपि गजनिमीलिकापथानुसारिणो विद्वांसो न शृण्वन्ति। शृण्वन्तोऽपि तत्प्रतीकारोपायं न विचिन्वन्ति। विचिन्वाना अपि न पश्यन्ति प्रतीकारम्। तदित्थं वेदस्वाध्यायविमुखा अद्य विद्वांसोऽहर्निशं धर्ममणिमालां जपन्तोऽपि धर्म्मरक्षायामसमर्थमेवात्मानं भावयन्तो भोगीव मन्त्रौषधिरुद्धवीर्या एवासते-इति मुकुलितनयनैरेव भावनीयम्।

तस्मात्-

1-'वेद एव द्विजातीनां निःश्रेयसकरः परः'।

2- 'धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः' (मनुः २/१३)।

3-'वेदाद्धर्म्मो हि निर्बभौ' मनुः (५/४४)।

4-'वेदमेवाभ्यसेन्नित्यं' मनुः (१/४७)।

5-'वेदोऽखिलो धर्ममूलम्' मनुः (२/६)।

6-'सर्वं वेदात् प्रसिद्ध्यति' मनुः (१२/९७)।

सवानेतान् स्मार्त्तदिशानङ्गीकृत्य विषमेऽस्मिन् समुपस्थिते धर्मसंकटयुगे सर्वाधारभूतस्य वेदपुरुषस्यैवानन्यभावेनोपासना कार्या, तदेव –

**एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।**
**स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः॥**

– मनु. २/२०

इति प्रासवरस्य पिप्पलादा भविष्यामो वयमिति किञ्चिदिव मनोवेदनां निवेद्य- **'कथं वेदः सर्वविद्यानां निधानम्?'** इत्येतस्य प्रश्नस्य समाधौ यत्नः क्रियते।

वेदस्य सर्वविद्यानिधानत्वनिरूपणात् प्राक् वेदविद्या-शब्दयोर्निर्वचनमावश्यकम्। कोऽयं वेदपदार्थः?, केयं च सा विद्या?, इत्युत्तिष्ठते जिज्ञासा। तत्र तावत् प्रथमं वेदस्वरूप एव संक्षेपेण पुरत उपस्थाप्यते श्रीमतां वेदविदाम्। अस्ति सत्तार्थको विद धातुरन्यः, लाभार्थको विद धातुर्द्वितीयः, ज्ञानार्थको विदधातुश्च तृतीयः। विद् सत्तायां, विद् लृ लाभे, विद ज्ञाने–इति पाणिनिस्मरणात्। ततश्च विद्यते–इति वेदः, विन्दतीति वेदः, वेत्ति–इति वेदः–इति कृत्वा वेदशब्दस्य त्रीणि विवर्तानि भवन्ति। विद्यते–इति सत्ताभावमाह, विन्दति–इति रसभावमाह, वेत्ति–इति च ज्ञानभावमाह। सत्ताभावः सत्, रसभाव आनन्दः– **'रसो ह्येव सः, रसं ह्येवायं लब्ध्वा आनन्दी भवति'** इति श्रुतेः। ज्ञानं चित्। तदित्थं विद्यते-विन्दति–वेत्ति इति कृत्वा वेदस्य सच्चिदानन्दब्रह्मणा सह अभेदभावः साधूपपद्यते। यदिदं सच्चिदानन्दब्रह्म, सोऽयं वेदपदार्थः, इति निष्कृष्यते। अत एवेश्वरप्रजापतिर्वेदमूर्त्ति-रूपेणोपस्तूयते तत्र तत्र श्रुतिस्मृत्यादिषु। **'वेदैश्च सर्वैरहमेव वेद्यः'** इत्यादि स्मृत्या वेदोपाधिकृतस्य ब्रह्मण एव वेद्यत्वं निरूप्यते।

नामरूपकर्म्ममयानां विश्वपदार्थानां योऽयं प्रत्ययः, येयमुपलब्धिः, यदिदं ज्ञानं, तत्सर्वमपि वेदशब्देन वक्तुं युज्यते। घटोऽस्ति, पटोऽस्ति, मठोऽस्ति, पुरुषोऽस्ति, अश्वोऽस्ति इत्येवंरूपेण सामान्यतः प्रतीयमानो यः सत्ताभावः, अस्तित्वं वा, सा सा वेदस्यैका कला सोऽयं ऋग्वेदः। सत्तोपलब्धिरेव **ऋग्वेदः**। स एष प्रस्तावस्थानीयः। **घटोऽस्ति**–इति प्रथमं पर्व। **तमहं जानामि**– इति द्वितीयं पर्व। घटोऽस्ति, तस्माज्ज्ञायते। सद्वस्तुन एवोपलब्धिर्भवति। घटो नास्तीति नोपलभ्यते, न ज्ञायते। **'यदि स्यादुपलभ्येतेत्येवं यत्र प्रसज्यते'** इति हि कथाशास्त्रराद्धान्तः। तदिदं ज्ञानात्मकं द्वितीयं पर्व चेतनोपब्धिः। स एष उद्गीथस्थानीयो **यजुर्वेदः**। यस्य तत्त्वविशेषस्य अस्तित्वं, यस्य च ज्ञानं, सोऽयं रसात्मकस्तृप्तिलक्षणस्तृतीयोऽन्यभावः। स एष आनन्दः, आनन्दस्यैव सत्ता, आनन्दस्यैव ज्ञानम्। आनन्दमयाभ्यां सत्ताज्ञानाभ्यामेवात्मनि शान्तिभावोदयः। सैषानन्दोपलब्धिर्मुख्या। **'आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते, आनन्देन जातानि जीवन्ति, आनन्दं प्रयन्त्यभिसंविशन्ति'** इत्यादिश्रुतेस्तथैवाम्नातत्वात्। आनन्दप्राप्त्यनन्तर-मात्मा उपशान्तो भवति, विरमति। सैषानन्दमयी–अवसानभूमिरात्मनः। अवसानं **साम**। स एष आनन्दलक्षणोऽवसनाधिष्ठाता तृतीयः **सामवेदो निधनस्थानीयः**। तथा च प्रस्तावोद्गीथनिधनभावैः कृतरूपा सच्चिदानन्दोपलब्धिमयी सैषा वेदत्रयी एव सर्वत्र नामरूपकर्म्मभिर्व्याकृताऽवलोक्यतेऽवलोक-यद्भिः। नातोऽन्यत् किञ्चिदस्ति। **'सर्वं खल्विदं ब्रह्म'** – **'नित्यं विज्ञानमानन्दं ब्रह्म'** – **'सत्यं ज्ञानमनन्तं ब्रह्म'**–इति हि वेदमहर्षयः प्राहुः। तस्यैतस्य ब्रह्मणः सर्वता अस्तिलक्षणोपलब्धि-रूपवेदाधीनैवेति कृत्वोपदिषच्छ्रुतिराह –

**नैव वाचा न मनसा प्राप्तुं शक्यो न चक्षुषा।**
**अस्तीति ब्रुवतोऽन्यत्र कथं तदुपलभ्यते॥१॥**
**अस्तीत्येवोपलब्धव्यस्तत्त्वभावेन चोभयोः।**
**अस्तीत्येवोपलब्धस्य तत्त्वभावः प्रसीदति॥२॥**

– कठोपनिषद्, ९/१२, १३

तमेतमानन्दज्ञानगर्भितं, अस्तिभावात्मकं, वेदमूर्त्तिमीश्वरभावं मन्यमानास्तत्र श्रद्दधाना पुरुषश्रेष्ठा एव '**आस्तिकाः**' इति जोघुष्यन्ते। ये तु मूढधियः सर्वशून्यवादिनः, अतएव क्षणिकवादिनः, अतएव स्वलक्षणवादिनः अतएव च दुःखवादिनो लौकायतिका न तं वेदमयमस्तिब्रह्मोपासते, नापि तत्रास्तिब्रह्मणि श्रद्धां कुर्वन्ति, त एते नास्तिसारा यथाजाता नास्तिकशब्देन व्यवह्रियन्ते वैज्ञानिकैः।

**पूर्वोक्तस्य सच्चिदानन्दलक्षणस्य वेदस्य रसवेदः, वितानवेदः, छन्दोवेदः, अग्निवेदः, सोमवेदः, स्थितिमतिलक्षणो वेदः,** इत्येवमादयोऽनेके विवर्त्तवादा भवन्ति। तेषामेतेषां विवर्त्तभावानामीशोपनिषद्विज्ञानभाष्यादौ सुविशदं निरूपणमिति- अप्राकृतत्त्वादिहैव वेदस्वरूपनिर्वचनाद्विरम्यते। सैषा संक्षेपतो वेदनिरुक्तिः प्रदर्शिता द्रष्टव्या।*

निरस्तसमस्तोपाधिलक्षणस्य ब्रह्मण उपाधिदृष्ट्या प्राधान्येन वेद-विद्या-ब्रह्म-भावेषु परिणतिर्द्रष्टव्या। एकमेव ब्रह्माद्वितीयमुपाधिभेदेन वेदो भवति, विद्या भवति, ब्रह्म च। विशुद्धज्ञानमयं हि ब्रह्म। तस्यैतस्यैकस्यैव निरुपाधिकज्ञानस्य विषयावच्छेदेन **ब्रह्मभावे**, शब्दावच्छेदेन किंवा शब्दतन्मात्रावच्छेदेन **वेदभावे**, संस्कारावच्छेदेन च विद्याभावे परिणतिर्भवति । विषयावच्छिन्नं तदेव ज्ञानं ब्रह्मशब्देन, शब्दावच्छिन्नं तदेव ज्ञानं वेदशब्देन, विद्यासंस्कारावच्छिन्नं तदेव ज्ञानं विद्याशब्देन निगद्यते।

निष्कैवल्यं, निरञ्जनं, नित्याशान्तिगर्भित-नित्यशान्तं, नेति नेतीति निर्धौतं, अद्वयमखण्डं, शास्त्रानधिकृतं, अवाङ्मनसगोचरं, सजातीय-विजातीय-स्वगतभेदशून्यं, सर्वोपाधिविनिर्मुक्तं, दिग्देशकालतोऽनन्तं, स्वानुभवैकगम्यं, अनुपास्यं, विश्वातीतं, अनन्तमहेश्वरक्रोडीकृतरूपं, परात्पराख्यं तदिदं विशुद्धज्ञानमेव ब्रह्म। तथा चोक्तमभियुक्तैः-

**प्रत्यस्ताशेषभेदं यत् सत्तामात्रमगोचरम्।**
**वचसामात्मसंवेद्यं तज्ज्ञानं ब्रह्मसंज्ञितम् ॥१ ॥**

इति।।

तदिदमेकमेवात्मज्ञानं विश्वोपाधिदृष्ट्या विषयशब्दसंस्कारैः संस्कृतं सत् त्रेधा विभक्तं भवति सञ्चरक्रमे। तदेव तु प्रतिसञ्चरक्रमे विगतोपाधिकं सदेकमेवाद्वितीयं सम्पद्यते। तथा हि वाजसनेयिनः आहुः-

**'त्रयं वाऽइदं नाम-रूपं कर्म्म। तेषां नाम्नां वागिति, एतदेषामुक्थम् । अतो हि सर्वाणि नामान्युत्तिष्ठन्ति। एतदेषां साम। एतद्धि सर्वैर्नामभिः समम्। एतदेषां ब्रह्म। एतद्धि सर्वाणि नामानि बिभर्त्ति। ××××। तदेतत् त्रयं सदेकमयमात्मा। आत्मा उ एकः सन्नेतत् त्रयम्। तदेतदमृतं सत्येन च्छन्नम्। प्राणा वा अमृतं, नामरूपे सत्यम्। ताभ्यामयं प्राणश्छन्नः॥'**

– शत. १४ कां. ३ प्र. । ४ अ. । ४ बा.।

अयं भावः। **'यस्य यदुक्थं सत्-ब्रह्म सत्-साम स्यात् स तस्यात्मा'** इति ह्यात्मलक्षणं पश्यन्ति

---

*[विशिष्टोऽयं लेखो 'भारती' पत्रिकायां पूर्वं (वर्ष-१०, अङ्कः-५, फाल्गुनमासः, वि.सं.२०१६) प्रकाशितोऽधुनाऽऽदर्शरूपेण कौस्तुभ-जयन्त्यवसरे पुनः प्रकाश्यते।] – सम्पादकः

वैज्ञानिका:। उक्थमित्येतत् प्रभवस्थानं, ब्रह्म प्रतिष्ठास्थानम्, साम च परायणं स्थानम्। रूपाणां प्रभवस्थानं मन एव तत्तद्विषयाकाराकारितं भवति। मनस एव सर्वाणि रूपाण्युत्तिष्ठन्ति। अतश्च मन एव रूपाणामुक्थम्। मनस्येव सर्वाणि रूपाणि प्रतिष्ठितानीति मन एव सर्वेषां रूपाणां ब्रह्म, प्रतिष्ठास्थानम्। मनस्येवान्ततः सर्वाणि रूपाण्यपिहितानि भवन्तीति मन एव सर्वेषां रूपाणामवसानस्थानीयं साम। तदित्थं-उक्थ, ब्रह्म, सामस्थानीयं, किंवा प्रभवप्रतिष्ठापरायणस्थानीयं मन एव सर्वेषां रूपाणामात्मेति संसिद्धम्। एवमेव कर्म्मणामुक्थब्रह्मसामस्थानीयः प्राण एव सर्वेषां कर्मणामात्मा। नाम्नाञ्चोक्थब्रह्मसामस्थानीया वागेव सर्वेषां नाम्नामात्मेत्यवगन्तव्यम्। **'स वा एष आत्मा वाङ्मयः प्राणमयो मनोमयः'** इति हि बृहदारण्यकश्रुतिराह (बृ. उप. १/५/३)। मनस्तावत्- ज्ञानशक्तिघनं, प्राणोऽयं क्रिया शक्तिमयः, वाक् चैषार्थमयीति कृत्वा ज्ञानक्रियार्थमयः स एष आत्मा मनःप्राणवाङ्मूर्त्तिः सन् नाम-रूपकर्म्मभिर्विश्वरूपेण विश्वं भवति, त्रित्वपरित्यागाच्च स एव विशुद्धो भवति। विशुद्धरूपेणात्मा एकः, विश्वदृष्ट्या आत्मा उ एकः सन्नेतत् त्रयम्। विषयावच्छिन्नं ज्ञानं ब्रह्म, शब्दावच्छिन्नं ज्ञानं वेदः संस्कारावच्छिन्नं ज्ञानं विद्या-इति हि फलितोर्थः। एकस्यैव ज्ञानब्रह्मणस्त्रीणि रूपाणि ब्रह्मवेदः विद्या च। अतएव **'त्रयो वेदाः- त्रयं ब्रह्म'** – **'त्रयी विद्या'** इत्यमभिन्नरूपेणोपचरन्ति स्म महर्षयः।

विषयदर्शनेन, शब्दश्रवणेन, ज्ञानीयकल्पनया चान्तःकरणावच्छिन्ने प्रज्ञाप्राणमये सर्वेन्द्रियलक्षणे वासना-भावनाविधावपूर्वी संस्कारावुत्पद्येते। सोऽयं संस्कारपुञ्ज एव सृष्टेरुद्बोधकः सन् तत्तद्विषयप्रवृत्तिहेतुरिति हि दार्शनिकः समयः। स्वात्मस्थितसंस्कारेभ्य एव ते ते लौकिकव्यवहारा याथातथ्येन संगच्छन्ते। यद्यात्मनि संस्काराणामात्यन्तिकोऽभावः स्यात्तदा विशुद्धोऽयमात्मा मुक्तः स्यात्, न कञ्चन परिपश्येत्। यावद्ध्यात्मनि संस्कारास्तावदेव संसारः। एवमेव प्रत्यक्षदृष्टं यदिदं पञ्चीकृतभूतमयं पाञ्चभौतिकं महाविश्वं, तदिदं ब्रह्मणः संस्कारात्मकमेव विवर्त्तमिति जीवेश्वरयोः साम्यं द्रष्टव्यम्। **'पुरुषो वै प्रजापतेर्नेदिष्ठं'** इत्याहुः।

उक्तं पूर्वं-यत् संस्कारावच्छिन्नं ब्रह्म एव विद्येति। ततश्च यत् किञ्च द्वयं परिपश्यामस्तत् सर्वं ब्रह्मणो विद्यात्मकं विवर्तमेवेति निःसंदिग्धं वक्तुं शक्यते। सैषा वेदब्रह्ममयी संस्कारात्मिका विश्वरूपा महाविद्यैवोपनिषत्सु **'अपरा विद्ये'**ति नाम्ना प्रसिद्धा। विशुद्धा तु निरुपाधिका परा विद्या अन्या, यया तदक्षरमधिगम्यते। गीतादर्शने अव्ययनाम्ना प्रसिद्धस्य, तैत्तिरीयोपनिषदि च कोशब्रह्मनाम्ना निरूपितस्य सच्चिदानन्दब्रह्मणो द्वे-एव विद्ये वेदितव्ये भवतः। अव्ययपुरुषः पुरुषः। तस्य परा प्रकृतिरक्षरः पुरुषः, अपरा प्रकृतिस्तु क्षरः पुरुषः। विश्वाधिष्ठाता क्षरः पुरुषः जीवसृष्टेरधिष्ठाता अक्षरः पुरुषः। अव्ययस्तु जन्ममृत्युचक्राभ्यामसंस्पृष्टः सन्नजो विश्वातीतः। तथा चाह स्मृतिः-

**भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च।**
**अहङ्कार, इतीयं मे भिन्ना प्रकृतिरष्टधा ॥१ ॥**
**अपरेयम्** ..............................................

**..............इतस्त्वन्यां प्रकृतिं विद्धि मे पराम्।**
**जीवभूतां महाबाहो! ययेदं धार्य्यते जगत्॥२॥**
**एतद्योनीनि भूतानि सर्वाणीत्युपधारय।**
**अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा॥३॥**

– गीता ७/४,५,६

ब्रह्मेन्द्रविष्ण्वग्निसोमैः कृतरूपोऽयं पञ्चकलोऽक्षरः पुरुषः पराप्रकृतिर्नाम। प्राणाव्वागन्नादात्रेभ्यः कृतरूपोऽयं पञ्चकलः क्षरः पुरुषोऽपरा प्रकृतिर्नाम। ताभ्यां नित्ययुक्तः, आनन्दविज्ञानमनःप्राणवाग्भिः कृतरूपः पञ्चकलोऽयमव्ययः पुरुषः पुरुषो नाम। असीमस्तु परात्परोऽर्द्धमात्रिकत्त्वेन सर्वमात्रिक इति, स एव त्रिपुरुषः पुरुषः 'षोडशी पुरुष' नाम्ना प्रसिद्धो वेदे। तथा हि यजुःश्रुतिः–

**प्रजापते! न त्वदेतान्यन्यो**
**विश्वा रूपाणि परि ता बभूव।**
**यत्कामास्ते जुहुमस्तन्नो अस्तु**
**वयं स्याम पतयो रयीणाम्॥१॥**

– यजुः संहिता २३/६५

**यस्मान्न जातः परो अन्यो अस्ति**
**य आविवेश भुवनानि विश्वा।**
**प्रजापतिः प्रजया संरराणस्त्रीणि**
**ज्योतींषि सचते स षोडशी॥२॥**

– यजुः सं. ८/३६

परापरप्रकृत्योरधिष्ठाता स एष अव्ययपुरुषोऽक्षरकृतभेदनिबन्धनेन पञ्चकलोऽपि परमार्थतो निष्कल एवेत्यस्याव्ययत्त्वं साधूपपद्यते। तथा चोक्तं गोपथब्राह्मणे–

**सदृशं त्रिषु लिंगेषु सर्वासु च विभक्तिषु।**
**वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्।।**

– गोपथब्राह्मणे पू. १/२६

आनन्दः प्रथमा कला, विज्ञानं द्वितीया, मनस्तृतीया, प्राणश्चतुर्थी, वाक् च पञ्चमीत्येतासु पञ्चसु कलासु मनःप्राणवाचां संघातः सत्तेति कृत्वा तिसृणां कलानां सम्भूयैका कला सत्तात्मिका। विज्ञानं चिदाख्या द्वितीया, आनन्दश्च तृतीयेति पञ्चकलात्मकोऽयमव्ययः प्रकारान्तरेण सच्चिदानन्दभेदेन त्रिकल एव निष्पद्यते। सोऽयं मनःप्रधानः पञ्चकलस्त्रिकलो वाव्ययपुरुषो मुमुक्षाबलप्रधानया अक्षरविद्यया स्वानन्दविज्ञानभागाभ्यां प्रसन्नो भूत्वा ग्रन्थिविमोकद्वारा मुक्तिसाक्षी भवति। सिसृक्षाबलप्रधानया च क्षरविद्यया तु स एव प्राणवाग्भागाभ्यां प्रसन्नो भूत्वा ग्रन्थिबन्धनद्वारा सृष्टिसाक्षी भवति। भूतयोनिः क्षरभावो विश्वम्, कूटस्थो भूतभावनोऽक्षरपुरुषो विश्वसेतुः। भूतेश्वरोऽव्ययश्च विश्वालम्बनं सर्वेषामात्मा। तथा चाहरागमे स एवाव्ययपुरुषोऽव्यक्तमक्षरं व्यक्तक्षरभावे परिणमय्य सर्वमिदं सृजति, यदिदं किञ्च। रात्र्यागमे तु व्यक्तक्षरभावमव्यक्ताक्षरभावे परिणमय्य सर्वमिदं संहरति, किञ्च। तथा चाह पुरुषावतारो भगवान् श्रीकृष्णः –

**अव्यक्ताव्यक्तयः सर्वाः प्रभवन्त्यहरागमे।**
**रात्र्यागमे प्रलीयन्ते तत्रैवाव्यक्तसंज्ञके।।**

– गीता ८/१८ –

[विशिष्टोऽयं लेखो 'भारती' पत्रिकायां पूर्वं (वर्ष–१०, अङ्कः–६, चैत्रमासः, वि.सं.२०१७) प्रकाशितोऽधुनाऽऽदर्शरूपेण कौस्तुभ–जयन्त्यवसरे पुनः प्रकाश्यते।] – सम्पादकः

(क्रमशः)

# पृथुवंशम्

(दशमस्सर्गः)

❑ कविसार्वभौम अभिराजराजेन्द्रमिश्रः
पद्मश्रीः

*अथाश्वमेधेऽवसिते शताङ्के धात्राशिषाऽपूर्णपदेऽपि पूर्णः।*
*शतक्रतुर्भीम उदीर्णसत्त्वः पृथुर्बभासे ह्युसदां कृपार्द्रः।।।१।।*

*तं नन्दितुं तूर्णमुपागतास्ते सनत्कुमारादिकनित्यसिद्धाः।*
*मधुर्निदाघो जलदश्च शीतं यथाऽब्दमृद्धं प्रविधातुकामाः।।२।।*

*सत्यं तपो यज्ञ उदारदानं पुष्णन्ति धर्मं चतुरङ्गभूतम्।*
*शाखाश्छदा पुष्पफलादि यद्वत् पुष्णन्ति वृक्षं च मिथोमिलित्वा।।३।।*

*वपुर्मनो बुद्धिरथो चिदात्मा यथा हि मर्त्यं भुवि जीवयन्ति।*
*यथा च तुर्याः पुरुषार्थसंघाः समग्रमायुर्विदधत्यनर्घम्।।४।।*

*पृथक्तनुं देशिकवृन्दमर्घ्यं समागतं वीक्ष्य दधाव भूपः।*
*अर्घ्यैश्च पाद्यैर्महितासनैश्च ननन्द तानात्मसमर्पणैश्च।।५।।*

*सनत्कुमारस्तमुवाच भूपं मान्यो वरिष्ठोऽथ कनिष्ठकोऽपि।*
*क्रमेण तुर्यापि कनिष्ठिकाऽसौ आद्यैव यद्वद् गणनाप्रसङ्गे।।६।।*

*प्रवर्धते वैन्य! भवान् हि दिष्ट्या विष्णुं समाराध्य मखे समक्षम्।*
*क ईदृशोऽभूत्त्वपरस्त्रिलोक्यां नाऽहं कमप्येकमथ स्मरामि।।७।।*

*इन्द्रोऽपि नो यस्य मखाश्वमिद्धं पाखण्डभृच्चापि शशाक हर्तुम्।*
*विधेः कृपातस्त्वदिषोनं लक्ष्यं जातस्तदेवास्ति शतक्रतुत्वम्।।८।।*

*स त्वं पृथो सम्प्रति वीतचिन्तो महारथेनात्मसुतेन धन्यः।*
*राज्ञ्याऽर्चिषा चापि विवृद्धभाग्यः प्रजाजनानामसुरेव जातः।।९।।*

*त्वामादिराजं धरणीसुबन्धुं वयं कुमारा अभिनन्दयामः।*
*भूयाः कृती त्वं पृथिवीसुकृत्यैः सा च त्वया स्यात्कृतिनी च वत्स।।१०।।*

*जानाम्यहं त्वां महतां वरेण्यं पृथो! महाभागवतं सुसत्त्वम्।*
*असच्च सच्चेदुभयाऽश्रयं त्वं जानासि विष्णुं जगदेकमूलम्।।११।।*

*त्वन्नैष्ठिकी ब्रह्मणि सा रतिर्भो ददाह पञ्चात्मकजीवकोशम्।*
*दग्धाशयो मुक्तजगत्प्रपञ्चस्त्वं सात्त्वतानां धुरि संस्थितोऽसि।।१२।।*

भिन्नावुभौ जागरसुप्तिबोधौ पार्थक्यविन्नो भजते प्रमोहम्।
जगज्जगत्कर्तुरपीह भेदं जानन् पृथो! त्वं परमार्थतो ज्ञः।।१३।।

मायामयस्य क्षणभङ्गुरत्वं संसारचक्रस्य विदन्नमुष्य।
सत्याशयस्त्वं यदधोक्षजेऽसि भक्त्या प्रपन्नस्तदहोऽभिनन्द्यम्।।१४।।

चितिश्च बुद्धेर्हरति प्रकामं निध्यायतां मानसमिन्द्रियार्थान्।
स्तम्बो यथा तोयततिं निपानात् ततो मनश्चैव हि रक्षणीयम्।।१५।।

अनुस्मृतिश्चित्तविनाशिनीसा स्मृतिक्षये ज्ञानमुपैति नाशम्।
निह्नूयते तेन पृथो! निजात्माऽप्यपह्नवश्चात्मन आधिमूलम्।।१६।।

प्रेयस्त्वमेतद्यदि जायतेऽद्धा व्युपेक्ष्य चात्मानमथोऽपरस्य।
व्यतिक्रमोऽयं परमार्थसिद्धेर्नातः परा कापि विपन्नराणाम्।।१७।।

तमस्तितीर्षुर्गहनं न कुर्यात् सङ्गं पृथो! तच्च विघातकं स्यात्।
न तादृशस्त्वं धुरि सात्त्वतानां विद्मो वयं भूपमणे! तपःस्थाः।।१८।।

आत्यन्तिकं मोक्षपथं श्रयाणस्त्वं वीतचिन्तो गतभीश्च राजन्!
त्रैवर्गिकाः सन्ति भवादृशा नो कृतान्ततङ्कान्नितरां विभीताः।।१९।।

ये वा तितीर्षन्ति प्लवानभिज्ञाः षड्वर्गनक्रं भवसिन्धुमज्ञाः।
त्वमुत्तरप्रीतमना भवाब्धिं कृतोडुपं विष्णुपदं नु तस्मात्।।२०।।

भवेत्तु भद्रं तव वत्स वैन्य! यामो वयं सम्प्रति कौत्रचित्काः।
पृथो! निबध्नाति गृहं गृहस्थं यायावरं नो तदवेहि सत्यम्।।२१।।

इतीरयित्वैव तुरीयबन्धौ सम्प्रस्थिते भूपमणेस्सदैन्यम्।
पदेषु शीर्षं प्रणिधाय नम्रां वाचं मुखाब्जात्समुदाजहार।।२२।।

प्रभो! दयालो! मदिमां शृणुध्वं नोऽश्रद्धया वच्मि यदद्य वाचम्।
नार्हाम्यहं शासनमाधिपत्यं नूनं तदर्हन्ति भवन्त एव।।२३।।

भुङ्क्ते यतो ब्राह्मण आत्मनीनं स्वमेव दत्ते वसतेऽन्यतो नो।
अनुग्रहैस्तस्य हि भुञ्जतेऽन्ये क्षत्रादयोऽकिञ्चनकारिणो ये।।२४।।

तत्राथ! राज्यञ्च चमूपतित्वं दण्डञ्च कोशञ्च महीं बलञ्च।
दारासुतप्राणगृहान् प्रपत्त्या सर्वं भवद्भ्यो विनिवेदयेऽहम्।।२५।।

सुनेत्रनीरं निपपात वैन्यो विलापयन् लोकमपि त्रपार्तः।
द्रुतं समुत्थाप्य नृपं कुमारा अन्तर्दधुश्चाप्स्विव बुद्बुदास्ते।।२६।।

प्रजाजनानां पुरतोऽप्युभौ तौ जातौ विनिश्चेतुमहो न्वशक्यौ।
तयोर्नु को युक्ततरश्चिदात्मा कः पुष्करो पद्मपलाशकल्पः।।२७।।

कुमारेषु यातेषु भूपालमौलिः प्रजां स्वामवादीत्प्रतुष्यद्वचोभिः।
भवद्भिर्हि जिज्ञासुभिर्मे वचांसि ध्रुवं रक्षितव्यानि कर्णेष्वलम्भोः।।२८।।

अहं दण्डधृक् तेऽस्मि शास्ता नियुक्तो भवद्वृत्तिदो रक्षिता तुष्टिदाता।
अहो भूरिभाग्यं नु तन्मे, प्रजानां यतो बन्धुकृत्यं ममैवास्त्यधीनम्।।२९।।

करानुद्धरंस्त्वेव शिक्षेत धर्मं, प्रजानां शर्म हन्त भुङ्क्ते स भूपः।
जहाति स्वयं किन्तु नैजं भगं सः ततो वच्मि भद्रा! भजध्वं परेशम्।।३०।।

यदङ्घ्रिद्वये लीनलीनो हि मर्त्यः पुनर्जन्मचिन्ताविमुक्तः पृणक्ति।
स एवास्ति मे तेऽपि नित्यं शरण्यः प्रियोऽधोक्षजो सृष्टिसर्वस्वभूतः।।३१।।

यथा स्वप्नसन्दर्शनेऽवाप्तसौख्यान्यहो जागरायां विलीयन्त एव।
तथा जागरालब्धसौख्यप्रवाहोऽप्यलं क्षीयते प्राणशून्ये हि जीवे।।३२।।

अदृष्टे हि लोके स यात्येकलो वा निजोपार्जितं भोगजातं विहाय।
ततो भद्र! विष्णुं भज स्वाधिपं त्वं यथा तस्य भक्त्या स लोकोऽभिनन्देत्।।३३।।

भजे ब्रह्म तन्निर्गुणं निर्विकारं स्वलीलामयं सद्गुणञ्चाप्यमोघम्।
भवन्तोऽपि तं देवदेवं भजध्वं यथा जीवनं स्यान्महैश्वर्यमूलम्।।३४।।

स्वयम्भूसुतोऽसौ मनुर्वंशकेतुस्स उत्तानपादो ध्रुवोऽसौ वरेण्यः।
अहो कीदृशाः पूर्वजाता नु मे ते यदीये कुलेऽस्म्युद्गतः पुण्यकर्मा।।३५।।

कुलस्यापरा हन्त शाखा मदीयाऽस्ति प्रैयव्रती चार्षभी भारती वा।
बभौ विश्वशास्ता विजेताऽथ नेता प्रचेता हि सर्वो धराधारणाय।।३६।।

पृथुस्तेष्वहं वेनपुत्रोऽथ वैन्यः सुनीथासुतश्चार्पितेजः प्रसूतिः।
कुमारोपदिष्टोऽत्रिणा याजितोऽथ दिष्ट्यैव जानार्दनीं भक्तिमाप्तः।।३७।।

इति ब्रुवाणं नृपतिं प्रजास्ता द्विजातयस्सैन्यचरा अमात्याः।
वनौकसो भैक्ष्यचराऽध्वनीना ससाधुवादं नितरां ननन्दुः।।३८।।

महर्षयो विग्रहिणो हि वेदास्तपस्विनश्चात्ममयूखदीप्ताः।
शुभाङ्कुरैस्ते जयजीवशब्दैरवीवृधन् तं मनुवंशकेतुम्।।३९।।

उवाच कोऽप्यन्यतमो नु तेषां पृथो! महाराज! उदारकीर्ते!
त्वया हि धन्या निखिला धरित्री पृथोरियं या पृथिवी हि जाता।।४०।।

प्रभोऽखिलोकं शतलक्षजीवा जीवन्त्यहो स्वार्थकृते न भूम्राम्।
एकस्त्वमेवाऽतनुतीर्णतन्द्रः ताम्यस्यहो सौख्यकृते प्रजानाम्।।४१।।

पुत्रेण लोकाञ्जयते हि मर्त्यः सोक्तिश्श्रुतेः सत्यवती विभाति।
यद् ब्रह्मदण्डैर्निहतो हि वेनस्तमोऽतरत्त्वादृशसूनुनैव।।४२।।

प्रह्लादपुण्यैः कशिपुस्ततार यो विष्णुनिन्दारसिको दुरात्मा।
त्वमेव राजन्! पितुरुत्तमर्णः कस्त्वादृशोऽन्यः पितृदेव आस्ते??४३।।

सञ्जीव पृथ्वीं ननु शाश्वतीस्त्वं समाः प्रजानाथ! पृथो! सदीया।
भक्तिर्दृढा श्रीपतिपादपद्मे वयञ्च धन्या भवता नृपेण।।४४।।

इयं धरा कर्गदपत्रकल्पा चाराचरी सृष्टिरियञ्च वैन्य!
उट्टङ्किता कीर्तिकथा त्वदीया विभाति मार्तण्डमृगाङ्कसाक्ष्या।।४५।।

उभौ च पार्श्वौ सुयशः कथायाः नभश्च पातालमुपर्यधोऽधः।
पाथोधिनीराणि मसी च कृष्णाऽप्यरण्यवृक्षा ननु तूलिकाभाः।।४६।।

प्रजाऽखिला गानपदे नियुक्ता तस्याः कथायाः पशवो विहङ्गाः।
जलेचराद्या ननु मोदमाना नृत्ते रताः विस्मृतकार्यजाताः।।४७।।

यदुषसि समुदीते सौविदल्लाभभानुः विहगकलरवैस्ते सम्पठन् नाट्यनान्दीम्।
विगमयति तदेवाऽखण्डब्रह्माण्डरङ्गे नवरसरुचिरन्ते नायकत्वं प्रशान्तम्।।४८।।

त्वमसि पृथुधरित्री क्षेमयोगावसक्तः करधृतकुलिशेन्द्रश्चापरोऽत्यादितेयः।
त्वयि सति वसुधायां नाऽतिमान्यामहे भो सुरवसतिजसौख्यं स्वर्गमोक्षादिकाङ्क्षाम्।।४९।।

विविधनदनदीनां मारवीणां वनीनां द्विजमहितगवीनां सामगीतिश्रुतीनाम्।
गुरुकुलपरिधीनां छान्दसव्याहृतीनां नियतनिलयभूता भूरियं स्वर्गजेत्री।।५०।।

द्विजानामाशिषा सिक्तस्सुधयेव निशापतिः।
प्रणम्यान्तःपुरं यातस्सावरोधजनो नृपः।।५१।।!!

।। इति कविसार्वभौमाऽभिराजराजेन्द्रमिश्रप्रणीते – पृथुवंशमहाकाव्ये
**प्रजानुरञ्जनं** नाम दशमः सर्गः।।

# अलङ्कारमण्डने काव्यप्रयोजनम्

❑ डॉ. सत्यव्रतवर्मा
राष्ट्रपति सम्मानित:

श्रीमालकुलावतंस आर्हतधर्मानुगो मण्डनो मण्डपदुर्गे (मध्यप्रदेशान्तर्गते माण्डू इत्याख्ये प्राचीननगरे) होशंगगोरी अपरनाम अलपखान इत्यभिधस्य सुल्तानस्य (१४०५-३२) प्रधानमन्त्रि-पदमारुरोह मन्त्रकौशलेन कर्मपाटवेन च परं प्रकर्षमियाय। श्रीसरस्वत्योर् अनितरसाधारण-पात्रभूतोऽसौ प्राज्यम् अमात्यभारं वहन्नपि सुरवाचाऽदभ्रं साहित्यं प्रणिनायेति विदामपि न बहु विदितम्। तस्य भारती मृदुनि काव्यवस्तुनि कर्कशे शास्त्रे च समम् अलीलायत। शक्त्या व्युत्पत्त्या चाढ्यो मण्डनस् तद् विधाद्वयं गुण्याभि: स्वकृतिभि: समेधयत। संयोगात् तस्य सर्वा: कृतयस्तन्नाम स्वाङ्गत्वेन धारयन्ति। वहन्ति।

महाभारतीयं वृत्तमुपजीव्य विरचितं तस्य काव्यमण्डनम् इतिवृत्तविनियोगेन विषयान्तर-बाहुल्येन गाढबन्धेन च माघप्रवर्तितां काव्यधारां पुष्णाति। चम्पूमण्डनम् आर्हतशास्त्रे प्रथितं नेमिनाथ-राजीमत्योर् उदात्तं वृत्तं चम्पूप्राणभूतेन गद्यपद्यविधिना प्रणीय लोकं भोगाद् विमुखीकर्तुं प्रवृत्तम्। कादम्बरीमण्डनं बाणकृतायाः कादम्बर्या बृहत्कथां ५७४ पद्यै: (अनुष्टुब्भि:) संक्षिप्य चमत्करोति सचेतसां चेतांसि। शृङ्गारमण्डनं भर्तृहरिप्रकान्तां शृङ्गारशतकपद्धतिं तद्रीत्यैव प्रवर्धयति। तस्य सारस्वतव्याकरणस्य भाष्यभूतं सारस्वतमण्डनं साम्प्रतमपि प्राकाश्यं नाभजत।

अलङ्कारमण्डनं[1] प्रधानमन्त्रिणो मण्डनस्य काव्यशास्त्रीया कृतिरस्तीति तन्नाम्नैव स्फुटतामेति। आमण्डनकालं काव्यशास्त्रस्य प्रायेण सर्वे सिद्धान्ता: परिपाकं प्राप्ता: प्रकर्षं चाधिरूढा:। पण्डित-राजजगन्नाथकृतो रसगंगाधर एव तादृश: प्रथितो ग्रन्थोऽस्ति, यो मण्डनादवरोऽस्ति-तस्मादनन्तरं विरचित:। इत्थं मण्डन: पञ्चदशशताब्दव्यापिनीं समृद्धां काव्यशास्त्रपरम्परां दायत्वेनाऽवाप। स एनां सम्यग् उपजीव्यैव अलङ्कारमण्डनं प्रणेतुं प्रावर्तत। परं मम्मट इव विश्वनाथवद् वा सर्वांगीणं प्रौढं वा शास्त्रं रचयितुं नासीत्तस्य मनीषा। तयोरधमर्णतां गतेऽलङ्कारमण्डने न शब्दशक्तिविमर्शोऽस्ति, न च ध्वनिसिद्धान्तनिरूपणं यत् काव्यप्रकाशे परमं प्रकर्षं प्रयातम्। न चेदं विचित्रम्।

अलङ्कारमण्डनादस्य कर्तुर्याच्छविराविर्भवति सा निस्संशयम् आलंकारिकाचार्यस्य छविरस्ति यो भामहादिवद् अलंकारं काव्यस्य सर्वस्वं मन्यमानस् तत्प्रतिपादनेनैव ग्रन्थस्यान्वर्थताम् अङ्गीकरोति। कामं स दण्डिगृहीतां पद्यामनुसरन् रसं रसवदलंकारे नान्तर्न्यवेशयन् न च रसविमर्शात् सर्वात्मना विरत: परं तत्कृतं रसनिरूपणं लघीयस्त्वरितं चास्ति, यद्यपि स कुत्रचिद् अलंकाराद् रसस्य श्रेष्ठत्वं साधयितुं प्रयत्नवान् दृश्यते[2]। तस्य काव्यभेद-रीति-विमर्शोऽपि गाम्भीर्याद् अपेत:। सालंकारगुणा सार्थाऽदोषा वाक् काव्यमुच्यते[3] इति काव्यलक्षणे

विशेषणत्वेन गृहीतानाम् अलंकार-दोष-गुणानां व्यासेन निरूपणमेव तस्येष्टं प्रतीयते। यत्सत्यं बालानामुपकारायैव मण्डनोऽलंकारमण्डनं प्राणयत्[४]। तत्प्रयोजनं चानेन साधु साधितम्।

दण्डीव मण्डनोऽपि स्वीये ग्रन्थे काव्यप्रयोजनस्य प्रत्यक्षं प्रतिपादनं नाकार्षीत्। काव्यप्रशंसायां काव्यं यशःप्रमोदयोरुत्सं[५] ब्रुवाणो मण्डनो भङ्ग्या यशसम् आनन्दं च काव्यप्रयोजनत्वेनाऽभ्युपागच्छत्। स्वीचकार। काव्यशास्त्रपरम्परायां भामहः प्रथम आचार्यो बभूव यः कीर्तिं प्रीतिं च काव्यप्रयोजनतया जग्राह। स एव प्रथमतया धर्मार्थकाममोक्षाख्यं चतुर्वर्गं काव्यप्रेरकं मेने[६]। रुद्रट-कुन्तक-विश्वनाथादयोऽप्यत्र भामहान्न विप्रतिपद्यन्ते। तेऽपि चतुर्वर्गं काव्यप्रयोजनं मन्यमाना भामहमतमनुसरन्ति। विश्वनाथस्तु काव्येन वर्गचतुष्टयलब्धेर्विधिमपि सप्रयत्नं व्याख्यातवान्, पर न स सन्तोषावहो न च सुग्राह्यः। विदितमिदं समेषां न सर्वं काव्यजातं चतुर्वर्गप्राप्तेः साधनं भवति, न च भवितुमर्हति तस्य (काव्यनिवहस्य) गुणागुणभेदात्। गुणोपेता=उदात्ता काव्यकृतयः (साधुकाव्यनिबन्धनम्-भामहः) एव चतुर्वर्गं साधयितुं प्रभवन्ति, नेतराः। आदर्शोन्मुखं नूनं भामहदर्शनम्। तद्धि काव्यं प्रशस्यम् अभिनन्द्यं च यत् प्रेयसा सार्धं श्रेयसः सिद्धेरपि कारणतां याति[८]।

नाट्यसाध्येषु यशश्चर्चा भरतनाट्यशास्त्रे श्रूयते[९], परं काव्यप्रयोजनस्याधारत्वेन कीर्तिप्रीती प्रथमतो भामहेनैवोपात्ते[१०]। अनया दृशा स निस्संशयं पथिकृद् इति वक्तुं शक्यते। काव्यादर्शावसाने दण्डी भंग्या 'रमणं' (आनन्दं) 'कीर्तिं' (यशसं) चेति काव्यस्य प्रयोजनद्वयम् अभाणीत् – 'धन्यो युवेव रमते लभते च कीर्तिम्' (काव्यादर्शे, ३.१८७)। दण्डिनेदं भामहमुपजीव्योदीरितं, नात्र संशयः। काव्यादर्शे प्रथमपरिच्छेदान्तेऽपि ग्रन्थकृता कीर्तेरुल्लेखः काव्यप्रयोजनतयाऽकारि- 'सरस्वती श्रमादुपास्या खलु कीर्तिमीप्सुभिः' (१.१०५)। **वामनोऽपि** द्विविधमिदं काव्यप्रयोजनम् अभ्युपागच्छत्। परं प्रीतिः काव्यस्य दृष्टं प्रयोजनं भवति कीर्तिश्चादृष्टमिति किमपि नव्यं तत्र विलोक्यते- 'काव्यं सद् दृष्टादृष्टार्थं प्रीतिकीर्तिहेतुत्वात्'[११]। एष तस्याभिप्रायः- काव्यरचनया आनन्दो जीवनकाले कविना लभ्यते यशश्च मरणानन्तरम्। विचित्रमिदं प्रतिभाति। सत्काव्येन कविर्जीवनकालेऽपि भूयसीं कीर्तिं प्राप्तुं पारयति। तदर्थं स मरणं किं प्रतीक्षेत? यश इवानन्दोऽपि कवेरेव लभ्य इत्यत्रान्तर्निहितो ध्वनिरपि नानवद्यः।

पूर्वोपात्तेषु काव्यप्रयोजनेषु रुद्रटो यशो जग्राह कुन्तकश्चानन्दम् (अन्तश्चमत्कारम्)। कुन्तकोऽन्तश्चमत्कारं (आनन्दं) चतुर्वर्गादपि श्रेष्ठं मत्वा तस्मा अनितरसाधारणं गौरवमर्पयति। चतुर्वर्गः काव्यप्रयोजनतया रुद्रटेनाप्यङ्गीकृत इति न परोक्षं विदुषाम्। व्यवहारज्ञानं काव्यस्य तृतीयं प्रयोजनं मन्यमानः कुन्तकः किमपि नवमत्र प्रवर्तयति, मम्मटस्य बृहत्काव्यसूच्या भूमिकां च निर्माति[१२]।

पूर्वपरम्परां समाहृत्य मम्मटः काव्यस्य प्रयोजनषट्कं जग्राह। यशः परनिर्वृती व्यतिरिच्य तस्मिन् षट्के व्यवहारज्ञानम् अमङ्गलवारणं धनप्राप्तिः सरसरीत्या सदसदुपदेशश्च गण्यन्ते[१३]।

व्यवहारज्ञानं निस्संशयं कुन्तकाद् गृहीतम्। इतराणि त्रीण्यपि काव्यस्य स्थूलानि प्रयोजनानि भवन्ति। कविः कामं काव्यप्रणयेन धनं लभेत प्रयोजनत्वेनास्य ग्रहणम् उदात्तं कविकर्माऽधरीकरोति। व्यवहारज्ञानं वा अमङ्गलविनाशो वा काव्यस्याऽमोघसाधनत्वेन ग्रहीतुं न शक्यते।'न काव्यं तदैकान्तिको हेतुः' इति यद् हेमचन्द्र आह, अनवद्यं तद्वचः। स मम्मटाभिमतेषु षट्सु प्रयोजनेषु त्रीण्येव प्रयोजनानि स्वीचकार- 'काव्यमानन्दाय यशसे कान्तातुल्योपदेशाय च'[१४]। वेदो वा शास्त्रं वोपदेशस्य मुख्यं साधनं भवति परं सरसोपदेशस्य काव्यप्रयोजनत्वेन ग्रहणे विप्रपत्तिर्न स्यात्। साम्प्रतिका अपि प्रयोजनविहीनां कलामपार्थां मन्यन्ते सा स्वतः कियत्यप्यानन्दप्रदा भवेत्। परं हेमचन्द्रदृशा परीक्ष्यमाणे कान्तासम्मितोपदेशो यशश्चापि काव्यप्रयोजनत्वेनाभ्युपेतुं न शक्येते। उपदेशप्राप्तेर् यशोलब्धेश्चेतराण्यपि साधनानि विद्यन्ते। काव्येनेव शास्त्रेणापि स्थिरं यशोऽधिगम्यत इति सर्वेषां विदितम्। पाणिनेः शङ्करस्य वा यशः कालिदासस्य यशसो मनागपि न हीयते।

'प्रवर्तमानेऽस्मिन् न्याये' 'परनिर्वृतिर्' एव अवशिष्यते या काव्यप्रयोजनतया तिष्ठति। शुद्धोऽवदात आनन्द एव काव्यस्यैकान्तिकं प्रयोजनमस्ति। अनेनैव मम्मट एनं सकलप्रयोजनमौलिभूतम् आह। आनन्द एव काव्यस्यैकमात्रं प्रयोजनं व्यवस्थीयते परं परम्परया यशोऽपि तथैव मुख्यत्वेन गृह्यते। आनन्दं मौलिभूतं मन्यमानोऽपि मम्मट आदौ यशसं प्राह। कविदृष्ट्या कीर्तिः प्राधान्यं भजते। एनां पद्धतिमभ्युपगम्य मण्डनेनापि द्विविधं काव्यप्रयोजनमुपात्तम्। यशःप्रमोदौ काव्यस्य साध्यत्वेन तत्र विद्येते। तयोर्यशः कविनिष्ठमस्ति, आनन्दश्च कविनिष्ठः पाठकनिष्ठश्च। कविर्हि काव्यरचयिताऽप्यस्ति काव्यरसयिताऽपि।

- ७/३४, पुरानी आबादी, नामदेव फ्लोर मिल के पास, श्रीगंगानगर-३३५००१

सन्दर्भाः-

१. मण्डनग्रन्थसङ्ग्रहः, सन् १९१८

२. सालंकाराऽपि नो भाति तरुणी विभ्रमैर्विना।
तथा रसैर्विना काव्यमतस्तान् ब्रूमहेऽधुना।।
अलंकारमण्डनम्, ४.१

३. तत्रैव, १.९

४. परोपकरणार्थाय कुर्वेऽलंकारमण्डनम्। तत्रैव १.८

५. काव्याब्धिगर्भाच्छरदभ्रशुभ्रो विजृम्भते चारुयशः शशांकः। तत्रैव, १.४

नवेन काव्येन सतां प्रमोदः। तत्रैव, १.७

न काव्यादपरं सुखाय। तत्रैव, १.३

६. धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च।
प्रीतिं करोति कीर्तिं च साधुकाव्यनिषेवणम्।। काव्यालंकारः, १

७. साहित्यदर्पणः, १/२ वृत्तिः

८. देवेन्द्रनाथशर्मा (सम्पादकः), काव्यालंकार, भूमिका, पृ. ९

९. नाट्यशास्त्रम्, १.१०९-२२२

१०. अतोऽभिवाञ्छता कीर्तिं स्थेयसीं भुवः स्थितेः।
यतो विदितवेद्येन विधेयः काव्यलक्षणः।। काव्यालंकारः, १

११. काव्यालंकारसूत्राणि, १.१.५

१२. कल्पान्तस्थायि यशः प्राप्नोति महाकविः काव्यात्।
काव्यालंकारः (रुद्रट), १.२१, १२.१
चतुर्वर्गफलास्वादमप्यतिक्रम्य तद्विदाम्।
काव्यामृतरसेनान्तश्चमत्कारो वितन्यते।।
वक्रोक्तिजीवितम्, १.५

१३. काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।
सद्यः परनिर्वृतये कान्तासम्मितोपदेशयुजे।।
काव्यप्रकाशः, १.२

१४. काव्यानुशासनम्, ३ (पृ. ३)

# राजस्थानस्य संस्कृतज्ञाः क्रान्तिकारिणः

❑ डॉ. नाथूलालसुमनः

आंग्लशासकानां विरोधे अस्माकं देशे स्वातन्त्र्यसंग्रामः सशस्त्रैः क्रान्तिकारिभिः चालितः, तेषु चन्द्रशेखरभगतसिंहसुखदेवराजगुरुरामप्रसाद-बिस्मिलासफाक-उल्लाहखान्प्रभृतयः प्रमुखाः आसन्। अपरत्र महात्मगान्धिसदृशैः सत्याग्रहशस्त्रेणापि स्वातन्त्र्यान्दोलनं चालितम्। प्रमुखरूपेण १८५७ तः १९४७ खीष्टाब्दपर्यन्तम् अस्मद्देशवासिनां हृदयेषु आंग्लशासकान् प्रति संघर्षभावना निरन्तरं जज्वाल। एषा संघर्षभावना तत्समये लिखिते साहित्येऽपि प्रकटिता अभूत्। एवं क्रान्तिकारिणः सशस्त्रक्रान्तिमार्गं केचन सत्याग्रहमार्गम् अन्ये च साहित्यमार्गमवलम्ब्य आंग्लशासकानां विरोधे सक्रियाः अभूवन्। तत्कालीनराजपूतानाप्रान्ते संस्कृतज्ञाः अपि त्रिविधिमार्गमेव अवालम्बन्त। तेषु केषाञ्चित् विवरणमत्र प्रस्तूयते।

### १. पं. अम्बिकादत्तव्यासः (१८५८-१९००)

संस्कृतवाङ्मयस्य प्रथमैतिहासिकोपन्यासस्य 'शिवराजविजये'त्याख्यस्य रचयिता पं. अम्बिकादत्तव्यासः जयपुरे पराशरगोत्रीयब्राह्मणपरिवारे जनिं लब्धवान्। अस्य पिता पण्डितः दुर्गादत्तव्यासः कुशलः कथावाचकः आसीत्, परिवारश्च जयपुरतः पूर्वस्यां दिशि रावजीकाधूलासमीपे मानपुरग्रामे न्यवसत्। पं. अम्बिकादत्तव्यासस्य प्रारम्भिकशिक्षा तु पितुः सान्निध्ये गृह एव सम्पन्ना। अनन्तरं परिवारः काशीं गत्वा तत्रैव अवसत्। बाल्यकालादेव बहुप्रतिभाशाली बहुभाषाविद् एषः 'सुकविः' 'घटिकाशतकी', 'शतावधानी' इत्यादिभिः उपाधिभिः विभूषितः।

आंग्लशासकानाम् अत्याचारैः पीडिते हिन्दुसमाजे नूतनप्राणसञ्चारमिवाकरोत् उपन्यासनायकस्य शिववीरस्य चरित्रचित्रणमाध्यमेन पण्डितव्यासः। यवनैः हिन्दुकन्यानाम् अपहरणं, मंदिरेषु देवमूर्तीनां विध्वंसः पवित्रधर्मग्रन्थानां विनाशश्च अनवरतं क्रियते स्म। हिन्दुराजानोऽपि यवनानां दासतामेव स्वीचक्रुः। अपरत्र महाराष्ट्राधिपतिः शिववीरः (छत्रपतिः शिवाजीमहाराजः) स्वपराक्रमेण हिन्दुत्वं ररक्ष, समाजे शौर्यस्य आत्मविश्वासस्य च भावं पुनरपि अजागरयत्। तत्कालीनसमाजस्य दुरवस्था चित्रिता कविना -

'अद्य हि वेदा विच्छिद्य वीथिषु विक्षिप्यन्ते, धर्मशास्त्राण्युद्धूय धूमध्वजेषु ध्मायन्ते, पुराणानि पिष्ट्वा पानीयेषु पात्यन्ते, भाष्याणि भ्रंशयित्वा भ्राष्ट्रेषु भर्ज्यन्ते, क्वचिन्मन्दिराणि भिद्यन्ते ........... क्वचिद् रुधिरधाराः, क्वचिदग्निदाहः, क्वचिद् गृहनिपातः इत्येव श्रूयतेऽवलोक्यते च परितः।'

'....... सम्प्रति तु म्लेच्छैर्गावो हन्यन्ते, सत्यः पात्यन्ते, सन्तश्च सन्ताप्यन्ते .......।' (शिवराजविजयः/प्रथमविरामः/प्रथमनिश्वासः)

अन्यत्र च चरितनायकशिववीरमाध्यमेन बोधयन् हिन्दुजनानां राष्ट्रभक्तिभावनामजागरयत्

उपन्यासकारः पं. व्यासः –

'...... भारतवर्षीया यूयम्, तत्रापि महोच्चकुलजाताः, अस्ति चेदं भारतं वर्षं भवति च स्वाभाविक एवानुरागः सर्वस्यापि स्वदेशे, पवित्रतमश्च यौष्माकीणः सनातनो धर्मः, .......' प्राणाः यान्तु न च धर्मः' इत्यार्याणां दृढः सिद्धान्तः। महान्तो हि ........ न धर्मं त्यजन्ति, किन्तु धर्मस्य रक्षायै सर्वसुखान्यपि त्यक्त्वा ...... निर्भया विचरन्ति। तद् धन्याः स्थ यूयं वस्तुतः आर्यवंशीयाः वस्तुतश्च भारतवर्षीयाः।'

शिववीरस्य पराक्रमवर्णनमाध्यमेन साहसम् अजागरयत् लेखकः आंग्लशासकपीडितेषु भारतीयेषु –

'..... आगत एष शिववीरः' इति भ्रमेणापि सम्भाव्य अस्य विरोधिषु केचन मूर्च्छिता निपतन्ति, अन्ये विस्मृतशस्त्रास्त्राः पलायन्ते, इतरे महात्रासाऽऽकुञ्चितोदरा विशिथिलवाससो नग्ना भवन्ति, अपरे च शुष्कमुखा दशनेषु तृणं सन्धाय साम्रेडं प्रणिपातपरम्पराः रचयन्तो जीवनं याचन्ते।'

प्राणत्यागः वरं किन्तु यवनदासता कदापि न स्वीकरणीया –

'....... ये अस्मदिष्टदेवमूर्तीर्भङ्क्त्वा ..... आर्यवंशीयान् बलाद् यवनीकुर्वन्ति, तेषामेव चरणयोरञ्जलिं बद्ध्वा लालाटिकतामङ्गीकुर्याम्? एवं चेद् धिङ् मां कुलकलङ्कं क्लीबम्, यः प्राणभयेन सनातनधर्मद्वेषिणां दासतां वहेत्। यदि चाऽहमाहवे म्रियेय, वध्येय, ताडयेय वा तदैव धन्योऽहम् धन्यौ च मम पितरौ।' (शिवराजविजयः/ प्रथमविरामः/ द्वितीयनिश्वासः)

एवं यवनकृतात्याचारवर्णनमाध्यमेन आंग्लात्याचाराणां वर्णनं कृतम्। शिववीरस्य साहसपूर्णकृत्यानां वर्णनमाध्यमेन हिन्दुसमाजे शौर्यस्य संचारं कृतवान् पं. अम्बिकादत्तव्यासः।

**२. श्रीकेसरीसिंहबारहठः (१८७२-१९४१)**

अस्य जन्म तत्कालीनराजपूतानाप्रदेशस्य शाहपुराराज्ये (पैतृकग्रामे) देवपुराग्रामे अभूत्। अस्य पिता श्रीकृष्णसिंहबारहठः माता च श्रीमती बख्तावरकंवर आस्ताम्। षड्वर्षीयस्य केसरीसिंहस्य प्रारम्भिकशिक्षा शाहपुरानगरे महन्तसीतारामस्य निर्देशने प्रारब्धा। द्विवर्षानन्तरं पिता श्रीकृष्णसिंहः काशीतः पण्डितगोपीनाथशास्त्रिणम् आहूय उदयपुरे केसरीसिंहस्य औपचारिकसंस्कृतशिक्षायाः व्यवस्थां कृतवान्। केसरीसिंहेन समग्रोऽपि 'अमरकोशः' कण्ठस्थीकृतः। सः ज्योतिषं, गणितं, खगोलशास्त्रमपि पठितवान्। एतेषु शास्त्रेषु अस्य सम्यक् गतिः आसीत्। अस्य स्वाध्यायार्थं पितुः 'कृष्णवाणीविलासः' इत्याख्यः पुस्तकालयः अपि आसीत्। एवं केसरीसिंहः परम्परागतरूपेण संस्कृतं पठितवान्।

क्रान्तिबीजस्तु केसरीसिंहस्य रक्ते आसीत्। अस्य विश्वासः आसीत् यत् स्वातन्त्र्यं सशस्त्रक्रान्तिद्वारा एव प्राप्तुं शक्यते। तत्समये रासबिहारीबोस-मास्टरअमीरचन्द-लालाहरदयाल-श्यामजीकृष्णवर्मा-अर्जुनलालसेठी-शचीन्द्रनाथ-सान्याल-अवधबिहारीबोस-रावगोपालसिंहखरवादिभिः शीर्षक्रान्तिकारिभिः सह केसरीसिंहस्य घनिष्ठः सम्बन्धः आसीत्। एतैः सह केसरीसिंहोऽपि

अभिनवभारतसंघटनस्य सदस्यतां स्वीचकार। अनन्तरं राजस्थानेऽपि '**वीरभारतसभा**' इति नाम्ना शाखाम् अस्थापयत्। केसरीसिंहरचितानि 'चेतावणी रा चूंगट्या' इति नामधेयानि सोरठा छंदांसि पठित्वा एव मेदपाट (मेवाड़)- महाराणा फतेहसिंहः दिल्लीसमारोहगमनम् (१९०३) अस्थगयत् अस्तगीद् वा। दिल्लीलाहौरषड्यन्त्राभियोगे (१९१४) सः आंग्लशासनेन बंदीकृतः, अनन्तरं २० वर्षाणाम् आजीवनकारावासेन दण्डितः। तस्य पैतृकावासः, भूमिः समग्रसम्पत्तिश्च शासनेन अभिगृहीताः। १९४१ तमे खीष्टाब्दे अगस्तमासे केसरीसिंहः ज्वराक्रान्तः जातः। पौत्री राजलक्ष्मीः अस्य सेवायाम् आसीत्। १४ अगस्त दिने ज्वरावस्थायामेव केसरीसिंहः दिवङ्गतः। अस्मिन् प्रसङ्गे राजलक्ष्म्याः संस्मरणम् आसीत् -

*'रुग्णावस्थायाम् अन्तिमसप्तदिवसेषु पितासहः निरन्तरं श्रीमद्भगवद्गीतायाः श्लोकानाम् उपनिषदां मन्त्राणाञ्च उच्चारणं कुर्वन् एव स्वप्राणान् अत्यजत्।'*

केसरीसिंहस्य पुत्रः श्रीप्रतापसिंहबारहठोऽपि संस्कृतं पठितवान्। सोऽपि क्रान्तिकारी आसीत्। २५ वर्षदेशीयोऽयं कारागार एव मातृभूमेः बलिवेदिकायाम् आरोहणं कृतवान्। केसरीसिंहस्य भ्राता जोरावरसिंहः, जामाता ईश्वरदानआसिया इत्यादयोऽपि क्रान्तिमार्गगामिन एव आसन्।

### ३. श्रीअर्जुनलालसेठी (१८८०-१९४१)

जयपुरनगरे जैनपरिवारे लब्धजन्मा अयं महाशयः राजस्थाने सशस्त्रक्रान्तिकारिषु प्रमुखः आसीत्। अनेन स्वयंपाठिरूपेण संस्कृतमपि अधीतम्। अरबीपालीसंस्कृतभाषाणामुद्भटो विद्वान् अयं जैनदर्शनविषये प्रभावि व्याख्यानं कुर्वन् जैन-धर्मानुयायिजनान् श्रीमद्भगवद्गीतापठनार्थं प्रैरयत। गीतारामायणादिग्रन्थेषु अस्य असाधारणोऽधिकारः आसीत्। देशस्वातन्त्र्यार्थमनेन स्वजीवनं पूर्णतया समर्पितम्। जयपुरराज्य**प्रधानमन्त्रिपदस्य प्रस्ताव-मपि** राष्ट्रभक्तेन अनेन अस्वीकृतम्। जयपुरे जैनवर्ध-माननाम्ना विद्यालयछात्रावासपुस्तकालयादीनामपि स्थापना अनेन कृता। वर्धमानविद्यालयः क्रान्तिकारिणां प्रशिक्षणस्य प्रमुखं केन्द्रमासीत्। जोरावरसिंहप्रतापसिंहमाणिकचन्द्रमोतीचन्द्रविष्णु-दत्तादयः क्रान्तिकारिणः अस्यैव शिष्याः आसन्। **चन्द्रशेखर आजादः** तस्य सहयोगिनश्च मार्गदर्श-नार्थम् अस्य पार्श्वे आगच्छन्ति स्म। शौकतउस्मानी (मेरठकाण्डः) अशफाकउल्लाखान् (काकोरी-काण्डः) प्रभृतयः क्रान्तिकारिणः अज्ञातवासार्थम् अस्य गृहे वासं कृतवन्तः। हार्डिंगबमकाण्डे (दिल्ली १९१२) आराहत्याकाण्डे (१९१३) काकोरीकाण्डे (१९२५) च अस्यैव प्रमुखा भूमिका आसीत्। असहयोगान्दोलने सत्याग्रहान्दोलने च सेठीमहाशयः सक्रियः आसीत्। देशस्य स्वातन्त्र्यार्थं सशस्त्रक्रान्तिषु सक्रियोऽयं प्रायशः षड्वर्षाणि यावत् कारावासमपि प्राप्तवान्।

### ४. पं. चन्द्रधरशर्मागुलेरी (१८८३-१९२२)

जयपुरे लब्धजन्मा अत्रैव महाराजमहाविद्या-लये शिक्षां प्राप्य प्रयागविश्वविद्यालयस्य स्नातक (बी.ए.) परीक्षाम्, उत्तीर्य प्रथमं स्थानं प्राप्तवान् असौ। प्राच्यपाश्चात्त्योभयभाषाविद्, संस्कृतगद्यपद्य-

लेखने कुशलः पं. गुलेरीमहोदयः जयपुरविद्वन्मण्डल्याः आदरभाजनमासीत्। प्रतिमासमस्य लेखाः संस्कृतरत्नाकरपत्रिकायां प्रकाश्यन्ते स्म। स्वदेशीविषये अस्य लेखः संस्कृतरत्नाकरे (१९०५) प्राकाशत –

**विदेशवस्तुनिर्मुक्तिः कथं मे स्यात्कदा विधे।**
**इति या सुदृढा बुद्धिर्वक्तव्या सा मुमुक्षुता।।**

**'वैदिकपुषताः'** नाम्ना अस्य लेखमाला अपि संस्कृतरत्नाकरे (१९१०-१९१४) प्रकाशिता। जयानकरचितस्य पृथ्वीराजविजयमहाकाव्यस्य सम्पादनं (१९१२) कृत्वा अस्य महाकाव्यस्य समीक्षात्मकभूमिका अपि अनेन लिखिता। १९०४ तः १९२० खीष्टाब्दपर्यन्तमसौ अजयमेरुस्थे मेयोकालेजे शिक्षकत्वेन कार्यं कृतवान्। तस्मिन् एव कार्यकाले अनेन लिखिता **'उसने कहा था'** इति हिन्दीकथा (कहानी) अपि प्रसिद्धा जाता। पं. चन्द्रधरगुलेरीमहोदयः शताधिकपद्येषु 'पंचनददेशस्तवः' इति नाम्ना पंजाबप्रान्तस्य स्तुतिमपि (१९१४) अलेखीत् –

**हिमवन्मुकुटायाथ सिन्धुलौहित्यवाससे।**
**रत्नाकरान्तरीयाय तस्मै देशात्मने नमः।।**

एवं स्वलेखनेन गुलेरीमहाशयोऽपि देशवासिनः जनान् राष्ट्रभक्तिभावनायै प्रेरयामास।

### ५. भट्टमथुरानाथशास्त्री (१८८९-१९६४)

श्रीकृष्णभट्टस्य वंशजः जयपुरनरेशस्य राजसभापण्डितश्च भट्टमथुरानाथशास्त्री जयपुरस्थ-महाराजसंस्कृतकालेजे शिक्षां प्राप्तवान्। भट्टमहोदयस्य गुरवः आसन् –श्रीलक्ष्मीनाथशास्त्री, श्रीहरिदत्तझा, श्रीगोपीनाथः, श्रीकृष्णशास्त्री, पण्डितः मधुसूदनओझा च। अनन्तरं जयपुरसंस्कृत-कालेज एव भट्टमहोदयः साहित्यप्राध्यापकपदे नियुक्तः। प्रसिद्धकविः, लेखकः, टीकाकारः, सम्पादकः, **प्रथम**संस्कृतगजलगीतिकारः **'मञ्जुनाथ'** इति विरुदधारी अयं संस्कृतयुगपुरुषः आसीत्। कविशिरोमणिकविसार्वभौमसाहित्यवारिधीत्यनेकोपाधिधारी अयं संस्कृतविद्वान् तु आसीदेव तस्य विचाराः अपि क्रान्तिकारिणः आसन्। दिङ्मात्रमत्रा-वलोकयामः –

१. १९४४ तमे ख्रीष्टाब्दे गांधिवर्यस्य ७५ तमं जन्मवर्षमुपलक्ष्य प्रकाशिते अभिनन्दनग्रन्थे भट्टमहोदयोऽपि गांधिगुणगौरवमिति शीर्षकेण घनाक्षरीछंदसि काव्याञ्जलिं अप्रेषत –

*'पूर्णः कर्णधार इव धीरं धुर्यकान्त्या लसन्*
*शान्त्या यो नियच्छति स्म राजनीतिगौरवम्*
*भारतविभवकृते धार्मिकयुधि स्थिरोऽसौ*
*न्यग्रहीच्च वक्रदलं चक्रमिव कौरवम्।*

..............................................'

२. काश्यां संस्कृतसाहित्यसम्मेलनस्य अधिवेशने (१९३०) द्वौ आंग्लाचार्यौ आंग्लभाषां विश्वभाषात्वेन सर्वाधिकसशक्तभाषात्वेन च श्लाघितवन्तौ, अपि च 'संस्कृतमपि आंग्लभाषातः शिक्षां प्राप्नोतु' इत्यपि उक्तवन्तौ। एतन्मध्ये भट्टमहोदयः स्वाभिमानेन उदघोषीत्- 'साम्राज्य-शक्तिद्वारैव आंग्लस्य प्रसारः जातः, सा विश्वभाषा जाता किन्तु संस्कृतं तु स्वशक्त्याधारेणैव सशक्ता भाषा अस्ति। अस्य शब्दनिधिः अनन्तः अस्ति।' इति

सोदाहरणं प्रतिपादितवान् भट्टमहोदयः।

३. स्वातन्त्र्यान्दोलनकाले हिन्द्यान्दोलनमपि आंग्लशासनेन राज्यविरोधीत्युद्घोषितम्। हिन्दीप्रचारः प्रतिबन्धितः। तथापि भट्टमहोदयः एकस्यां हिन्दीपाठशालायां रात्रौ छात्रान् पाठयति स्म, अर्थसाहाय्यमपि करोति स्म। एतस्मात् कारणात् अस्य सेवापुस्तिकायाम् आंग्लशिक्षानिदेशकेन प्रतिकूलप्रविष्टिरपि कृता। तथापि अस्य हिन्दीपाठनं नैरन्तर्येण प्राचलत्।

४. गांधिनः कारावाससमये एषः अलेखीत् -

**'नृपति-भवन-घूकैरेतकैर्जर्जपूकै-**
**र्निभृतनिगडबद्धान् देशनेतॄन् निरीक्ष्य।**
**नियतमुचितवक्ता वक्तुमीशीत नूनं**
**मशकदशनमध्ये दन्तिनः संचरन्ति।।'**

यदा सत्याग्रहस्य अवधारणा नासीत् सविनय-अवज्ञान्दोलनमपि नासीत् तदानीम् स्वातन्त्र्यान्दोलनस्य प्रारम्भिकदिनेषु भट्टमहोदयः संस्कृतकविता-माध्यमेन जनान् प्रैरिरत् -

**अहो श्रीभारताभिख्योऽतिमुख्यो दिव्यदेशोऽयम्।**
**अपि ध्यायेत् सुरेशोयं, स भूमेः संनिवेशोऽयम्।**
**हिमाद्रिः प्रोन्नते मौली चकासच्चामरं धत्ते।**
**उदन्वद्धौतपादाब्जो नरेशानां नरेशोऽयम्।**

..............................................................

**कियद्गीतानि गायामो, न तृप्यामो गुणैः किन्तु।**
**करेणाऽऽपाद्यतेदानीं स्वदेशो हा विदेशोऽयम्।**

५. भट्टमथुरानाथशास्त्रिविरचितं **'भारतवैभवम्'** अधुना यावत् अप्रकाशितमेव अस्ति। अस्य ग्रन्थस्य प्रथमभागे भारतसंस्कृतेः विस्तृतम् ऐतिहासिकं मूल्याङ्कनं वर्तते। द्वितीयभागे च सरलसंस्कृत-माध्यमेन ऐतिहासिककथाः सन्ति। दिङ्मात्रमत्र पश्यामः -

**विश्वमण्डलेस्मिन् गुरुगौरवं वहन्ती सेय-**
**मार्यवैजयन्ती जगन्मौलौ परितः प्रवातु**
**सर्वतोऽपि पूर्वं मानवीयसभ्यताया गुरु-**
**र्देशो दत्तसभ्यतोपदेशो मङ्गलं दधातु।**
**नित्यं नीतिनैपुण्येन नीचैर्नमयन्ती शठान्**
**दूरं दमयन्ती भटान् प्रेमभरात्संपूणात्**
**पूर्वां परतन्त्रतामपास्यामोघमन्त्रतया**
**सर्वतः स्वतन्त्रतया भारतविभा विभातु।।**

**६. श्रीरामनारायणचौधरी ( १८९५-१९८९ )**

अस्य जन्म नीमकाथानानगरे (सीकरजनपदे) अभूत्, पिता श्रीमुरलीधरचौधरी सीकरराज्ये अधिकारी आसीत्। नीमकाथानानगरे एकः ब्राह्मणपुजारी बालकरामनारायणस्य गुरुः आसीत्। तस्मात् अयं बालः संस्कृतं पठितवान्। अनन्तरम् एषः जोबनेरजयपुरादिनगरेषु अपि विद्याध्ययनं कृतवान्। १९१२ तमे ख्रीष्टाब्दे रामनारायणः क्रान्तिदलस्य सदस्यः जातः। उत्तरभारते क्रान्तिकारिणां संदेशवाहकरूपेण एषः कार्यम् अकरोत्। अन्ते च अयं गांधिनः कृषकान्दोलनस्यापि नेतृत्वं कृतवान्, अहिंसकान्दोलनेन सम्पृक्तः जातः।

**७. श्रीपन्नालालजोशी ( १८९५-१९९२ )**

बांसवाड़ामण्डलस्य एकस्मिन् ग्रामे धार्मिकपरिवारे लब्धजन्मा श्रीपन्नालालः संस्कृतं ज्योतिषम् अन्यशास्त्राणि च अधीतवान्। राजकीयविद्यालये शिक्षकवृत्तिं स्वीकृत्यासौ

आदिवासिबालकान् स्वातन्त्र्यान्दोलनाय प्रेरयामास। बांसवाड़ामहारावलस्य विरोधकारणतः शिक्षकपदमपि परित्यज्य स्वतन्त्रतायै जनजागरणं प्रारभत। साबरमत्याश्रमे महात्मनो गांधिनः साहचर्यं प्राप्य स्वातन्त्र्ययुद्धे समर्पितोऽभूत्। सत्याग्रहान्दोलनेषु भागं गृहीत्वा कारावासमपि प्राप्तवान्। श्रीपन्नालालजोशीवर्यस्य पुत्रः श्रीहरिदेवजोशी पूर्वं राजस्थानस्य मुख्यमंत्री आसीत्।

## ८. श्रीलादूरामजोशी (१८९४-१९९३)

सीकरजनपदस्य मूंडवाग्रामे एकस्मिन् कृषिजीविपरिवारे जनिं लेभे अयं महानुभावः। डूंडलोदग्रामे संस्कृतविद्यालये व्याकरणविषयं स्वीकृत्य मध्यमापर्यन्तं शिक्षां प्राप्तवान्। अनन्तरं चिराणाग्रामे श्रेष्ठिसंचालिते एकस्मिन् विद्यालये संस्कृताध्यापकपदे नियुक्तः। विद्यालयव्यवस्थायां व्यवधाने सति कलिकातानगरं गतवानयम्। तत्रैव महात्मनो गांधिनः प्रेरणया स्वकीयवस्त्राणि गंगायां विसृज्य खादीवस्त्राणि धृतवान्। कलिकातातः पुनरपि स्वजन्मभूमिं प्राप्य **जमनालालबजाज**-महोदयस्य सम्पर्केण राष्ट्रकार्ये संलग्नो जातः। जयपुरराज्यकिसानसभायाः माध्यमेन प्रजामण्डल-माध्यमेन च निरन्तरं जनजागरणे संलग्नोऽभूत्। विभिन्नेषु आन्दोलनेषु सप्तवर्षाधिकं कारावास-यातनामपि प्राप्तवान्। बिजोलियाकृषकसत्याग्रहे बेगूग्रामान्दोलने च राजपुरुषैः दत्तां यातनामपि असहत।

## ९. राजस्थानस्य प्रथममुख्यमन्त्री श्रीहीरालाल-शास्त्री (१८९९-१९७४)

पण्डितहीरालालशास्त्री जयपुरसमीपे जोबनेरग्रामे एकस्मिन् कृषकपरिवारे जनिं लब्धवान्। विद्यालयशिक्षाकाले प्रधानाचार्यः श्रीजयदेवविद्यालंकारः बालकं हीरालालं संस्कृतमपि पाठयति स्म। गुरुः तं पञ्चतन्त्रं भामिनीविलासमपि अपाठयत्। कोऽपि ब्रह्मचारी एनं ब्रह्मसूत्रम् उपनिषदाम् अधिकांशभागं च अपाठयत्। उच्चाध्ययनार्थं जयपुरमागत्य असौ श्रीबिहारीलालमहाभागात् संस्कृतशास्त्राणि अधीतवान्। अनन्तरं वीरेश्वरशास्त्रिद्राविडस्य शिष्यरूपेण अध्ययनं कृत्वा **साहित्यशास्त्रीति** उपाधिमपि प्राप्तवान्। अध्ययन-समाप्त्यनन्तरमसौ किंचित्कालं यावत् जयपुरे अध्यापकरूपेण राजकीयसेवां कृत्वा १९२२ तमे ख्रीस्ताब्दे अजयमेरुस्थे 'मेयोकालेजे' जयपुर-राज्यस्य प्रतिनिधिरूपेण शिक्षकवृत्तिं लब्धवान्।

श्रीजमनालाल**बजाज**महोदयस्य प्रेरणया राजकीयसेवां परित्यज्य श्रीघनश्यामदासबिडला-महाभागस्य गृहे पिलानीनगरे केषाञ्चित् युवकानां संस्कृतपाठनं प्रारभत, बालकान् देशसेवार्थं प्रैरयत्, स्वरचितानि नवजागरणगीतानि च अशिक्षत। श्रीशास्त्रिमहाभागः देशे बहुत्र शिक्षासंस्थानां स्थापनाय साहाय्यं कृतवान्। स्वयमपि **वनस्थली**-ग्रामे (निवाईसमीपे टोंकजनपदे) **'जीवनकुटीर'** नाम्ना एकां संस्थां संस्थाप्य तन्माध्यमेन समाजसेवायै कार्यकर्तॄन् प्राशिक्षत। अत्र प्रशिक्षिताः कार्यकर्तारः पुनर्जागरणस्य अग्रदूताः समभूवन्। अत्रैव शिक्षाकुटीरस्यापि स्थापना कृता अनेन। इदमेव शिक्षाकुटीरमधुना **वनस्थलीविद्यापीठमिति** नाम्ना प्रसिद्धम्। जमनालालबजाजमहोदयस्य प्रेरणया

श्रीहीरालालशास्त्रिणः सक्रियसहयोगेन च जयपुरराज्यप्रजामण्डलस्य पुनर्घटनं जातम्। जीवनकुटीरस्य सर्वेऽपि स्वयंसेवकाः प्रजामण्डलस्य कार्यकर्तारः समभूवन् हीरालालशास्त्रिणः प्रयासैः। शेखावाटीकृषकसभायाः अपि विलयः जयपुरप्रजामण्डले समभवत्। एवं संघटनस्य स्थितिः सुदृढा जाता। हीरालालशास्त्रिणे जयपुरप्रजामण्डलस्य महामन्त्रिणः दायित्वमपि प्रदत्तम्। तदनन्तरम् अन्येऽपि गणमान्याः जनाः प्रजामण्डले सम्मिलिताः। प्रजामण्डलान्दोलनपरिणामतः अन्यसहयोगिभिः सह हीरालालशास्त्री अपि कारावासेन दण्डितः। गच्छता कालेन शास्त्रिमहाभागाय जयपुरप्रजामण्डलस्य अध्यक्षपदस्य दायित्वमपि प्रदत्तम्, परिणामतः आन्दोलनकारिणां यथाशक्ति साहाय्यमपि कृतमनेन। अन्यक्षेत्राणां सत्याग्रहिणां गोपनाय स्वकीयावासे वनस्थलीस्थे जीवनकुटीरे च सुरक्षिता व्यवस्था अपि कृता शास्त्रिमहाभागेन। शास्त्रिमहाभागः क्रमशः जयपुरराज्यस्य नवनिर्मितमन्त्रिमण्डलस्य **मुख्यमन्त्रिपदे**, बृहद्राजस्थानसंघस्य **प्रधानमन्त्रिपदे** अथ च लोकप्रियमन्त्रिमण्डलस्य प्रथममुख्यमन्त्रिपदेऽपि मनोनीतः। जयपुरात् एषः संविधाननिर्माणसमितौ अपि प्रेषितः। पटेलमहाभागेन राजस्थानस्यैकीकरणस्य दायित्वमपि अस्मै प्रदत्तम्। एवं संस्कृतस्य छात्रः स्वतन्त्रभारते राजस्थानस्य प्रथममुख्यमन्त्रिपदमलंचकार।

### १०. हुतात्मा श्रीरमेशस्वामी ( १९०४-१९४६ )

भरतपुरजनपदस्य भुसावरनगरे ब्राह्मणकुले लब्धजन्माऽयं महाशयः महर्षिदयानन्दस्य विचारैः प्रभावितः सन् राजस्थाने आर्यसमाजसंस्थानामवलोकनमकरोत्, तत्रैव विविधग्रन्थानपि पठितवान्। अनन्तरं लवपुरनगरे (लाहौर) उद्भटविद्वद्वरेभ्यः विश्वबन्धुशास्त्रिमहाभागेभ्यः **वैदिकं साहित्यमधीतवान्**। बर्मामलायादिदेशेषु स्वामिवर्यः गीतारामायणाद्यार्षग्रन्थानां कथाः विशदव्याख्यानैः सह श्रावयति स्म। वेदोपनिषदां विज्ञानमपि व्याख्यायितमनेन। अतः परं सिन्धुप्रान्ते **हिन्दुसंघटनकार्यमपि कृतवान्**। कालान्तरे स्वजन्मस्थाने मा.आदित्येन्द्रस्य प्रेरणया जनसेवायां निरतः सन् आंग्लशासनस्य दमनचक्रमवरोद्धुं प्रायतत। प्रथमसत्याग्रहान्दोलने रमेशस्वामिवर्यः बयानाक्षेत्रे संघटनकार्यार्थं ग्रामं-ग्रामं पदातिरेव बभ्राम। सत्याग्रह एव अयं राजपुरुषैः बन्दीकृत्य नैकवारं कारागारे निक्षिप्तः। भरतपुरराज्ये 'बेगारप्रथा' (पारिश्रमिकं विनैव शासकानां सेवा) विरोधदिवसायोजनावसरे आंग्लशासकानां चाटुकारेण वाहनस्वामिना डा.भगवन्तसिंहेन क्रान्तिकारिणामुपरित एव तीव्रवेगेन वाहनं चालितं, परिणामतः वाहनचक्रैराहताः राष्ट्रसेवकाः। रमेशस्वामिमहाभागस्तु तत्रैव पञ्चत्वं गतः। एवं स्वातन्त्र्यबलिवेद्यामाहुतः देशभक्तः।

### ११. पूज्यजगद्गुरवः निरञ्जनदेवतीर्थाः ( १९१०-१९९६ )

एते महानुभावाः पूर्वजीवने महाराजसंस्कृतमहाविद्यालयस्य जयपुरस्थस्य मान्याः प्राचार्याः आसन्। एतेषां पूर्वनाम आसीत् श्रीचन्द्रशेखरशास्त्री। १९२२ खीस्ताब्दे यदा महात्मगांधी रेलयानेन अहमदाबादनगरं गच्छन् आसीत् तदा ब्यावररेलस्थानके बालकः चन्द्रशेखरोऽपि स्वमित्रैः सह

गान्धिनः दर्शनार्थं गतवान्। तत्र आरक्षिदलस्य दण्डप्रहारैः ताड्यमानोऽपि स्वसाहसं न अत्यजत् अपितु गांधिनं दृष्ट्वैव आगतः। स्वामिकरपात्रिणः संरक्षणे असौ सनातनधर्मरक्षायै स्वतन्त्रताप्राप्तये च निरन्तरं प्रायतत। **भारतविभाजनमवरोद्धुमसौ** निरन्तरं लेखान् लिलेख। पाकिस्ताननिर्माणार्थं मुस्लिमजनाः प्रयासरताः आसन्, स्थाने-स्थाने हिन्दुमुस्लिम-योर्मध्ये संघर्षः प्राचलत्। स्वामिकरपात्रिणा सह चन्द्रशेखरमहोदयोऽपि भयभीतान् हिन्दुजनान् समाश्वासयितुं बहुत्र सभाः अकरोत्। अस्मिन्नेव क्रमे द्वावपि गुरुशिष्यौ अमृतसरमगच्छताम्, तत्र एतयोर्वासस्थाने केचन उन्मादिनः साम्प्रदायिकाः आक्राम्यन्। चन्द्रशेखरशास्त्रिवर्यः अन्यान् वैरागिसाधुजनान् प्रेरयित्वा तैः सह केवलमिष्टिका-प्रहारैः प्रबलाक्रमणेन आततायिजनान् पराजितान् अकरोत्। काश्याम् अखिलभारतीयस्वराज्यसंघं संस्थाप्य सम्पूर्णदेशे तस्य शाखाः अपि स्थापितवान् असौ। स्वराज्यसंघस्य शाखामाध्यमेन स्वतन्त्रतान्दोलने सक्रियं योगदानम् अकरोत् एषः। एवं हिन्दुत्वविरोधिभिः सह अस्य यावज्जीवनं संघर्षः प्राचलत्।

## १२. श्रीवेङ्कटेशपारीकः ( १९११-१९९५ )

शेखावाटीक्षेत्रस्य लक्ष्मणगढनगरे विद्वत्परिवारे लब्धजन्मा अयं महाशयः बाल्य एव वयसि लघुसिद्धान्तकौमुदीम् अमरकोषं च कण्ठस्थे कृतवान्। पितुः सकाशात् ज्योतिषमपि पठितवान् नैपुण्यञ्चावाप्तवान्। **व्याकरणमध्यमा**पर्यन्तं शास्त्राण्यधीत्य गान्धिमहाभागस्य प्रभावेण मोहितोऽयं समाजसेवायां संलग्नो जातः। किसान-सभाप्रजामण्डलमाध्यमेन च ग्रामजनान् स्वराज्यमन्त्रं पाठयति स्म। सीकरराज्यप्रशासनद्वारा नैकवारं कारागारे पातितः पीडितश्चायं स्वमार्गतः नैव च्युतः। 'बेगार' इत्याख्यप्रथायाः विरोधेन विक्षुब्धाः शासकाः वेङ्कटेशं निर्ममतया पीडितवन्तः। अस्य सततसंघर्षेणैव सीकरराज्ये **गोलीप्रथा** (वध्वा सह दासदासीनां प्रेषणम्) समाप्ता जाता। जयपुरराज्य-प्रजामण्डलस्य संघटने, प्रचारे, प्रसारे सत्याग्रहान्दोलनेषु च अस्य महत्त्वपूर्णं योगदानमासीत्। सत्याग्रहान्दोलने एषः कारावासमपि प्राप्तवान्। 'आंग्लाः त्यजत भारतम्' इत्यान्दोलने (१९४२) सम्मिलितोऽयम् कारागारे पातितः। एवं स्वातन्त्र्यप्राप्तिपर्यन्तमसौ निरन्तरं जनजागरणे संलग्नोऽभूत्।

## १३. पं. गोपीकृष्णव्यासः ( १९१५-१९९४ )

अस्य जन्म जैसलमेरसमीपे पोकरणग्रामे अभवत्। ग्रामे प्रारम्भिकम् अध्ययनं समाप्य उच्चाध्ययननिमित्तम् एषः वाराणसीं गतः। वाराणस्यां शास्त्रिकक्षापर्यन्तम् अध्ययनं कृत्वा १९४२ तमे खीस्ताब्दे उदयपुरमाजगाम। तत्र एषः संस्कृत-महाविद्यालये अध्ययनं कृत्वा **नव्यव्याकरणशास्त्रि**परीक्षामुदतरत्। 'आंग्लाः त्यजत भारतम्' इत्याख्यान्दोलने अपि एषः समवेतोऽभूत्, परिणामतः कारावासं प्राप्तवान्। आरक्षकान् वञ्चयित्वा अयं लाहौरनगरं पलायितः, तत्रापि असौ भूमिगतो भूत्वा स्वातन्त्र्यान्दोलने भागमग्रहीत्। १९४७ तमखिस्ताब्द-पर्यन्तमसौ देशविभाजनस्य विरोधं कुर्वन् **सावरकरस्य**

अनुयायिरूपेण हिन्दुत्वपक्षपाती एव आसीत्।

### १४. पं. मदनमोहनशर्मा 'ध्यानी'

जयपुरे (भौण्डों का रास्ता) लब्धजन्मा मदनमोहनः बाल्यकाले जयपुरप्रजामण्डलस्य प्रथमसभायां सक्रियरूपेण भागमगृह्णात्। जयपुरस्थ-महाराजमहाविद्यालये अध्ययनं कुर्वन् असौ छात्रवृत्तिमपि प्राप्तवान्। जयपुरप्रजामण्डले सक्रियतया निर्भयतया च कार्यं कृतवान्। प्रजामण्डलसत्याग्रहान्दोलनेषु दलनायकोऽयम् शासनेन बन्दीकृतः दण्डप्रहारैः पीडितश्च। जयपुरे यदा विद्यार्थिकांग्रेसस्य स्थापना जाता तदा पं. मदनमोहनोऽस्य मन्त्रिपदे नियुक्तः। सम्पूर्णराजपूतानाप्रदेशे भ्रामं-भ्रामम् आंग्लशासन-समाप्त्यै छात्रान् प्रैरयत्। १९४२ तमे ख्रिस्ताब्दे छात्रान्दोलने सक्रियो भूत्वा स्वप्रयासैः बृहच्छात्रसम्मेलनस्यापि आयोजनं कृतवान्। प्रजामण्डलेन संचालितं छात्रान्दोलनमस्यैव कठोरपरिश्रमेण साफल्यमवाप।

### १५. श्रीगिरिराजशास्त्री ( १९१९-२०१२ )

'दादाभाई' इति नाम्ना ख्यातः श्रीशास्त्रि-महोदयः राष्ट्रियस्वयंसेवकसंघस्य स्वयंसेवकः प्रचारकः, कार्यकर्ता च आसीत्। बाबासाहबआप्टे-महोदयानां प्रेरणया असौ १९५० तमे ख्रिस्ताब्दे दीपावलीतः भारतीमासपत्रिकायाः प्रकाशनं प्रारभत। गतपञ्चसप्ततिवर्षेभ्यः पत्रिकैषा निरन्तरं प्रकाश्यते। शास्त्रिमहोदयस्य अध्ययनकाले तस्य प्रयासेन महाराजसंस्कृतमहाविद्यालयस्य छात्राः आंग्लप्रधानमन्त्रिणः चर्चिलस्य आदेशपत्रस्य शवदाहं कृतवन्तः। शिक्षासमाप्त्यनन्तरमसौ योगाभ्यासप्रशिक्षणेन व्यायाममाध्यमेन च छात्रान् स्वतन्त्रतान्दोलनाय प्रेरयामास। स्वतन्त्रताप्राप्तितः पूर्वमेव असौ राष्ट्रीयस्वयंसेवकसंघस्य प्रचारकत्वेन संघटनकार्यं प्रारभत।

### १६. जयपुरस्थः महाराजसंस्कृतमहाविद्यालयः

मोहनलालआजाद-ईश्वरदास-हरिनारायण-सदृशाः छात्राः सहपाठिभिः अन्यैः छात्रैः सह स्वतन्त्रतान्दोलनं प्रारब्धवन्तः। अत्रत्याः श्रीहरिशास्त्रि-पंडितहर्षनारायण-रूपनारायण-पण्डितबिहारीलालशर्मप्रभृतयः शिक्षकाः अपि छात्रान् निरन्तरं प्रेरयन्ति स्म। अन्ये विद्वांसः वक्रोक्तिमाध्यमेन व्यङ्ग्यविधया च साहित्यरचना-द्वारा अपि जनान् प्रैरयन्। एवं स्वतन्त्रताप्राप्तयर्थं संस्कृतविदुषां निरन्तरं योगदानं येन-केन प्रकारेण प्रचलति स्म।

यथा समग्रेऽपि देशे जनाः स्वातन्त्र्यार्थं प्रयासरताः आसन् तथैव वीरप्रसविन्यां राजस्थान-धरायामपि वीराः स्वकष्टानि अविगणय्य निरताः अभूवन्। एतादृशेषु क्रान्तिकारिषु संस्कृतज्ञाः अपि बहवः आसन् एव। इतोऽपि बहवः स्युः येषां विवरणं प्राप्तुम् अहं न शक्तवान्, अतः तान् प्रति प्रणामाञ्जलीन् समर्प्य क्षमां याचे -

**अनुक्ता ये भक्ताः प्रभुचरणसंसक्तहृदया,**
**अविज्ञाता वीरा अधिसमरमुद्ध्वस्तरिपवः।**
**समाजोद्धर्तारः सुहितकरविज्ञाननिपुणाः,**
**नमस्तेभ्यो भूयात् सकलसुजनेभ्यः प्रतिदिनम्।।**

- संस्कृतभारतीन्यासजयपुरप्रान्तस्य **अध्यक्षः**
भारतीयसंस्कृतप्रचारसंस्थानस्य **उपाध्यक्षश्च**

क्रमशः

# सीमन्तसिन्दूरम्

❑ डॉ. महेशचन्द्रशर्मा गौतमः
(साहित्याकादेम्या पुरस्कृतः)

1. सिन्धुजलसंविदाया निरसनम्

1960तमे संवत्सरे भारतपाकिस्तानयोर्मध्ये सिन्धुजलविषये संविदाभूत्। तस्याः संविदाया अनुसारं पाकिस्तानं सिन्धुजलस्याशीतिप्रतिशतं निरन्तरमवापत्। तज्जलमेवावर्तिष्ट तस्य देशस्य जीवनरेखा। शत्रुदेशस्य सम्पूर्णा कृषिः सिन्धुजल एवाश्रितावर्तिष्ट। भारतशासनं तां सिन्धुजलसंविदां निरास्थत्। एतदवर्तिष्ट शत्रूणां कृषिव्यवस्थाया आधारस्यैव मूलोच्छेदनम्।

2. अटारीसीम्ना गमनागमनस्य विच्छेदः -

शत्रुभिः प्रवर्तिता दुष्टा आतङ्कवादिनश्छद्मवेशे अटारीसीम्नो मार्गेण भारतं प्रविश्य दुष्कृत्यान्याचारिषुः। अटारीसीम्ना गमनागमनस्य तत्कालप्रभावेण विच्छेदोऽवर्तिष्ट द्वितीयो निर्णयः।

टिप्पणी : संविदा - समझौता, निरास्थत् - रद्द कर दिया।

3. पाकिस्तानस्य नागरिकेभ्यः सार्कवीजायोजनाया निरसनम् -

दक्षिणएशियाईक्षेत्रीयसहयोगसंगठनस्य बंगलादेशभूटानभारतमालदीवनेपालपाकिस्तानाफगानिस्तानेत्यभिधेयानामष्टसङ्ख्यकानां देशानां समूहस्य नागरिकाणां मध्ये पारस्परिकसम्बन्धान् संवर्धयितुं केषाञ्चिन्नागरिकाणां सौविध्यार्थं वीजा इत्यभिधेयस्य यात्राप्रमाणपत्रस्य व्यवस्थावर्तिष्ट। भारतशासनं पाकिस्तानस्य नागरिकेभ्यः सार्कवीजेत्यभिधेयामिमां व्यवस्थां तत्कालप्रभावेण निरास्थत्। एषोऽवर्तिष्ट तृतीयो निर्णयः।

4. पाकिस्तानस्योच्चायोगात् सचिवानां निष्कासनम् -

भारतशासनं पाकिस्तानोच्चायोगस्य रक्षासचिवं नौसेनासचिवं वायुसेनासचिवञ्चाकालक्षेपेणैव भारतं परित्यज्य स्वदेशाय प्रस्थातुं निरदिक्षत्। एषोऽवर्तिष्ट चतुर्थो निर्णयः।

5. पाकिस्तानोच्चायोगस्याकारस्य न्यूनीकरणम्

भारते स्थिते पाकिस्तानस्योच्चायोगे पञ्चपञ्चाशत् कर्मचारिणोऽवर्तिषत। सम्प्रति भारतशासनं तेषु पञ्चविंशतिः कर्मचारिणो भारतं परित्यज्य स्वदेशाय प्रस्थातुं निरदिक्षत्, शत्रूणामुच्चायोगस्याकारञ्च केवलं त्रिंशत्कर्मचारिणामेवान्वज्ञासीत्।

भारतस्य वीरा आतङ्कस्य प्रवर्तकान्

पाकिस्ताने स्थितान् तेषां स्वामिनश्च, ते कुत्रापि निभृतं स्थिता भवेयुः, तानन्विष्य, तेषां गृहमवस्कत्य नियतमेव तान् गतजीवितान् विधास्यन्तीति प्रधानमन्त्रिमहाभागः सुव्यक्तमजूघुषत्। भारतशासनं भारते स्थितान् पाकिस्तानस्य नागरिकान् पञ्चदिनानां कालावधौ भारतं परित्यज्य गन्तुं निरदिक्षत्। भारतं पाकिस्तानेन सहायातनिर्यातादिसर्वविधान् व्यापारसम्बन्धान् निरास्थत्। समुद्रमार्गेण वा वायुमार्गेण वा पत्रादिमाध्यमेन वा तेन सह सर्वविधान् सम्बन्धान् भारतं व्यच्छैत्सीत्।

शासनं शतशः सन्दिग्धान् जनान् आसिध्यानुसन्धानपरीक्षणकार्ये संलग्नोऽस्थात्। चतुर्णामातङ्कवादिनां चित्राण्यपि दूरदर्शने समाचारपत्रेषु च प्रकाशितान्यभूवन्। शत्रूणां साहाय्यकारिणः केचन देशद्रोहिणो भारतस्य कश्मीरक्षेत्रेऽप्यवर्तिषत। अनुसन्धानपूर्वं पर्येषणेन ज्ञातमात्रे तेषां चरित्रे रक्षाबलानि तानन्वेषितुं प्रायतिषत। आसेधभयात् क्वचिदज्ञातस्थानं गत्वा निभृतं स्थितानां तेषां गृहानस्माकं रक्षाबलानि बुलडोजरेत्यभिधेयैर्यन्त्रैर्भूमिसाद् व्यधुः।

टिप्पणी : अवस्कत्य – आक्रमण कर के, घुसकर, पर्येषणेन – जांच पड़ताल से।

एन.आई.ए. इत्यभिधेया राष्ट्रियानुसन्धानकर्त्री संस्था पहलगामस्य बैसरनक्षेत्रे संवृत्ते जघन्येऽस्मिन् कृत्ये पाकिस्तानसैन्यबलस्य, आई.एस.आई. इत्यभिधेयस्य संस्थानस्य, लश्कर-ए-तैयबा इत्यभिधेयस्य समूहस्य च योगदानं सुव्यक्तमदाक्षीत्। अस्माकं सीमासुरक्षादलस्य वीराः सैनिका भारतीयसीम्नः क्षेत्रे एकं पाकिस्तानस्य सैनिकमासेधिषुः।

भारतशासनं लेख्यपत्रेण रहस्यमुदजीघटद् यत् पाकिस्तानं नैकेषु देशेष्वातङ्कस्य प्रवर्तकं राष्ट्रं वर्तते। अस्यातङ्कप्रवर्तनस्य कथा भारतस्य कश्मीरक्षेत्रमतिरिच्याफगानिस्तानरूसयूनाइटिड किंग्डमबंगलादेशपर्यन्तमपि प्रसृता वर्तते। विश्वे सर्वाधिको भयहेतुरस्त्ययं देशः। अनेन लेख्यपत्रेण सह भारतशासनं पाकिस्तानस्य पञ्जाबप्रान्ते, खैबरपख्तूनख्वाहप्रान्ते, वजीरिस्तानप्रान्ते, पाकिस्तानेनाधिकृते कश्मीरक्षेत्रे च शासनस्य साहाय्येन प्रवर्तमानानां प्रशिक्षण-केन्द्राणां सूचीमप्यन्ववबन्धद् यत्रातङ्कवादिनो निरन्तरं प्रशिक्ष्यन्ते। लश्कर-ए-तैयबा, जैश-ए-मोहम्मद, हिजबुल मुजाहिदीन, आई.एस. आई.एस. इत्यादीनां समूहैः आतङ्कस्य प्रवर्तकाः प्रशिक्ष्यन्ते। शस्त्राणां प्रयोगस्य प्रशिक्षणं ते एष्वेव केन्द्रेषु प्राप्नुवन्ति। आत्मघातिप्रवर्तनेभ्योऽपि ते तत्रैव सन्नद्धाः क्रियन्ते। पाकिस्तानस्य सैन्याधिकारिणः प्रायोऽस्मिन् प्रशिक्षणकार्ये सर्वविधं साहाय्यं यच्छन्ति।

टिप्पणी : अन्वबबन्धत् – नत्थी कर दिया, संलग्न कर दिया, सन्नद्धाः – तैयार।

यदा पाकिस्तानस्य रक्षामन्त्री ख्वाजाऽऽसिफो दूरदर्शने स्वयमङ्गीकारमकार्षीद् यत् पाकिस्तानशासनमातङ्कस्य प्रवर्तनायार्थं साहाय्यं त्रिंशद्वर्षेभ्यः विश्राणयति तदनन्तरं भारतशासनं सर्वमेतद् रहस्योद्घाटनमकार्षीत्। अस्मिन् लेख्यपत्रे भारतशासनं 2018 संवत्सरस्य पूर्वप्रधानमन्त्रिणो नवाजशरीफस्य स्वीकृतिमप्यववर्णद् यत् मुम्बईमहानगरे आतङ्कस्य प्रवर्तकानामाक्रमणे पाकिस्तानस्य लश्कर-ए-तैयबा इत्यभिधेयस्य समूहस्यावर्तिष्ट महार्था भूमिका। परवेजमुशर्रफोऽप्येतद्याथार्थ्यं निःसंकोचं स्वीकारमकार्षीद् यत् पाकिस्तानस्य सैन्याधिकारिणो जम्मूकश्मीरराज्ये आतङ्कस्य गतिविधीन् प्रवर्तयितुं तान् प्रशिक्षयन्ति।

लेख्यपत्रं पाकिस्तानस्य रक्षामन्त्रिण आसिफस्य स्वीकृतिमववर्णद् यत्तस्य देशस्त्रिभिर्दशाब्दिभिरातङ्कस्य प्रवर्तकानां समूहान् साहाय्यं विश्राणयति। न केवलं भारते नैकेष्वन्येषु देशेष्वप्यातङ्कं प्रवर्त्य पाकिस्तानमातङ्कस्य निर्यातकरूपेण कुख्यातोऽजनि। पाकिस्तानस्य आई.एस.आई. इत्यभिधेया संस्था अफगानिस्ताने तालिबानिनां समूहस्य हक्कानी इत्यभिधेयस्यातङ्कवादिनोऽनुयायिनाञ्च साहाय्यमकार्षीत्।

टिप्पणी : विश्राणयति – प्रदान करता है।

2008संवत्सरे काबुलनगरे भारतस्य दूतावासे, 2011संवत्सरे च संयुक्तराज्यामरीकाया दूतावासे बम्बवर्षणे तेषां साहाय्यं सुविज्ञातं वर्तते। 2024तमे संवत्सरे रूसदेशस्य मास्कोकंसर्ट-हालेत्यभिधेये स्थाने संवृत्ते आक्रमणेऽपि पाकिस्तानस्य भूमिकावर्तिष्टेत्यत्रापि नास्ति सन्देहः। जैश-उल-अदल इत्यभिधेयः पाकिस्तानस्य सुन्नी आतङ्कवादिनां समूहः सिस्तानक्षेत्रे बलूचिस्तानराज्ये च नैककृत्व ईरानदेशस्य सैन्यबलं लक्ष्यं व्यधात्। तदानीम् ईरानदेशः पाकिस्तानं सुव्यक्तमातङ्कवादिनां शरणस्थलीमातङ्कस्य प्रवर्तकञ्चाजूघुषत्। 2005 संवत्सरे लन्दननगरे बम्बवर्षणे पाकिस्तानस्य भूमिका नास्ति रहस्यस्य विषयः। संयुक्तराज्यामरीकाया वायुसैन्यबलम् अलकायदा इत्यभिधेयस्यातङ्कवादिनां समूहस्य नेतारं पाकिस्तानस्यैव संरक्षणे पाकिस्तानस्यैव अबोट्टाबादनगरे स्थितं कुख्यातमातङ्कवादिनम् ओसामाबिनलादेनम् अवस्कत्य गतजीवितं व्यधात्। भारतशासनं नैकेष्वन्येषु देशेष्वप्यातङ्कस्य प्रवर्तने पाकिस्तानस्य भूमिकां लेख्यपत्रे सविस्तरमववर्णत्। पाकिस्तानं वर्तते एको दुष्ट आतङ्कस्य प्रवर्तको देश इति प्रमाणयितुं पर्याप्तमेतन्मात्रम्।

– गौतम मार्किट, सनौरी गेट, पटियाला-147001
मो. – 97811-24775

# श्रीहनुमद्विभीषणकूटनिर्बन्धविमर्शः

❑ प्रो. सुरेन्द्रकुमारशर्मा

श्रीमद्वाल्मीकीयरामायणं नाम श्रीरामकथाया आदिममैतिहासिकं महाकाव्यं सर्वासां रामकथानामुपजीव्यमिति न तिरोहितं विदितवेदितव्यानाम्। तत्र हि प्रायशः सर्वत्र सर्वतोभावेन ऋजुपथगामिन्यपि श्रीरामकथा महाकवेः कवित्वप्रातिभवैशद्येन निगूढं पन्थानमपि क्वचित् क्वचित् समाश्रयते। तेन हि –

**'अर्थो गिरामपिहितः पिहितश्च कश्चित् सौभाग्यमेति मद्धहट्ट-वधूकुचाभः'** इत्युभियुक्तेः प्रामाणिकत्वं सिध्यति। इत्यम्भूतवैलक्षण्योपेतानि कानिचित् स्थलानि रामायणस्थानि समुद्घाटयितुं प्रस्तौमि यथाज्ञानं **'प्रांशुलभ्ये फले लोभादुद्वाहुरिव वामनः'** इति कविकुलगुरुकालिदासोक्तिप्रकाशे स्वकीयया स्वल्पया धिया।

महर्षिणा वाल्मीकिना हनुमद्विभीषणयोर्मध्ये तत्रैतादृशः सम्बन्धस्तु कश्चन नाभ्यधायि अभिधया, परं भङ्ग्यन्तरेण नैकत्र संकेतितः परिलक्ष्यते स एवात्र विमर्शविषयः।

श्रीसीतान्वेषणतत्परस्य श्रीहनुमतः लङ्कां प्रति प्रस्थितस्य समुद्रलङ्घनोपक्रमे समागतासु विविधासु बाधास्वन्ते सिंहिकया सह जाते संघर्षे हतां सिंहिकां वीक्ष्य महर्षिराकाशचारिणां भूतानां मुखेन हनुमतः धृतिदृष्टिमतिदाक्ष्यादिगुणानां प्राशस्त्यमाख्याति। तद्यथा –

**यस्य त्वेतानि चत्वारि वानरेन्द्र यथा तव।**
**धृतिर्दृष्टिर्मतिर्दाक्ष्यं स कर्मसु न सीदति।।**

– सुन्दरकाण्डे – १/२०१

श्रीहनुमान् न केवलं श्रीसीतान्वेषणं विधायैव प्रत्यावर्तिष्यत्यपितु किमप्यन्यत् तादृशं विलक्षणं कर्म कर्तुं प्रभविष्यति यन्न पूर्वं कल्पितं केनापि। एते पूर्वोक्ता गुणाः प्रकाशिता अपि लङ्काप्रवेशानन्तरं हनुमति लक्ष्यन्ते। यथाहि सीतादर्शनसंवादसमनन्तरमेव हनुमता राक्षसानां बलाबलमवगन्तुं रावणस्य प्रभावं द्रष्टुञ्च चिन्तितं यत् साम-दान-भेदाख्यैस्त्रिभिरुपायैस्तु एते राक्षसाः साध्याः न सन्ति – अतोऽन्य एव पराक्रमरूप उपाय अत्रोचितः। तद्यथा –

**अल्पशेषमिदं कार्यं दृष्टेयमसितेक्षणा।**
**त्रीनुपायानतिक्रम्य चतुर्थ इह दृश्यते।।**

– सुन्दरकाण्डे – ४१/२

अतो हेतोश्चतुर्थोपायेनाहं कृतकार्यः सन् इतो व्रजेयम्–

**'इहैव तावत् कृतनिश्चयो ह्ययं**
**व्रजेयमद्य प्लवगेश्वरालयम्।**
**परात्मसम्मर्दविशेषतत्त्ववित्**
**ततः कृतं स्यान्मम भर्तृशासनम्।।'**

– सुन्दरकाण्डे ४१/७

अपि च – **'ततः समासाद्य रणे दशाननं**
**समन्त्रिवर्गं सबलं सयायिनम्।**
**हृदि स्थितं तस्य मतं बलञ्च**
**सुखेन मत्वाहमितः पुनर्व्रजे।।'**

– सुन्दरकाण्डे – ४१/९

दुरूहमपि कार्यमेतद् हनुमान् स्वल्पमेव मन्यत इति तद्गुणानां वैशिष्ट्यं ख्यापयति। भाविनि समये कार्यसिध्यर्थमेव विचिन्त्य हनुमान् रावणस्य नन्दनोपमं प्रमदावनं विध्वंसयितुमारेभे। विध्वंसमेतं प्रतिरोद्धुं समागतानां राक्षसदलानां, सेनापतीनां, मन्त्रिपुत्राणां किमधिकं रावणात्मजस्य अक्षयकुमारस्यापि हनुमान् वधं चकार। ततश्च रावणप्रहितमेघनादप्रयुक्तब्रह्मास्त्रमर्यादया स्वात्मनो बन्धं स्वीचकार श्रीहनुमान् रावणेक्षणोत्सुकः। ततश्च राक्षसै रावणसभायां नीतोऽयं हनुमान् तत्र पृच्छायां श्रीरामदूतत्वेन स्वात्मानं परिचाय्य श्रीराममाहात्म्यं तत्सैन्यबलञ्च निर्भयतया प्रख्याप्य रावणं सीतां प्रत्यावर्तयितुं प्रबोधयति –

**तत् त्रिकालहितं वाक्यं धर्म्यमर्थानुयायि च।**
**मन्यस्व नरदेवाय जानकी प्रतिदीयताम्।।**

– सुन्दरकाण्डे ५१/२१

इति हनुमन्मुखात् तत्तदप्रियं वचः श्रुत्वा क्रोधमूर्च्छितो रावणस्तस्य वधमाज्ञापयत्। तत्र सभायामुपस्थितो रावणानुजो विभीषणस्तद् वचो नानुमेने। शास्त्रमर्यादया च बहुधा दूतस्यावध्यत्वं प्रतिपाद्य तद्वधं निराकर्तुमाचष्टे, परं कोपाविष्टो रावणो विभीषणपरामर्शं सर्वथा अनादृत्य स्वात्मनो निश्चयमेवाब्रवीत् –

**न पापानां वधे पापं विद्यते शत्रुसूदन।**
**तस्मादिमं वधिष्यामि वानरं पापकारिणम्।।**

– सुन्दरकाण्डे ५२/११

इत्येवं रावणस्य दृढविनिश्चयं विज्ञाय नीतिनिपुणो विभीषण अन्यमेव मार्गमाश्रयन् रावणं निवेदयति-यद्भवान् कमपि दण्डयितुमेवेच्छति चेत्तेष्वयं दण्डः पात्यतां यैरेषः कपिरत्र प्रेषितः। इदानीं भवन्मनसि अनुगामिनां राक्षसानां मनस्सु च यो युद्धोत्साहो वर्धमानस्तिष्ठति स न शमयितुं शक्यः कथञ्चिदपि कपेरस्य वधेन, न च नाशनीयोऽयमिदानीं स उत्साहः। यदि पुनरपि कपेरेवास्य वधोऽभीष्टः भवतां तर्हि चिन्तनीयम्- अस्मिन् विनष्टे सति नान्यं कमपि प्राणिनमहं पश्यामि यस्तौ विरुद्धौ दुर्विनीतौ राजपुत्रौ रामलक्ष्मणौ भवता सह युद्धाय समुद्योजयेदिति। अतश्च हे युद्धप्रिय लङ्केश! कपेरस्य वधः सर्वथा परिहार्यः –

**अस्मिन् विनष्टे नहि भूतमन्यं**
**पश्यामि यस्तौ नरराजपुत्रौ।**
**युद्धाय युद्धप्रिय दुर्विनीता-**
**वुद्योजयेद् वै भवता विरुद्धौ।।**

– सुन्दरकाण्डे ५२/२४

अत्र नरराजपुत्रौ पदस्य दुर्विनीताविति विशेषणपदं विभीषणस्वभावविरुद्धमपि यतः प्रयुक्तमिति कमपि तद्गूढाभिप्रायं सूचयति। एवमेव रावणस्य कृते 'युद्धप्रिय' सम्बोधनमपि विभीषणस्य नीतिनैपुण्यं ख्यापयति।

अपि च –

**पराक्रमोत्साहमनस्विनां च सुरासुराणामपि दुर्जयेन।**
**त्वया मनोनन्दन नैर्ऋतानां युद्धाय निर्नाशयितुं न युक्तम्।।**

– सुन्दरकाण्डे ५२/२५

इति विभीषणोक्तं स्वात्मनः प्रियं वचो निशम्य रावणस्तद्-वचांसि बुद्ध्या जग्राह। अन्यं कमपि निग्रहोपायं हनुमदुद्देश्यकमुद्विचिन्त्य रावणः समादिदेश तल्लाङ्गूलं दीपयितुम्। तथाहि –

**कपीनां किल लाङ्गूलमिष्टं भवति भूषणम्।**
**तदस्य दीप्यतां शीघ्रं तेन दग्धेन गच्छतु।।** इति।

– सुन्दरकाण्डे ५३/३

रामायणे अस्मिन्नेवावसरे महर्षिणा हनुमद्विभीषणयोः साम्मुख्यं प्रदर्शितं नेतः पूर्वं क्वचिदन्यत्र। अत्र हनुमन्तं प्रति विभीषणस्यार्द्रभावाभिव्यञ्जना समग्रस्थलपरिशीलनेनानु-भवितुं शक्या विशदान्तरात्मभिः सहृदयैः। एवंवार्द्रभावना हनुमद्वचस्यपि व्यक्तीभवति। कृतकार्यः सन् हनुमान् लङ्कातः प्रतिनिवृत्य यदा अङ्गदप्रमुखानां वानराणां सम्मुखमुपतिष्ठते तदा लङ्कागतं सकलं वृत्तं श्रावयता हनुमता यदुक्तं तत्कालीनानि वचांसि साधयन्ति तत्। तथाहि –

**तेन वध्योऽहमाज्ञप्तो राक्षसा रौद्रकर्मणा।**
**मत्प्रभावमविज्ञाय रावणेन दुरात्मना।।**
**ततो विभीषणो नाम तस्य भ्राता महामतिः।**
**तेन राक्षसराजस्य याचितो मम कारणात्।।**

– सुन्दरकाण्डे ५८/१४६, १४७

अत्र हनुमद्वचसि **'याचितो मम कारणात्'** इति श्लोकवाक्यांश एव कमप्यपूर्वं भावमभिव्यनक्ति। एषैव रचनाविच्छित्तिः प्रतीयमानत्वं परिभाषयति, यत्खलु प्रतिपादितमानन्दवर्धनाचार्येण –

**प्रतीयमानं पुनरन्यदेव**
**यस्त्वस्ति वाणीषु महाकवीनाम्।**
**यत् तत् प्रसिद्धावयवातिरिक्तं**
**विभाति लावण्यमिवाङ्गनासु।।** ध्वन्यालोक, १/४

लङ्कादहनप्रसङ्गे विभीषणगृहं वर्जयित्वा सर्वेषां भवनानि दहता हनुमता अपि तादृश एवार्द्रभावः प्रदर्शितः विभीषणं प्रति। तथा हि –

**वर्जयित्वा महातेजा विभीषणगृहं प्रति।**
**क्रममाणः क्रमेणैव ददाह हरिपुङ्गवः।।**

– सुन्दरकाण्डे ५४/१६

इतः पूर्वमपि श्रीसीताहनुमत्संवादे **'मम प्रतिप्रदानं हि रावणस्य न रोचते'** इत्यस्मिन् क्रमे –

**विभीषणेन च भ्रात्रा मम निर्यातनं प्रति।**
**अनुनीतः प्रयत्नेन न च तत् कुरुते मतिम्।।**

– सुन्दरकाण्डे ३७/९

इति सीता वचनोपन्यासः।

अत्र यदि सत्पथानुसारिणी विभीषणस्याचार-सरणिर्हेतुत्वेन मन्येत तर्हि रावणस्य सुसम्मतेन मेधाविना अविन्ध्यनाम-राक्षसेन एतद्विषये यत् परामृष्टं तदपि दुष्टात्मा रावणो न शृणोतीति सूचना सीतायै विभीषणज्येष्ठसुतया कलया दत्तेत्यत्र का वै निगूढा कथा? सीता स्वयमेव

हनुमन्तमेतत् सूचयति –

**ज्येष्ठा कन्या कला नाम विभीषणसुता कपे।**
**तया ममैतदाख्यातं मात्रा प्रहितया स्वयम्।।**
**अविन्ध्यो नाम मेधावी विद्वान् राक्षसपुङ्गवः।**
**रामात् क्षयमनुप्राप्तं राक्षसं प्रत्यचोदयत्।**
**न च तस्य च दुष्टात्मा शृणोति वचनं हितम्।।**

– सुन्दरकाण्डे ३७/११, १२, १३

अत्र तु स्पष्टतयाभिज्ञायते यत्र केवलं विभीषणः अपितु तस्य समग्रोऽपि परिवारः सीतां प्रति कियान् संवेदनशीलो यो हि तत्सम्बद्धां गुप्तमन्त्रणासूचनामपि तत्क्षणं सीतां प्रति प्रेषयति। तथैव सीतासंरक्षणे नियुक्तासु राक्षसीष्वपि नियोजिता त्रिजटा स्वप्नेऽपि लङ्कायां विभीषणस्य राज्याभिषेकं पश्यति। प्रतीयते- सापि विभीषणपक्षपातिनी एवासीत्। एवं न केवलं विभीषण एवापितु तत्परिवारस्तत्पक्षपातिनश्च सर्वेऽपि जना सीतां प्रति दयार्द्रभावमापन्नाः दृश्यन्ते। भात्यत्र विभीषणस्य कोऽपि सौहार्दसुगन्धः।

अस्यापरपक्षोऽपि विमर्शनीयः। यत्र युद्धकाण्डे रावणेन भृशमवमानितो विभीषणः –

**आत्मानं सर्वथा रक्ष पुरीं चेमां सराक्षसाम्।**
**स्वस्ति तेऽस्तु गमिष्यामि सुखी भव मया विना।।**

– यु.का. १६/२५

इति रावणमुक्त्वा पारेसमुद्रं श्रीरामसैन्यशिविरं प्रति शरणेच्छुः सन् स्वमन्त्रिभिः सह समागच्छत् गगनमार्गेण तत्रस्थ एव सुग्रीवं श्रीरामाय स्वात्मानं निवेदयितुं सूचयति –

**निवेदयत मां क्षिप्रं राघवाय महात्मने।**
**सर्वलोकशरण्याय विभीषणमुपस्थितम्।।**

– यु.कां. १७/१७

इति विभीषणवचः श्रुत्वा कोपाविष्टः सुग्रीवस्तत्र गत्वा श्रीरामं चतुर्भी राक्षसैः सह शरणमागतं विभीषणं निवेद्य तस्य निग्रहार्थमावेदयति –

**वध्यतामेष तीव्रेण दण्डेन सचिवैः सह।**
**रावणस्य नृशंसस्य भ्राता ह्येष विभीषणः।।**

यु.कां. १७/२९

सुग्रीवोक्तमिदं वचः श्रुत्वा श्रीरामस्तत्रस्थान् सुग्रीवप्रमुखान् कपीन् विषयेऽस्मिन् स्वस्वविचारान् प्रकटयितुं निर्दिष्टवान्। तदैकैकशः स्वमतमुपस्थातुमुपक्रमन्ते ते –

तत्राङ्गदः प्रथममुवाच '**विभीषणपरीक्षार्थमुवाच वचनं हरिः।।**' यु.कां. १७/३८ इति।

ततः शरभः – '**क्षिप्रमस्मिन् नरव्याघ्र चारः प्रतिविधीयताम्।।**' इत्युवाच (यु.कां. १७/४३)

ततो विचक्षणो **जाम्बवान्** –

**बद्धवैराच्च पापाच्च राक्षसेन्द्राद् विभीषणः।**
**अदेशकाले सम्प्राप्तः सर्वथा शङ्क्यतामयम्।।**

– (यु.कां. १७/४६)

अन्ते क्रमेऽस्मिन् –

**'न वादान्नापि संघर्षान्नाधिक्यान्न च कामतः।।**
**वक्ष्यामि वचनं राजन् यथार्थं रामगौरवात्।।'**

– यु.कां. १७/५२

इति प्रतिज्ञाय श्रीमान् **हनुमान्** एकैकशः पूर्वसचिवोक्तवचांसि सर्वथा निरस्यन् सतर्कं स्वमतमाचष्टे विभीषणागमनस्यौचित्यं प्रतिपादयन् –

**दौरात्म्यं रावणे दृष्ट्वा विक्रमं च तथा त्वयि**
**युक्तमागमनं ह्यत्र सदृशं तस्य बुद्धितः।।** यु.कां. १७/५७

**न त्वस्य ब्रुवतो जातु लक्ष्यते दुष्टभावता।**
**प्रसन्नं वदनं चापि तस्मान्मे नास्ति संशयः।।** यु.कां. १७/६२

**देशकालोपपन्नं च कार्यं कार्यविदां वर।**
**सफलं कुरुते क्षिप्रं प्रयोगेणाभिसंहितम्।।** यु.कां. १७/६५

**यथाशक्ति मयोक्तं तु राक्षसस्यार्जवं प्रति।**
**प्रमाणं त्वं हि शेषस्य श्रुत्वा बुद्धिमतां वर।।** यु.कां. १७/६८

इत्येवं हनुमद्वचनश्रवणसमकालमेव श्रीराम उवाच यद् हनुमता तु मन्मनोगतमेवाभाणि (युद्धकाण्डे –१८/१) –

**अथ रामः प्रसन्नात्मा श्रुत्वा वायुसुतस्य ह।**
**प्रत्यभाषत दुर्धर्षः श्रुतवानात्मनि स्थितम्।।**

अथ च सर्वानुदीक्ष्य ईषदुत्स्मयमानः श्रीरामो लक्ष्मणं हनुमद्वचनप्राशस्त्यं प्रत्यभाषत। तथाहि –

**अनधीत्य च शास्त्राणि वृद्धाननुपसेव्य च।**
**न शक्यमीदृशं वक्तुं यदुवाच हरीश्वरः।।** इति।

– युद्धकाण्डे १८/८

तत्क्षणमेव च स्वात्मनः शरणागतवत्सलताद्वारेण विभीषणमानेतुं सुग्रीवं समादिदेश। तथाहि –

**सकृदेव प्रपन्नाय तवास्मीति च याचते।**
**अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं मम।**
**आनयैनं हरिश्रेष्ठ दत्तस्याभयं मया।**
**विभीषणो वा सुग्रीवो यदि वा रावणः स्वयम्।।**इति।

– युद्धकाण्डे १८/३३, ३४

ततः श्रीरामादिष्टः सुग्रीवोऽपि हनुमता एष विभीषणः अनुमानात् भावाच्च सम्यक् सुपरीक्षित इति मनस्यवधार्य ममान्तरात्मा अप्येनं विभीषणं शुद्धं वेत्तीति न्यवेदयत् –

**मम चाप्यन्तरात्मायं शुद्धं वेत्ति विभीषणम्।**
**अनुमानाच्च भावाच्च सर्वतः सुपरीक्षितः।।**

– युद्धकाण्डे – १८/३७

एवं विभीषणे शरणमापन्ने श्रीरामस्तं राक्षसानां रावणस्य च बलाबलमाख्यातुं समादिदेश। तदनु विभीषणश्च यथापृष्टं रावणस्य तत्सेनापतीनाञ्च बलाबलं सरहस्यं श्रीरामाय न्यवेदयत्।

एतेन समग्रेण समीक्षणेन सम्प्राप्तं भवति यदनयोः श्रीहनुमद्विभीषणयोः आसीत् कश्चन निगूढः पारस्परिक-निर्बन्धविशेष इति।

यद्यपि रामायणे तु राक्षसानां गृहाद् गृहं सीतां विचिन्वन् हनुमान् –

**अवप्लुत्य महावेगः प्रहस्तस्य निवेशनम्।**
**ततोऽन्यत् पुप्लुवे वेश्म महापार्श्वस्य वीर्यवान्।।**
**अथ मेघप्रतीकाशं कुम्भकर्णनिवेशनम्।**
**विभीषणस्य च तथा पुप्लुवे स महाकपिः।।**

– सुन्दरकाण्डे ६/१७, १८

इत्येवं यथा अन्येषां गृहं पुप्लुवे तथैव सामान्येन विभीषणस्यापि गृहं संपुप्लुवे स हनुमान्, तथात्वे विभीषणेन सह सम्भाषायास्त्वत्रावकाश एव न लक्ष्यते। परं महात्मना गोस्वामिना श्रीतुलसीदासेन रामचरितमानसे अत्रैवास्मिन् प्रसंगे हनुमद्–विभीषणयोः समागमः संलापश्च विसृष्टौ। तद्यथा – रामचरितमानसे सुन्दरकाण्डे पञ्चमदोहातः अष्टमदोहां यावन्मध्ये प्रसंगोऽयं द्रष्टुं शक्यस्ततो विस्तरभयान्निदर्शनानि कानिचित् प्रस्तूयन्तेऽत्र प्रसंगवशात्। तद्यथा –

**भवन एक पुनि दीख सुहावा।**
**हरि मंदिर तहँ भिन्न बनावा।।**
**रामायुध अंकित गृह सोभा बरनि न जाइ।**
**नव तुलसिका बृन्द तहँ देखि हरष कपिराइ।।**

दोहा-५।। सुन्दरकाण्ड

**मन महुँ तरक करैं कपि लागा।**
**तेहीं समय बिभीषनु जागा।।**
**राम राम तेहिं सुमिरन कीन्हा।**
**हृदय हरष कपि सज्जन चीन्हा।।**
**एहि सन हठि करिहउँ पहिचानी।**
**साधु ते होइ न कारज हानी।।**
**विप्ररूप धरि बचन सुनाए।**
**सुनत बिभीषण उठि तहँ आए।।**
**करि प्रनाम पूँछी कुसलाई।**
**बिप्र कहहु निज कथा बुझाई।।**
**तब हनुमंत कही सब रामकथा निज नाम।**
**सुनत जुगल तन पुलक मन मगन सुमिरि गुनग्राम।।**

– सुन्दरकाण्ड दोहा –६

श्रीहनुमद्वृत्तान्तं तन्मुखात् श्रीरामकथाञ्च श्रुत्वा विभीषणः स्वाभिलाषं प्रकटयन्नाह –

**सुनहु पवनसुत रहनि हमारी।**
**जिमि दसनन्हि महुँ जीभ बिचारी।।**
**तात कबहुँ मोहि जानि अनाथा।**
**करिहहिं कृपा भानुकुल नाथा।।**

श्रुत्वैतादृशं विभीषणमनोऽभिलषितं श्रीहनुमान् श्रीरामस्य शरणागतवात्सल्यभावमभिव्यनक्ति। ततश्च निज-प्रयोजनं प्रकटयति –

**तब हनुमंत कहा सुनु भ्राता।**
**देखी चहउँ जानकी माता।।**
**जुगति बिभीषण सकल सुनाई।**
**चलेउ पवनसुत बिदा कराई।।**

एवं संप्रतिपद्यते यदत्र गोस्वामिना कृतनिर्बन्धस्यास्य हार्दमेव समासेन समुद्घाटितम्। अन्येऽप्यत्र पक्षाः समालोचनीयत्वेन समापतन्ति, परं लेखमर्यादया विरमाम्यत्रैवानल्पजल्पनप्रसंगादिति **शम्**।

– **निदेशकचरः**, राजस्थानसंस्कृतशिक्षाविभागस्य,
राजस्थानसंस्कृतअकादम्याश्च
सहसम्पादकः, 'भारती' संस्कृतमासपत्रिकायाः
दूरभाषाङ्कः – ९८८७८५२९७२

# सा 'भारती' पत्रिका

❑ पं. ताराशङ्करपाण्डेयः

### संकल्पितं मानसे

शास्त्राणां सरसी भवेन्नवरसी पुष्टा विचारैर्नवै-
रित्याधृत्य प्रधानपूरुषवरैः संकल्पितं मानसे।
विद्वत्स्थापितपत्रिका नवनवा या भारती-संस्कृता
ख्याता संस्कृत-भारती विजयते देशे विदेशेषु सा ॥१॥

### या संस्कृता भारती

प्रारब्धाम्बरबाणशेवधिधरा-दीपावलीपर्वतो*
बाबासाहबदिष्टमार्गप्रसरा या संस्कृता भारती।
यस्याः श्रीगिरिराजशास्त्रिप्रयतैः सिद्धः प्रबन्धोऽररे!
ख्याता संस्कृत-भारती विजयते देशे विदेशेषु सा ॥२॥
( *सन् १९५० दीपावलीतः पत्रिकाप्रारम्भ इति।)

### संस्थापकौ विश्रुतौ

बाबासाहबनामवित्तसुजनोमाकान्त आप्टे तथा
दाधीचो गिरिराजशास्त्रिविबुधः संस्थापकौ* विश्रुतौ।
पीठाधीशमहन्तसन्तमणयो यस्या हि संरक्षकाः
ख्याता संस्कृत-भारती विजयते देशे विदेशेषु सा ॥३॥
( *संस्थापक- बाबासाहब उमाकान्त आप्टे तथा
दादाभाई गिरिराज शास्त्री)

### लोकाय या पत्रिका

सिद्धा संघविशेषकल्परचना स्यादर्थयोगाय वै
तत्संघेन प्रसारिता हि सततं लोकाय या पत्रिका।
सैवाद्यापि प्रकाश्यते सुमनसां भक्तैः सुदामादिभिः
ख्याता संस्कृत-भारती विजयते देशे विदेशेषु सा ॥४॥

### प्रारम्भपृष्ठे नवम्

पद्यं मांगलिकं सुरार्चितपदं प्रारम्भपृष्ठे नवं
नित्यं वै सुषमं तथर्तुचरितं मासावतारास्पदम्।
नित्यं वै विरचय्य कोविदवरैः सम्पादकैः स्थाप्यते
ख्याता संस्कृत-भारती विजयते देशे विदेशेषु सा ॥५॥

### स्तम्भं विशेषं लिखन्

आयुर्वेदप्रसारणाय निरतो स्तम्भं विशेषं लिखन्
गौड़श्रीबनवारिलालधिषणः शोधात्मलेखाँस्तथा।
नारीस्तम्भविशेषलेखनपरा राजेश्वरी राजते
ख्याता संस्कृत-भारती विजयते देशे विदेशेषु सा ॥६॥

### दासो हि सम्पादकः

स्वामिश्रीः प्रथमः सुधीः सुरजनो दासो हि सम्पादकः
तत्पश्चादपि वृद्धिचन्द्रविबुधो धर्मोपदेष्टाभवत्।
यस्याः श्रीकविमञ्जु-भट्टमथुरा-नाथश्च सम्पादकः
ख्याता संस्कृत-भारती विजयते देशे विदेशेषु सा ॥७॥

### प्राज्ञाश्च साहित्यिकाः

काव्यात्माशुकविः स तान्त्रिकहरिः शास्त्री च सम्पादकः
शास्त्रिश्रीजगदीशनाम सुकृती प्राज्ञाश्च साहित्यिकाः।
नानाकाव्यकलाधराधर-कला-नाथोपि सम्पादकः
ख्याता संस्कृत-भारती विजयते देशे विदेशेषु सा ॥८॥

### सम्पादकः साम्प्रतम्

प्यारेमोहनविज्ञता सुविदिता सम्पादनालोकने
श्रीकृष्णः* पदशास्त्रवित् परतरः सम्पादकः साम्प्रतम्।
श्री-श्रीरामसुरेन्द्रहिन्दहरिभिः* सार्कं त्रिपाठी शिवः
ख्याता संस्कृत-भारती विजयते देशे विदेशेषु सा ॥९॥
( ***सम्पादक**- श्रीकृष्णशर्मा तथा
सहसम्पादक- श्रीरामदवे, सुरेन्द्रशर्मा, हिन्दकेसरी तथा
शिवशरणत्रिपाठी)

**श्रीश्रीनिवासैर्बुधैः**

या प्राचीनतमास्ति जीवति वरं सा 'भारती' पत्रिका
तद्धेतोश्च पुरस्कृता सुकृतिभिः श्रीश्रीनिवासैर्बुधैः*।
प्रज्ञाश्रीलसरस्वतीसुतवरैः संसेव्यमाना सदा
ख्याता संस्कृत-भारती विजयते देशे विदेशेषु
सा ॥१०॥

(*श्रीनिवास वरखेडी, कुलपति के.सं.वि.वि. द्वारा भारती पत्रिका को प्रशस्तिपत्र के साथ एक लाख रुपए।)

**जीव्याच्चिरं मासिकी**

या पञ्चाश्चशरत्सरानवरतं ज्ञानोदया सोज्ज्वला
चेतःकौस्तुभरत्नवद्विलसतात् संख्यावतां काशताम्।
श्लाघ्या काव्यकथादिलेखललिता जीव्याच्चिरं मासिकी
ख्याता संस्कृत-भारती विजयते देशे विदेशेषु सा ॥११॥

इति जयपुरवास्तव्येन राष्ट्रपतिसम्मानित-प्रतिनवबाणभट्ट-पण्डितश्रीमोहनलालशर्मपाण्डेयात्मजेन श्रीकल्लाजीवैदिक-विश्वविद्यालय- कुलपतिचरेण प्रोफेसर(डॉ.) ताराशंकरशर्मपाण्डेयेन प्रणीतं 'सा 'भारती' पत्रिका' नामैकादशी काव्यं सम्पूर्णम्।

– २३८१, पाण्डेय भवन, खजाने वालों का रास्ता,
जयपुर (राज.)३०२००१
मो. ९८२९२७१३५१

संस्कृत-समाचारः

## राष्ट्रपतिसम्मानितः संस्कृत-मनीषी डॉ. रामजी ठाकुरः कीर्तिशेषं गतः



जन्म- १२.०५.१९३५
निधनम् - ०९.१०.२०२५

'मेवाडस्वाभिमानम्' 'वीरसावरकरचरितम्' इतयादिविंशति-संख्यातोऽप्यधिक-मौलिकरचनाकर्तुर्महामहिम-राष्ट्रपतिसम्मानितस्य बिहारप्रान्ते दरभङ्गामण्डलान्तर्गत-धर्मपुर- ग्रामे लब्धजन्मनो मैथिलपण्डितस्य **डॉ. रामजी ठाकुरा**भिध-संस्कृत-विदुषो नवतिवर्षदेशीयस्य स्वनिवासस्थाने ०९.१०.२०२५ दिनाङ्के निधनं जातम् । संस्कृतजगतोऽनेनापूरणीया क्षतिः। 'भारती' संस्कृत-मास-पत्रिकापरिवारोऽस्मै मनीषिणे सादरं श्रद्धाञ्जलीन् समर्पयन् शोकसंतप्तपरिवारं प्रति समवेदनां प्रकटयति-

'भारती' पत्रिका-**सम्पादकः**

# राष्ट्रस्य सर्वाङ्गीणविकासस्य आधारः नियमितसंघशाखा*

❑ डॉ. नन्दसिंहनरूकाः

संस्कारितस्वत्वबोधेन दीक्षिताः कार्यकर्तार एव राष्ट्रपुनर्निर्माणस्य सङ्कल्पनां साकारीकर्तुं शक्नुवन्ति। १९२५ तमे ईस्वीयवर्षे विजयदशमीदिने डॉक्टर हेडगेवारमहोदयेन कार्यकर्तृनिर्माणार्थं राष्ट्रीयस्वयंसेवकसंघस्य स्थापना कृता। संघकार्यं व्यक्तिनिर्माणकार्यमस्ति। एतन्निमित्तं एका अद्वितीया पद्धतिः आविष्कृता यस्याः नाम अस्ति- '**संघशाखा**' इति। संघशाखा एतादृशं शक्ति-केन्द्रमस्ति यतः निर्गताः शिक्षितदीक्षितकार्यकर्तारः समाजजीवनस्य नैकेषु क्षेत्रेषु राष्ट्रस्य सर्वाङ्गीणोन्नत्यर्थं संलग्नाः सन्ति।

१९७२ तमे ईस्वीयवर्षे यदा अहम् राष्ट्रीय-स्वयंसेवकसंघस्य शाखां गन्तुम् आरब्धवान् तदा नवमीकक्षायाः छात्रः आसम्। शाखायां दण्डचालनं शिक्ष्यते इति विचार्य एव गतवान् किन्तु तत्रत्यानां कार्यकर्तृणां निःस्वार्थप्रेम, व्यक्तित्वं, चारित्र्यं दृष्ट्वा व्यक्तिनिर्माणस्य कार्यक्रमैः प्रभावितो भूत्वा च दृढरूपेण संयुक्तोऽभवम्। तदानीं राजस्थानस्य प्रान्तप्रचारकः आसीत् श्रीब्रह्मदेवमहोदयः। माननीयानां सोहनसिंह-किशनभैया-हस्तीमल मूलचन्द-सुरेशजी - कैलाशचन्द्र-दुर्गादास-रामप्रसाद-जुगलजी-महेशजी-माणकजी-राजेन्द्रजी-पुरुषोत्तमजी-लक्ष्मीनारायण-महेन्द्रजी सदृशानां समर्पितप्रचारकाणां जीवनं दृष्ट्वा संघम् अवगन्तुं प्रयासरतोऽभवम्। माननीयब्रह्मदेवमहोदयस्य बौद्धिकं श्रुत्वा भारतमातुः कृते किमपि कर्तुं मनसि उत्साहस्य जागरणं भवति स्म। तस्य कथनम् आसीत् यत् विवेकानन्दः भारतीयसंस्कृतेः भारतीयविचारस्य हिन्दुत्वस्य च डिंडिमघोषं कृतवान् विश्वे। किन्तु सः दृष्टवान् यत् 'भारतवर्षम्' अस्माकं देशः पराधीनः अस्ति। जनाः बुभुक्षिताः, अशिक्षिताः, अस्वस्थाः निर्धनाश्च सन्ति। अतएव स्वामिविवेकानन्दवर्यः जनजागरणं कर्तुम् आरब्धवान्। विशेषरूपेण दुर्बलानां यूनां च आह्वानं कुर्वन् सः कथयति स्म- 'गीताध्ययनस्य अपेक्षया पादकन्दुक-क्रीडाद्वारा ईश्वरसामीप्यं सरलतया प्राप्तुं शक्यते।' आवश्यकता अस्ति वीर्यवतां, श्रद्धासम्पन्नानां, तेजस्विनां दृढविश्वासयुक्तानां निष्कपटानां यूनाम्। इतोऽपि तस्य कथनमासीत्- 'यदि अहं १०० ऊर्जावतः युवकान् अलप्स्ये तर्हि देशस्य दशां दिशां च परिवर्तयितुम् अशक्ष्यम्। केवलं स एव जनः सर्वापेक्षया उत्तमरूपेण कार्यं करोति यः पूर्णतया स्वार्थरहितः, धनलिप्सारहितः, कीर्तिलिप्सारहितश्च भवति। आगामिषु वर्षेषु स्वमस्तिष्कात् सर्वान् देवान् बहिः करोतु, अस्माकं राष्ट्रम् एकमेव जाग्रत् देवोऽस्ति। एवं कृते सति सः बुद्धः भवति। तस्य अन्तःकरणात् एतादृशी शक्तिः प्रकटिता भविष्यति या संसारस्य अवस्थां सम्पूर्णरूपेण परिवर्तयितुं शक्ष्यति।'

**संघशताब्दः** चलति, अद्य वयं वक्तुं शक्नुमः यत् स्वामिविवेकानन्दः यादृशानाम् १०० ऊर्जावतां

* हिन्दीमूलस्यानुवादको डॉ. नाथूलालसुमनः

युवकानां प्राप्तिविषये कथितवान् तादृशाः सहस्रशः लक्षशः युवकाः कार्यकर्तारः संघशाखाद्वारा निर्मिताः सन्ति, ते समाजजीवनस्य विभिन्नेषु क्षेत्रेषु कार्यं कुर्वन्तः सन्ति। ते विषमपरिस्थितिष्वपि देशे सकारात्मकं वातावरणं निर्मितवन्तः। स्वदेशस्य अन्यदेशानां च कोटिशः जनाः अद्य संघसंबद्धाः सन्ति। संघशाखाद्वारा निर्मितकार्यकर्तॄणां परिणामस्य फलमिदम्। राष्ट्रियस्वयंसेवकसंघः विश्वस्य बृहत् स्वैच्छिकं सांस्कृतिकम् अराजनीतिकं संघटनम् अस्ति। अद्य सर्वत्र स्वार्थमयवातावरणम् अस्ति किन्तु संघद्वारा निःस्वार्थकार्यकर्तॄणां निर्माणं चलति इति जनानाम् आश्चर्यम्। एतत् सर्वं नियमितदैनिक-संघशाखाद्वारा तस्याः विशिष्टकार्यपद्धतिद्वारा एव सम्भूतम्।

**संघकार्यपद्धतिवैशिष्ट्यम् -**

परम्परागतसामाजिककार्यप्रणालीतः भिन्ना 'शाखापद्धतिः' आविष्कृता संघसंस्थापकेन डॉक्टरकेशवबलिरामहेडगेवारमहोदयेन स्व-प्रतिभया। अनुशासनपूर्वकं सञ्चाल्यमानायाम् अस्यां पद्धत्यां स्थायिसंस्कारदानक्षमता अस्ति। नियमित-समयदानस्य स्वभावः अस्याः पद्धत्याः वैशिष्ट्य-मस्ति। एवं शनैः शनैः जना राष्ट्राय जन-मन-धनसमर्पणार्थं सिद्धाः भवन्ति। अत्र दैनिकसंघ-शाखायाः किञ्चित् वैशिष्ट्यम् इतोऽपि द्रष्टव्यम् -

१. **नियमितैकत्रीकरणम्** - राष्ट्रीयस्वयंसेवक-संघस्य लक्ष्यम् अस्ति 'राष्ट्रस्य परमवैभवम्'। एतन्निमित्तं हिन्दुसंघटनम्। हिन्दुसंघटनस्य आधारोऽस्ति - नियमिताभ्यासेन संस्कारयुक्त-व्यक्तिनिर्माणम्। संघशाखायां नियमितैकत्री-करणमाध्यमेन विभिन्नकार्यक्रमाणां रचना भवति। कार्यक्रमैः व्यक्तिषु गुणनिर्माणं भवति। एतस्य सुपरिणामः अधुना दृश्यते।

२. **व्यक्तिकेन्द्रितसंस्कारः** - जनैः सह सम्पर्कं कृत्वा तान् संघशाखायाम् आनयन्ति स्वयंसेवकाः, तत्र विभिन्नकार्यक्रमैः संस्कारनिर्माणं, तत्पश्चात् जनानां योग्यतानुसारं कार्ये नियोजनम्। एवं लोकसम्पर्क-लोकसंग्रह-लोकसंस्कार-लोक-नियोजनानाम् अद्वितीया पद्धतिः अस्ति संघशाखा।

३. **कार्यक्रमरचना** - पूर्वनिश्चितसमये स्थाने च एकीभूय एकहोरापर्यन्तं विभिन्नकार्यक्रमैः शारीरिक-मानसिक-बौद्धिकविकासार्थं स्वयं-सेवकाः क्रीडन्ति, गीतं गायन्ति, चर्चां कुर्वन्ति, समाचारसमीक्षां कुर्वन्ति, प्रतिदिनम् अन्ते च प्रार्थनां कुर्वन्ति। मार्गे सम्पर्कं कुर्वन्तः गृहम् आगच्छन्ति।

४. **तत्त्वनिष्ठा** - संघपरम्परायां गुरुस्थाने कोऽपि व्यक्तिः नास्ति अपितु केशरवर्णध्वजः अस्ति। हिन्दुसमाजे केशरवर्णस्य महत्त्वपूर्णं स्थानं वर्तते। केशरवर्णः त्याग-तपस्या-बलिदानानां प्रतीकः अस्ति, अतएव प्रेरणास्पदम् अस्ति।

५. **प्रचारकव्यवस्था** - संघकार्यस्य आधारस्तम्भाः सन्ति प्रचारकाः, ते तु सामान्यवेशे संन्यासिनः सन्ति। राष्ट्रकार्यार्थं स्वजीवनं संघटनाय समर्पयन्ति प्रचारकाः। संघयोजनानुरूपं यत्र प्रेष्यन्ते तत्र गत्वा सम्पूर्णसामर्थ्येन कार्यं कुर्वन्ति। अन्ये स्वयंसेवकाः कार्यकर्तारश्च तेभ्यः प्रेरणां प्राप्नुवन्ति।

६. **गुरुदक्षिणापद्धतिः** - संघस्वयंसेवकाः प्रतिदिनं

तनु-मनःसमर्पणपूर्वकं कार्यं कुर्वन्ति। वर्षे एकवारम् एकस्मिन् दिवसे गुरोः समक्षं धनसमर्पणमपि कुर्वन्ति। एतेन धनेन एव आवर्षं संघकार्यं चलति। **संघकार्यार्थं स्वयंसेवकेतरजनेभ्यः धनं नैव** स्वीक्रियते। अतएव राष्ट्रीयस्वयंसेवकसंघः स्वावलम्बि संघटनम् अस्ति। एषा गुरुदक्षिणापरम्परा अस्माकं पुरातनी परम्परा अस्ति।

**७. एकचालकानुवर्तिसंघटनम्** – सर्वे कार्यकर्तारः मिलित्वा, विचार्य च सामूहिकनिर्णयं कुर्वन्ति। एवं संभूय यः निर्णयः भवति स एव अधः पर्यन्तं गच्छति। व्यक्तिगतमतम् उपस्थापयन्ति कार्यकर्तारः किन्तु सामूहिकनिर्णयानन्तरं सः निर्णयः सर्वेषां भवति, सर्वे अनुपालयन्ति।

**८. परिवारकल्पना** – संघकार्यपद्धतिः परिवारभावनाधारिता अस्ति। यथा परिवारे सर्वेऽपि सदस्याः अन्यसदस्यानां सम्मानपूर्वकं स्व-स्व कर्त्तव्यपालनं कुर्वन्ति तथैव संघकार्यकर्तारः अपि सात्त्विकप्रेमपूर्वकं संघकार्यं कुर्वन्ति। अधिकार-याचनां विनैव केवलं कर्त्तव्यपालनमेव कुर्वन्ति।

**९. प्रसिद्धपराङ्मुखता** – संघकार्यकर्तारः कर्त्तव्यभावनया कार्यं कुर्वन्ति, ते कदापि स्वप्रसिद्धिं न इच्छन्ति। धनपदकीर्तिकामनापूर्वकं कार्यं न कुर्वन्ति। लघुकार्यं भवतु बृहद्कार्यं वा भवतु सर्वं ते निष्ठापूर्वकं मनोयोगपूर्वकं च कुर्वन्ति।

**१०. अनुशासनम्** – स्वयंसेवकाः परस्परं सम्मानपूर्वकं वार्तालापं कुर्वन्ति। कार्यक्रमेषु अनुशासनस्य पालनं भवति। समयेन सर्वे कार्यक्रमाः सम्पद्यन्ते। दैनन्दिनशाखायां यत्र कार्यक्रमाः भवन्ति तत् स्थानं '**संघस्थानं**' कथ्यते तस्य प्रभाविव्यवस्था भवति।

**११. कार्यकर्तृगोष्ठीपरम्परा** – सम्पन्नकार्यक्रमाणां समीक्षा भाविकार्यक्रमाणां योजनानिर्माणं च गोष्ठीषु भवतः। सम्पूर्णवर्षस्य कार्यक्रमाणां पूर्वयोजना पूर्णयोजना च निर्मीयते। एवं समयबद्धकार्ययोजना सुनिश्चिता भवति।

यद्यपि समाजे संघं प्रति अधिकांशजनानां सकारात्मकभावः अस्ति तथापि केचन जनाः स्वार्थवशात् भ्रान्तिनिर्माणं कुर्वन्ति। जाति-भाषा-पंथ-प्रान्तनाम्ना विभेदं रचयन्ति ये तान् प्रति अवधानपूर्वकं व्यवहारः करणीयः अस्माभिः, जनजागरणं च करणीयम्। संघशताब्दकालेऽस्मिन् संघसंस्थापकडॉक्टरकेशवबलिरामहेडगेवार-महोदयस्य स्वप्नं साकारीकर्तुं नगरेषु ३ प्रतिशतं जनान् ग्रामेषु च १ प्रतिशतं जनान् सक्रियस्वयंसेवकान् कर्तुं वयं व्यक्तिगतरूपेण सामूहिकरूपेण च यतामहे।

संघकार्यं सर्वव्यापि सर्वस्पर्शि च कर्तुम् अनवरतं प्रयासरताः भवाम। ये जनाः संघविरोधिनः सन्ति तेषां मुखमुद्रणम् अस्माकं कार्यद्वारा करवाम। यथा अर्जुनस्य प्रतिज्ञाव्याजेन मैथिलीशरणगुप्तः उक्तवान् -

**साक्षी रहे संसार करता हूँ प्रतिज्ञा पार्थ मैं,**
**पूरा करूंगा कार्य सब कथानानुसार यथार्थ मैं।**
**जो एक बालक को कपट से मार हंसते हैं अभी,**
**वे शत्रु सत्वर शोक-सागर-मग्न दिखेंगे सभी।।**

– राजस्थानकर्मचारिचयनमण्डलस्य अध्यक्षचरः

# दीपावलिः

❑ डॉ. प्रीति आर. पुजारा

दीपरश्मिप्रभा भ्राजतां भूतले
नीलराजिः प्रगाढं निरस्तं भवेत्।
रिद्धिसिद्धिप्रदोऽयं भवेदुत्सवः
शुभ्रदीपावलिस्तन्तनोतु श्रियम्॥१॥

स्नेहसौहार्दभावस्सदा वर्धताम्
द्वेषहिंसानलः सद्य निवार्यताम्।
विश्वमेकं कुटुम्बं भवेत् भूतले
शुभ्रदीपावलिस्तन्तनोतु श्रियम्॥२॥

प्रेयमार्गे गतिः कामये मङ्गला
ध्येयमार्गस्तु विघ्नं विना राजताम्।
देवलोकेऽपि यद् दुर्लभं तत्सुखं
प्रार्थयेऽहं प्रभो! केतने केतने॥३॥

ज्वालयन्ति जना दीपकानुत्सवे
प्राङ्गणे प्राङ्गणे राजमार्गे तथा।
प्रार्थ्यते दीपको मङ्गलार्थं मुदा
शुभ्रदीपावलिस्तन्तनोतु श्रियम्॥४॥

किन्तु निर्वापणीया मया भूतले
अद्य केचित् प्रदीपा सखे! यत्नतः।
सन्ति केचिद् यथा क्षीयमाणाश्शनै-
स्तत्र तैलं नवं पूरणीयं मया॥५॥

भान्ति केचित् प्रदीपा विशेषास्सदा
ये तु सञ्जीवनीया धरायां मया।
अप्रमादेन संधुक्षणीयाः समे
सन्ति के ते दीपाः श्रूयतां वच्म्यहम्॥६॥

पुत्रपुत्रेति जञ्जप्यमानस्य हा!
दुःखच्छिन्नपितुर्मानसे ज्वालितः।
पश्य वृद्धालये **व्यग्रतादीपकः**
शामनीयो भवेत्सत्वरं हे सखे!॥७॥

अम्बरं यस्य छादं तथा कुट्टिमो
यस्य गेहं भुवौ ब्रह्मणा निर्मितं।
वक्षणाग्नौ ज्वलन्तः **क्षुधादीपकः**
तस्य निर्वापणीयो भवेत्तत्क्षणम्॥८॥

देशप्रेमप्रदीपं हृदि ज्वालयन्
युध्यते सीम्न्यपि रक्षको वागरः।
स्वस्य प्राणान् प्रहुत्य स्वधर्मे रतः
दीपके तस्य तैलं नवं पूर्यताम्॥९॥

ये कृषिव्यापृताःकर्मशीला नराः
भोजयन्त्यद्य राष्ट्रं समस्तं धीराः।
मानदीपो नवो ज्वालनीयो भवेत्
कर्षकाणां गृहे उत्सवेऽयं पुनः॥१०॥

याश्च त्यक्ता यतीन्यो वितानीकृताः
आत्मशक्तिर्बलैर्युध्यमाना रणे।
किं न तासां गृहे ज्वालनीयः पुनः?
उज्ज्वलाशाप्रदीपः सदा शाश्वतः?॥११॥

दीपकानीदृशान् ज्वालनाय क्षमाः
यद्दिने दीपनिर्वापणेऽपि क्षमाः।
दीपके वा तु तैलं नवं पूर्यते
तद्दिने दीपदीपोत्सवः सार्थकः॥१२॥

– सहायकाचार्या, संस्कृतविभागे
डी.सी.एम. कला-वाणिज्यमहाविद्यालयः
वीरमगाम – **अहमदाबाद**– गुजरातप्रदेशः

# सुधर्मः श्रेयसे पुंसाम्

❑ डॉ. महेशचन्द्रगुर्जरः

धारणादुच्यते धर्मः धर्मादर्थस्ततः सुखम्।
धर्मेणैव जयो लब्धः, धर्मनीतिर्यशस्करी।।१।।

अधर्मनीत्यसत्येषु धर्मनीतिसतां जयः।
रावणत्वेऽत्र रामस्य, भवत्येव जयस्सदा।।२।।

योगेशोऽन्तर्विवेकस्तु, पार्थो नाम हि पौरुषम्।
पुरुषार्थी विवेकी च, विजयेतेऽखिलं जगत्।।३।।

अप्रियमनुभूतं यत्, तत्तु सत्यं वदेन्नरः।
सत्यमनुभवेत्तच्च, मा कदाप्यनृतं वदेत्।।४।।

जनानां सुन्दरं गात्रं, जगते ह्येव रोचते।
सभक्तिसुंदरात्मा च, हरये रोचते त्विह।।५।।

सत्यं दया तपो दानं, चेति धर्मश्चतुष्पदः।
दानं कलौ प्रधानं हि, सर्वविधं शिवप्रदम्।।६।।

सर्वाधिकं हि दौर्बल्यं, संसारे बहुकामनाः।
सर्वोत्कृष्टं बलञ्चोक्तं, मानवस्येह संयमः।।७।।

भवेत्सत्संगतेर्लाभः, पुण्यैश्चेशानुकम्पया।
कुसंगेऽथ कुमार्गे तु, स्वातंत्र्यं भजते नरः।।८।।

स्वार्थं त्याज्यं सुसंगत्यै, स्वार्थाय न सुसंगतिम्।
विनश्यते यतः स्वार्थं, धर्मारब्धं ततो भवेत्।।९।।

स्मृतिस्वाध्यायसत्संगैः, सेवयाऽथ समाधिना।
पञ्चधासाधनैःकार्यः, संयमिनाऽऽत्मसंयमः।।१०।।

दुष्कर्मणो विचारास्तु, हेयाः क्षश्चिन्तनाय हि।
चेदुद्भवाः सुकृद्भावाः, कार्याः तत्क्षणमेव च।।११।।

यस्तु रामं परित्यज्य, कामादिषु निमज्जितः।
नेह सौख्यमवाप्नोति, नरकं याति सः ध्रुवम्।।१२।।

यत्रेशचरणौ दिव्यौ, आचारस्तत्र विद्यते।
यदेशचरणौ नैव, कदाचारो भवेत्तदा।।१३।।

रामस्य चरितं श्रुत्वा, धारयेयुर्गुणाञ्जनाः।
भविष्यति तदा ह्येतत्सर्वं राममयं जगत्।।१४।।

रामः शिक्षितवान्स्वस्य वृत्तेन सर्वमानवान्।
संबन्धानां हि निर्वाहः, सद्धर्मो विद्यते महान्।।१५।।

- प्राचार्यः, राजकीय उच्चमाध्यमिक-विद्यालयः,
नगलातुला, भरतपुरम्, राजस्थानम्,
मो. ९६१००७३५९९

# 'भारती'त्यस्याः संस्कृतमासिकपत्रिकायाः वैशिष्ट्यम्

❑ डॉ. तारेशकुमारः शर्मा

**पत्रपत्रिकाणाम् उपयोगित्वं सुविदितमेव।**
**लोकतन्त्रस्य अयं चतुर्थः स्तम्भः परिगीयते।।**

ज्ञानं, विज्ञानं, दर्शनं, साहित्यं, राजनीतिरर्थनीतिः, समाजशास्त्रमितिहासः, संघर्षः, क्रान्तिरुत्थानं, पतनं, निर्माणं, विनाशः, प्रगतिर्दुर्गतिरित्यमीषां सर्वेषां लघूनां महतां च जीवनप्रवाहाणां प्रतिबिम्बं सुस्फीतं प्रतिफलयितुं पत्रकारितामृते किमन्यत् सफलतामा-सादयेत्? जीवनं समाजं, संस्कृतिं, सभ्यतां, समग्रं विश्वं च विमलादर्श इव प्रतिफलयितुं पत्रकारितामृते नान्यत्किमपि समक्षं लोके। अन्यायं प्रतिरोद्धुं, नव्यविचारसरणिःकल्पनायास्तरङ्गान् वोढुं, नवरचनासन्देशानामग्रदूतत्वं कर्तुं तथा चान्ते जीवनाम्बुधावुद्वेलन्तीनां लोलालहरीणां तरलतङ्गाणामुल्लोलकल्लोलानामावर्तानां च प्रातिनिध्यं सम्पादयितुं पत्रकारकलायाः संजीवप्रतिकल्पानीवेमानि किलाधुनातनानि पत्राण्यद्वितीयानि वर्तन्ते।

**भानुवद् भारतीयानां भास्वद्भवनभासिनी।**
**भागीरथीव भावाढ्या भारते भातु भारती।।**

१९५० तमे ख्रिष्टाऽब्दे पूज्यतमाः बाबासाहेब उमाकान्त जी आप्टे महोदयानामुपस्थितौ जयपुर-नगरस्य कतिचिद् विद्वांसः एकत्र बभूवुः। तैश्चेतो जयपुरादेकस्याः संस्कृतपत्रिकायाः प्रकाशनस्य निर्णयः कृतः।

तदनुसारं १९५० तमाब्दस्य दीपावल्याः शुभदिनादेव जयपुरतः 'भारती' संस्कृतमासिकस्य प्रकाशनस्यारम्भो जातः। प्रतिमासस्य पूर्णिमायां तिथौ भारतीपत्रिका भारतीसेवाबद्धपरिकरा प्रकाश्यते। भारती पत्रिका प्रथमं द्विवर्षपर्यन्तं सुरजनदासस्वामि-महाभागस्य सम्पादकत्वे संरक्षकत्वे च प्रकाशिता। तृतीयवर्षे वृद्धिचन्द्रशर्मशास्त्री(संवत् १९६२-२००२) सम्पादकोऽभूत्। तत्पश्चात् सन् १९५४-१९६४ पर्यन्तं अस्याः पत्रिकायाः सम्पादनं भट्टमथुरानाथशास्त्रिणा कृतम्।

पत्रिकेयं हरिशास्त्री-दीनानाथत्रिवेदी-पण्डित जगदीश-साहित्याचार्य-वीरेश्वरशास्त्री-मण्डन मिश्र-देवर्षि कलानाथशास्त्री-पण्डित मोहनलाल शर्मा-श्री प्यारेमोहनशर्मा प्रभृति-विदुषां सम्पादकत्वे प्रकाशिता। **साम्प्रतम्** अस्याः पत्रिकायाः सम्पादकाः श्रीमन्तः डॉ. (प्रो.) श्रीकृष्णशर्माणः महोदयाः आधुनिकसंस्कृतख्यातनामसु विद्वत्सु अन्यतमाः अवद्योतन्ते। तदाप्रभृत्येव विगत-पञ्चसप्ततिवर्षेभ्य एषा 'भारती' पत्रिका प्रतिमासं नियतरूपेण प्राकाश्यं लभमाना वर्तते।

इयं पत्रिका स्वर्णरंजितमुखपत्रेण सुश्लिष्टमुद्रणेन, सुभगया चाकृत्या, शुभैः पत्रैः, सन्दर्भोचितैः चित्रैश्च विषय-वैविध्येन च देशभाषापत्रिकाभिः सह स्पर्धितुं क्षमते। भारती-पत्रिकायां भारत्यनुकूल-चित्राणि प्रकाश्यन्ते। महापुरुषचित्राणि देवलीला-प्रतिपादकचित्राणि प्राकृतिकचित्राणि च प्रकाश्यन्ते। अस्याः पत्रिकायाः बहवः विशेषाङ्काः प्रकाशिताः। विशेषाङ्कस्य प्रकाशनं विशेषरुचिकरं भवेत्, विपुल-सामग्रीयुता भारती सन्तोषकरी जायेत च।

अस्यां पत्रिकायां सम्प्रति भारतीयसंस्कृति-सम्बद्धाः धर्मनीति-दर्शनागमकाव्य-पुराणेतिहास-

कलादिविषयका: लेखा:, काव्य-नाटकचरित्र-कथादिमौलिककृतय:, हास्यचातुर्यकण्डिका:, व्यंग्यलेखा:, आधुनिकराजकीयचर्चा:, सरलया शैल्या संस्कृतानुवादा:, बालसाहित्यं प्राचीनग्रन्थान् विषयान् वा अधिकृत्य विमर्शात्मिका: शोधात्मका: वा लेखाश्च प्रकाश्यन्ते। न केवलं शोधप्रधाना पत्रिका, काव्यं, नाटकं कथानिधिरित्यादिसाहित्यवैविध्यस्याप्यत्र समावेशो वर्तते युगानुरूपं किञ्चिदभिनवं साहित्यं संवर्धयितुमिति।

हरिशास्त्रि, आशुकवि दुर्गादत्त शर्म-रामेश्वर शर्म-गंगाधरभट्ट-यमुनादास-शिवचरणझा-वैद्य रामस्वरूप-मुकुन्दमित्र-द्विजेन्द्रलालशर्म-दीनानाथ-शर्म सारस्वत-वासुदेवशास्त्रि-शिवप्रसादशास्त्रि-गणेशरामशर्म-रामनाथपाठक'प्रणयी'-श्री दा.सातवलेकर-गिरिधरलाल-बोम्मकण्टि-श्रीनिवास-प्रेमशङ्करमिश्र-प्रह्लादशास्त्रि-हरगोविन्द पाराशर-रुद्रदेवत्रिपाठी, श्यामदेवशास्त्रि-श्रीधरपन्त, शठकोप-मधुकरशास्त्रि-कृष्णलालनादान-रामनारायणदीक्षित-एच्.वी.भुजङ्गाचार्य-सीतारामाचार्य लक्ष्मणशास्त्रि-क.वे.अनन्तनारायण मल्लादि-सूर्यनारायण-चन्द्रशेखर शर्म-बालकृष्ण भट्टरसिकबिहारी-उदयकान्तमिश्र-दीनानाथ त्रिवेदी'मधुप'-वृद्धिचन्द्रशास्त्रि-कलानाथशास्त्रि-प्यारेमोहनशर्म-पण्डित मोहनलालशर्म पाण्डेय-अभिराज-राजेन्द्रमिश्र-प्रशस्यमित्रशास्त्रि-प्रभुनाथ द्विवेदी-हर्षदेव माधव-ताराशङ्करशर्म पाण्डेय-राजेश्वरी भट्ट-बनवारीलालगौड-इत्यादीनां महाभागानां रचनाभि: समलङ्कृता पत्रिकैषा। युवकवीनामपि रचना: अस्यां पत्रिकायां दरीदृश्यन्ते।

अस्यां पत्रिकायां द्विजेन्द्रलालमहाभागस्य 'शान्तिदर्शनं' ग्रन्थ: प्रकाशित:। राजनाथपाठक 'प्रणयी' इत्यस्य कवे: गद्यगीतय: ध्वनिप्रधाना: सरसा: प्रकाशिता: भारतीपत्रिकायाम्। यथा-

**आयातो मधुमास:**
**नवललतासु गतासु विकासं**
**दिशि दिशि भ्रमर-विलास:।**

ऋतुवर्णने प्रह्लादचन्द्रशास्त्रिण: कौशलमुल्लेखनीयम्। मनोरममेकं चित्रं पश्यतु -

**क्षणे क्षणे दीव्यति दामिनी प्रभा,**
**यथा नवोढा जलदांशुकान्तरे।**
**गभीरगर्तेषु च दर्दुरध्वनि:,**
**कथं न कर्णेष्वमृतं निषिञ्चति।।**

इत्थं भारतीपत्रिकायां काव्यनाटकगीतादीनि समुपेत्य संस्कृतसम्मेलनादीनां वर्णनम् अभिनव-भारते संस्कृतस्याभिनवा प्रगति:, वार्षिकोत्सवादीनां सूचना, संस्कृतनाट्यसमारोहाणां विवरणं, विद्यालयेषु संस्कृतशिक्षा, संस्कृतभाषा, समस्यापूरणं तथा च सूक्तिसुधा-इत्यादीनां प्रकाशनं भवति। धर्म-दर्शन-समाज-साहित्य-व्याकरण-कोष-कला-आयुर्वेद-संस्कृति-सभ्यतादिविषयेषु सुष्ठु निबन्धा: समुपलभ्यन्ते। 'जन्मभूमि: भारतमाता' 'स्वर्गादपि गरीयसी' इति आरभ्य 'जयति भारती भूमिरियम्' इति प्रकटीभवति।

'भारते अभिनवोन्मेषशालिनी संस्कृतभारती सततम् अभिनवाभि: कृतिभि: परिपोष्यमाणा सती भारतीयसंस्कृतिं पुष्णातु' इति चाशास्महे वयम्।

- रा.च.मा.बाल: विद्यालय:,
लिबासपुरम्-**दिल्लीनगरम्**-११००४२
दूरभाषसङ्केत: - ९८१०८६९०५५

# अभिमानोऽहङ्कारः

❑ डॉ. अञ्जना शर्मा

भारतीयदर्शने अहंकारस्य चर्चा विविधा कृता, विशेषतया सांख्ययोगदर्शने वेदान्तदर्शने च। सांख्यदर्शने पंचविंशतितत्त्वेषु अहंकारं गणयित्वा अहंकारस्य सूक्ष्मं निरूपणं कृतम्। यथाहि 'अभिमानोऽहङ्कारः' इति सांख्यदर्शने स्पष्टतया उल्लिखितः। सांख्यप्रवचनभाष्यस्य द्वितीयाध्याये षोडशतमं सूत्रमेव वर्तते- 'अभिमानोऽङ्कारः'[1]। सांख्यकारिकायामेव चतुर्विंशतितमा कारिका वर्तते -

**अभिमानोऽहङ्कारस्तस्माद् द्विविधः प्रवर्तते सर्गः।**
**एकादशकश्च गणस्तन्मात्रः पञ्चकश्चैव।।**[2]

अहंकारस्य तात्पर्यं स्पष्टयन् गौडपाद-भाष्यकारः कथयति यद् '**अहंकरोतीत्यहङ्कारः कुम्भकारवत्। अन्तःकरणद्व्यम्। स च धर्मधर्म्यभेदादभिमान इत्युक्तोऽसाधारण-वृत्तितासूचनाय।**'[3] माठरवृत्तौ स्पष्टं यत् 'रूपे अहम्, रसे अहं, गन्धे अहं (रूपयामि, रसयामि, जिघ्रामि) अहम् विद्वान्,[4] अहं दर्शनीय इत्येवमाद्यभिमानोऽहङ्कारः। चतुःषष्टिवर्णैः परादिवैखरी पर्यन्ताभिधेयैर्यत् किमप्यभिधीयते बुद्ध्या समर्थ्य तत् सकलमाद्यन्ताकारवर्णद्वयग्रहणे-नोपरिस्थितपिण्डीकृतानुकारिणा बिन्दुना भूषितः प्रत्याहारन्यायेनाहङ्कार इत्यभिधीयते।[5]

महतोऽहङ्कार उत्पद्यते। तस्मात् अहङ्कारात् षोडशको गण उत्पद्यते। गौडपादभाष्यं स्पष्टीकरोति यद् बुद्ध्या निश्चित एवार्थेऽहंकारममकारौ जायेते। अतो वृत्त्योः कार्यकारण-भावानुसारेण वृत्तिमतोरपि कार्यकारण भाव उन्नीयते। वस्तुतः अन्तःकरणमेकमेव बीजांकुरमहावृक्षादिवदवस्था-त्रयमात्र भेदात् कार्यकारणभावमापद्यत इति।[6] विषयेऽस्मिन् सांख्यतत्त्वकौमुदीकारस्य मतं भिन्नं वर्तते। तस्यानुसारेण अहंकारमाश्रित्य बुद्धिरध्यवस्यति। तेनोक्तम्- अभिमानोऽहंकारः। यत् खल्वालोचितं मतं च तत्राहमधिकृतः - शक्तः खल्वहमत्र - मदर्था एवामी विषयाः। मत्तो नान्योऽत्राधिकृतः कश्चिदस्ति। अतोऽहमस्मि इति योऽभिमानः - सोऽसाधारणव्यापारोऽहंकारः।[7] तमुपजीव्य हि बुद्धिरध्यवस्यति।

त्रिविधोऽहंकारः। कतरस्मादहङ्कारात् इन्द्रियाणि उत्पद्यन्ते, कतरस्माद् वा तन्मात्राणीति उच्यते-

**सात्त्विक एकादशकः प्रवर्तते वैकृतादहंकारात्।**[8]
**भूतादेस्तन्मात्रः स तामसः तैजसादुभयम्।।**

अहंकारः त्रिविधः - सात्त्विकः, राजसः तामसश्च। यदा सत्त्वमुत्कटं भवति अहङ्कारे तेन च सत्त्वेन रजस्तमसी अभिभूते स्याताम्। तदा सात्त्विकोऽहङ्कार उच्यते। तस्य सात्त्विकस्य वैकृतिक इति पूर्वाचार्यैः संज्ञा कृता। स वैकृतिको भूत्वा अहङ्कार एकादशेन्द्रियाणि उत्पादयति। तस्मात् सात्त्विकानीमानि विशुद्धानि स्व - विषयग्रहण - समर्थानि भवन्ति। तस्मादुच्यते- 'सात्त्विक

एकादशकः प्रवर्तते वैकृतादहङ्कारात्।' इति। भूतादेः तमोबाहुल्यात् गौणीभूतसत्त्वरजसो भूतादि-नाम्नोहङ्कारात् तन्मात्रः शब्दादिपञ्चको गणो जायते। तैजस एव राजसेऽहंकारे क्रियाशक्तिरस्ति। सत्त्वं निष्क्रियमेकाकि न शक्नोति उत्पादयितुम्, तमश्च मूढत्वादक्रियमसमर्थं विना रजः सृष्टिमुत्पादयितुम् इति। अत उभे सत्त्वतमसी सृष्टिविषये रजसाऽनुगृहीते ऐन्द्रियकं तान्मात्रिकं च गणद्वयं जनयत इति तात्पर्यार्थः।

एकादशेन्द्रियेषु बुद्धीन्द्रियाणि कर्मेन्द्रियाणि मनश्च। श्रोत्रादीनि बुद्धीन्द्रियाणीति उच्यन्ते। शब्दस्पर्शरूपरसगन्धा बुद्ध्यन्ते इति बुद्धीन्द्रियाणि। इन्द्राण्येव तानीन्द्रियाणि। इन् इति विषयाणां नाम, तानिनः विषयान् प्रति द्रवन्तीति इन्द्रियाणि। वाक्पाणिपादपायूपस्थानि कर्मेन्द्रियाण्याहुः। कर्म कुर्वन्ति कारयन्ति च। मन उभयात्मकम्। कर्मेन्द्रियेषु कर्मेन्द्रियम्। बुद्धीन्द्रियेषु बुद्धीन्द्रियम्। यतोहि बुद्धीन्द्रियाणां वृत्तिं सङ्कल्पयति कर्मेन्द्रियाणां च। तस्मादुभयात्मकं मनः। इन्द्रियमपि साधर्म्यात्। यथा कर्मेन्द्रियाणि बुद्धीन्द्रियाणि च सात्त्विका-हङ्कारादुत्पद्यन्ते तथैव मनोऽपि तस्मादेव उत्पद्यते। तस्मादिन्द्रियं मनः। मनसः वृत्तिः संङ्कल्पः। यथा बुद्धीन्द्रियाणां शब्दादयो वृत्तयः। कर्मेन्द्रियाणां वचनादयः। बुद्धेरध्यवसायः, एवमभिमानोऽ-हङ्कारलक्षणम्।


– सहाचार्या, संस्कृत, दर्शन एवं वैदिक
अध्ययनविभागः, वनस्थली-३०४०२२
(राजस्थानम्), दूरवाणी-९५४९३-६७४५४



सन्दर्भाः-

१. सांख्यप्रवचनभाष्यम्, २/१६ २. सांख्यकारिका, २४
३. सांख्यप्रवचनभाष्यम्, २/१६ ४. माठरवृत्तिः, २४
५. तत्रैव, २२ ६. सांख्यप्रवचनभाष्यम्, २/१६
७. सांख्यतत्त्वकौमुदी, २/१६ ८. सांख्यकारिका, २५
९. सांख्यकारिका, २६, २७



## ऐसे बन सकते हैं आप भारती पत्रिका के ग्राहक :-

भारती पत्रिका का वार्षिक शुल्क रुपये 250/-, पंचवर्षीय शुल्क 1100/-, आजीवन सदस्यता ( 15 वर्ष ) शुल्क 3100/- मात्र है। आप केनरा बैंक की किसी भी शाखा में जाकर हमारे निम्नलिखित खाते में राशि जमा करा कर जमा रसीद की फोटो प्रति ई-मेल से या डाक द्वारा भिजवा देवें।

खाते का नाम - **भारतीयसंस्कृतप्रचारसंस्थान**
खाता संख्या - 2139101912498
IFS Code - CNRB0002139

# संस्कृतभाषायां विश्वभाषाया: साक्षात्कार:

❑ पं.श्री.दा. सातवलेकर:

अन्येष्वपि देशेषु एवमेव स्थाननामानि संस्कृतोद्भवान्येव दृश्यन्ते यथा–

## नार्वेदेशे संस्कृतनामानि

| | | |
|---|---|---|
| Vedo | वेदो | वेद: |
| Bodo | बोदो | बोध:, वेद: |
| Ogne | ओग्ने | अग्नि: |
| Rise | रिषे | ऋषि: |
| Mandal | मण्डल | मण्डलं |
| Nard reisa | नारद रिसा | नारद ऋषि: |
| Sotra | सोत्रा | सूत्रं |
| Soroy | सोराय | सूर्य: |
| Rauma | राऊमा | राम: |
| Seida | सीदा | सीता |
| Borte | बोरते | भरत: |
| Barmoy | बरमाय | ब्रह्म |
| Moi | मोइ | माया |
| Kern | केर्ण | कर्ण: (सर:) |
| Roda | रोदा | राधा |
| Kristiana | क्रिस्तियाना | कृष्ण: |
| Driva | द्रिव | ध्रुव: |
| Ombo | ओम्बो | अम्बा |
| Havstein | हवस्तेन | हविस्थानं |
| Rissavarre | रिस्सवर | ऋषिवर: |
| Snehaetta | स्नेहाएत्ता | संहिता |
| Sten srud | स्तेनश्रुद | श्रुतस्तेनं श्रुतिस्थानं (वैपरीत्येन) |
| Eda | एडो | वेद: |

एतादृशानि वैदिकानि नामानि नार्वे देशे शतश: सन्ति। कथं नाम एतानि संस्कृतनामानि तत्र गतानि, यदि संस्कृतभाषा वैदिकी वा भाषा तत्र प्रचलिता नासीत्?

## स्वीडनदेशे

स्वीडनदेशेऽपि स्थाननामानि संस्कृतोद्भवानि एव सन्ति। यथा –

| | | |
|---|---|---|
| Vade stena | वेदे स्तेन | वेदस्थानं |
| Vaddo | वेदो | वेद: |
| Boda | बोदा | बोध:, वेद: |
| Vittango | वित्ताङ्ग | वेदांगं |
| Roma | रोम | राम: |
| Raon | राओन | रावण: |
| Hven | ह्वन | हवन |
| Soma | सोम | सोम: |
| Braman | ब्रामन | ब्राह्मण: |
| Rada | रादा | राधा |
| Kirun | कीरन् | कर्ण: |
| Kristine borg | क्रिस्तिन वर्ग | कृष्णपुरं |
| Vet land | वेत लैंड | वेदभूमी |
| Edsele | एदसेले | वेदशाला |

| | | |
|---|---|---|
| Roso | रोसो | ऋषि: |
| Hjo | हजो | यजु: |
| Ingaro | इङ्गरो | अंगिरा: |
| Ume | उमे | उमा |

अत्र 'वेद वेदाङ्ग-राम-रावण-हवन ब्राह्मण-राधा-कृष्णपुरं-ऋषि-यजु-अङ्गिरा-उमा' आदीनि नामानि संस्कृतोद्भवानि अस्मिन् स्वीडनदेशे सन्ति। एवं शतश: संस्कृतनामानि तत्रेदानीं दृश्यन्ते। केन मार्गेण स्वीडनदेशे इमानि नामानि गतानि, यदि तत्र सुरभारती जन-भाषा नासीत्? सुरभारतीप्रचार: एकस्मिन् अतिप्राचीने समये तत्र आसीदिति एषां पदानां मननात् सिद्ध्यति।

### डेन्मार्कदेशे संस्कृतनामानि

डेन्मार्कदेशस्य नाम्नो द्वौ छेदौ भवत: ।'डेन् + मार्क' इति ।अनयोर्व्युत्क्रमे कृते 'मार्क+डेन्' अथवा 'मार्कन्डे' भवति । एतन्मार्कण्डेयस्यैव रूपमस्तीति प्रतीयते। कथं वा संबंधोऽत्र मार्कंडेयस्य इति न ज्ञायते। अत्रत्यानि संस्कृतनामानि अत्र इदानीं द्रष्टव्यानि।–

| | | |
|---|---|---|
| Hoven | होवेन | हवनं |
| Norde rose | नारद रोसे | नारद: ऋषि: |
| Tarm | तर्म | धर्म: |
| Ore | ओरे | हरि: |
| Harre | हरे | हरि: |
| Emba | एम्बा | अम्बा |
| Bav | बाव | भव: |
| Kalo | कालो | काल: |
| Salling | सालिंग | शिवलिंग |
| Rama | रामो | राम: |
| Mano | मनो | मनु: |
| Soro | सोरो | सूर:, सूर्य: |
| Ravgo | रावगो | रघु: |
| Brunde | वृन्दे | वृन्दा |
| Veno | वेनो | वेणु:, वेन: |
| Bramme | ब्रह्मे | ब्रह्म |
| Bed sted | वेद स्टेड | वेदस्थलं |
| Wed sted | वेद स्टेड | वेदस्थलं |
| Boto | बोतो | वेद: |
| Vederso | वेदर्सो | वेदर्षि: |
| Vid | विद | वेद: |
| Vestero | विष्टरो | विष्टर: |

अत्र 'हवन-नारदर्षि-हरि-धर्म-अम्बा-काल-राम-सूर-सूर्य-वेदस्थल-वेदर्षि आदीनि नामानि संस्कृतोद्भवानीव दृश्यन्ते। एतादृशानि शतश: नामानि तस्मिन्देशे सन्ति। कथं एतानि नामानि डेन्मार्कदेशे मार्कण्डेयदेशे वा गतानि? मार्कण्डे नामापि मार्कण्डेयस्यैवास्तीति प्रतिभाति। किं एतत्स्थानं मार्कण्डेयस्यैवास्ति अथवा नास्ति इत्यस्य विषये विद्वद्भि: निश्चय: कर्तव्य:। वैदिकान्येवैतानि नामानि सन्ति। यदि अस्यर्षेरेष देशो न स्यात्, तर्हि कथमेतादृशानि नामानि तत्र भवेयु:?

### इंग्लंददेशे

| | | |
|---|---|---|
| Calyton | कालिटोन | कालिस्थानं |

| | | |
|---|---|---|
| Caldewgate | कालदेवगाट | कालदेवघाट: |
| Calchester | कालचस्टर | कालछत्रं |
| Newton | नवटन | नवस्थानं |
| Hinderson | हिंडरसन | इन्द्रसुनु: |
| Combe | सोम्ब | साम्ब: |
| Soham | सोहं | सोऽहं |
| Sawlay | शवलय | शिवालय |
| Sawstan | शवस्तान | शिवस्थान |

'काल' इति भगवत: शंकरस्य नाम। तत् इंगलंद-देशे तथा अन्यत्रापि वर्तते । Ton इति स्थानस्य, Son इति सुनुरित्यस्य, Gate इति घाटस्य, Chester इति छत्रस्य अपभ्रंशो दृश्यते।

एवं शतश: स्थाननामानि मनुष्यनामानि च इंगलंद देशे सन्ति ।

## स्काटलंददेशे

| | | |
|---|---|---|
| Caledonion | कालेडोनियन | कालद्वीपीय |
| Calder | कालदर | कालधर: |
| Dew Ealedonians | देव | कालद्वीपीय |
| Calbriye | कालब्रिया | कालप्रिया |

एवं 'काल' युक्तानि स्थाननामानि स्काटलंददेशे दृश्यन्ते। कथं केन मार्गेण, केन रूपेण वा एष 'काल:' तत्र गत: इति सर्व: मननीय: प्रश्न:।

## आयर्लैण्डदेशे

| | | |
|---|---|---|
| Iyarland | आयलैंड | आर्यभूमि: |
| Anadowan | अनड्वान् | अनड्वान् |
| Kilas | किलास | कैलास |
| Balnagar | बालनगर | बालनगरं |
| Kilal | किलाल | किलालं |
| Kaladare | कालदर | कालधर: |
| Bumatty | बूमाती | भूमाता |
| Ardnari | अर्दनारी | अर्धनारी |
| Ogam | ओगम | आगम: |

अत्र अर्धनारीनटेश्वरस्य नाम विशेषतो द्रष्टव्यम्। कैलासोऽप्यत्र वर्तते। शंकरस्य वाहनं अनड्वानपि अस्त्यत्र। अपूर्व एव एष नानानामसु संस्कृतभाषा-प्रत्यय:।

## उत्तर अमेरिकायां

| | | |
|---|---|---|
| Saskatchwan | ससकच्छवन | शशकच्छवनं |
| Caligav | कालिगाव | कालिग्राम |
| Kalkoochi | कालकुची | कालवाची |
| Kalamak | कालमक | कालमुख: |
| Kalamanchi | कालमांची | कालमंच |

## दक्षिण अमेरिकायां

| | | |
|---|---|---|
| Chayanta | चयन्त | जयन्त: |
| Chaya | चय | जय: |
| Kalamark | कालामार्क | कालमारक: |
| Antaco | अन्तको | अन्तक: |
| Chamacasapa | चामकशप | कामकश्यप: (मैक्सिकोदेशे) |
| Paramaribo | परमरिब्रो | परमारिभव: |
| Mane | मने | मन: |
| Gauviari | गौविआरी | गौविहारी |

| | | |
|---|---|---|
| Maipuri | मइपुरी | मयपुरी |
| Kamoodi | कामुदी | कौमुदी |

### न्यूझीलन्दे

| | | |
|---|---|---|
| Tarapeeda | तारापीड: | |
| Warakee | वराकी | |
| Rasa | रसा | |
| Wytanghee | वीतांगी | |
| Whemattee | विमती | |
| Kororadhika | कोरोराधिका | गौरीराधिका |
| Mawheeranga | मावीरङ्ग | महावीररङ्ग: |
| Mowheemooha | मोवीमूह | महामूह: |

### अबिसीनियायां

| | | |
|---|---|---|
| Antalaw | अन्तल | अन्तरं |
| Bara | बर | वर: |
| Cali | काली | कलि:, काली |
| Gullibudda | गल्लिबुद्द | कलिबुद्ध: |
| Shiha | शिह | शिव: |
| Mara | मर | मर: (स्मर:) |
| Boja | बोज | भोज: |
| Manda | मनद | मन्द:, मानद: |
| Guro | गुरो | गुरु: |
| Somme | सोम | सोम: |

### फ्रांसदेशे

| | | |
|---|---|---|
| Indra | आन्द्र | इन्द्र: |
| Martan | मार्ता | मार्तंड: |
| Nard | नारद | नारद: |
| Samme | सोम | सोम: |

### अफ्रिकादेशे

अफ्रिकादेशे तु कृष्णवर्णीयानां हबसाणानां निवास:। तेषां मध्ये न कापि विशेषतया स्पृहणीया सभ्यता अस्ति, न च तेषां संस्कृति: कुत्रापि केनापि वर्णनीया अस्तीति मन्यते। परं तेषां प्रदेशे स्थाननामानि संस्कृतोद्भवानि सन्ति इति आश्चर्यकारकमिव प्रतिभाति। परं एतदेवमेवावर्तत यथा–

| | | |
|---|---|---|
| Konda | कोंडा | कुण्डं |
| Kootakunda | कूटकुंडा | कूटकुण्डं |
| Baraconda | वरकुंडा | वरकुण्डं |
| Seesakunda | सीसकुंडा | शशिकुण्डं |
| Gauri | गौरी | गौरी |
| Dacanie | डाकनी | डाकिनी |
| Kalunda | कालुंदा | कालिंदी |
| Settra Krou | सेत्र क्रौ | क्षेत्रकुरु |
| | (व्युत्क्रमेण) | कुरुक्षेत्रं |
| Kesey | केशी | केशी |
| PervedI | पेर्वडी | पार्वती |
| Yami | यमी | यमी |
| Koomba | कुंब | कुम्भ: |
| Goodooberi | गुदूबेरी | गोदावरी |
| Shaibee | शैवी | शैवी |
| Boma | बोमा | भूमा |
| Kayree | कायेरी | कावेरी |

| | | |
|---|---|---|
| Kaweree | कावेरी | कावेरी |
| Koomada | कुमद | कुमोदः |
| Gange | गंग | गंगा |
| Mahee | मही | मही |
| Anneperenna | अन्नपेरेन्ना | अन्नपूर्णा |
| Ambelakia | अंबेलकीय | अंबालोकीयः |
| Caldurita | कालदुरित | कालदुरितं |
| Heraclea | हेराक्लिय | हरकालियः |
| Chaldia | कालडीया | कालद्वीपं |
| Calliapa | कालीअपा | कालीय-पः |

एवं अफ्रिकादेशेऽपि प्राचीन नामानि संस्कृतोद्-भवानि सन्ति। अफ्रिकादेशस्तु संस्कारहीनः परं तत्रापि आर्याणां ग्रामस्थाननामसु आर्यसंस्कारा दृश्यन्ते। असंस्कृतेषु संस्कृतभाषानामानि दृश्यन्ते इत्यनेन संस्कृतस्य अपूर्व विश्वव्यापित्वं सिद्ध्यति। सर्वै रेतन्मनन-पूर्वकं द्रष्टव्यम्।

**अंगिरा ऋषिः**

| | | |
|---|---|---|
| English (Anglais) | आंगिरस | आंगिराः |
| Angers | आंगेर्स | आंगिराः(फ्रान्से) |
| Ankora | अंगोरा | आंगिराः(तुर्कस्थाने) |
| Angra | अंगरा | आंगिराः(ब्राझीडे) |

एवमंगिरा ऋषिः बहुषु देशेषु स्थाननामरूपेण सतोऽस्ति। कथमेवं नामानि समुत्पन्नानि यदि तत्र संस्कृतभाषायाः कथमपि संबंधः नासीत्कदाचिदपि।

एवं प्रायशः सर्वेषु देशेषु स्थाननामानि संस्कृतोद्भवानि दृश्यन्ते। शतशः सहस्रश एवंविधानि संस्कृतोद्भवानि नामानि सर्वेषु देशेषु सन्ति। अस्मिन् विषये सर्वेषां देशानां भूगोलस्थिता स्थाननामावलिः द्रष्टव्या। तत्र प्रायशः संस्कृतोद्भवानि नामानि इतस्ततो दृश्यन्ते। यानि साक्षात् संस्कृतसदृशानि दृश्यन्ते, तानि प्रथमं एकस्थाने संग्रहीतव्यानि। तदूर्ध्वं अपभ्रष्टानि नामानि पृथङ् संग्रहीतव्यानि। एवं कृते प्रतिशतकं पष्टिपर्यंतं स्थाननामानि संस्कृतसदृशानि संस्कृतोद्भवानि वा सन्तीति स्पष्टं प्रतीयेत।

किमेतत् यदृच्छया एव संजातं, अथवा तत्र संस्कृतभाषिणां आर्याणां निवास आसीत् पूर्वं, अथवा संस्कृतभाषाभाषिभिः सह तत्रत्यानां व्यावहारिकः संबंध आसीदिति वा द्रष्टव्यं संशोधनीयं वा। संशोधकानां पुरस्तात् एष नवीनः प्रश्नः संशोधनार्थं मया इदानीं प्रस्थाप्यते। सर्वैः निरलसैः निःपक्षतया अस्य संशोधनं अवश्यं करणीयम्।

मया तु इदानीं अत्र प्रस्तुतैः प्रमाणैः एतदेवं प्रस्थाप्यते, सर्वेषु देशेषु संस्कृतभाषिणां आर्याणां निवासो वा तैः सह व्यावहारिको धार्मिको वा सबन्धः पूर्वमासीत्। अतएव सर्वेषु देशेषु संस्कृतनामानि इदानीमपि दृश्यन्ते।

एतेन संस्कृतभाषायां विश्वभाषायाः साक्षात्कारो भवति।

**- स्वाध्यायमण्डले, आनन्दाश्रमे, पारडी जि. सुरत**

[विशिष्टोऽयं लेखो 'भारती' पत्रिकायां पूर्वं (वर्ष-५, अङ्कः-९, आषाढमासपूर्णिमा, वि.सं.२०१२) प्रकाशितोऽधुनाऽऽदर्शरूपेण कौस्तुभ-जयन्त्यवसरे पुनः प्रकाश्यते।] - सम्पादकः

# कविः कालिदासः

❑ श्रीचारुदेवशास्त्री

कवयः क्रान्तदर्शना इति पूर्वे सूरयः। सत्यं कविर्न केवलं व्युत्पत्तिमान् भवति प्रतिभानवानपि। तथापि प्रतिभा यथा कवित्वे कारणं न तथा व्युत्पत्तिः। प्रातिभेन चक्षुषा हि पश्यन्ति कवयो विदूरं च व्यवहितं च। न हि तेषां किञ्चित्तिरस्कृतं नाम। ऐन्द्रेण विमानेन विहायसं गतो दुष्यन्तो देवकार्यं पर्यवसाय्य यदा तेनैव वाहनेन भुवमवतरीतुं प्रक्रमते तदाऽधःस्थो मर्त्यलोकोऽस्याश्चर्यदर्शनो भवति। हर्षसध्रीचीनेन च विस्मयेन स एवं प्रणिगदत्यवतरणक्रियां स्वाम्।

**शैलानामवरोहतीव शिखरादुन्मज्जतां मेदिनी**
**पर्णाभ्यन्तरलीनतां विजहति स्कन्धोदयात्पादपाः।**
**सन्तानात्तनुभावनष्टसलिला व्यक्तिं भजन्त्यापगाः**
**केनाप्युत्क्षिपतेव पश्य भुवनं मत्पार्श्वमानीयते।।**

विमानेन गगनं विगाहमानस्य दूरं गतस्य जनस्यैवं तावद्भाति शैलाः स्वमुच्चैस्त्वं विमुच्य मेदिन्या ऐकरूप्यमविवेकं गताः, न ततो विलक्षणा उच्चैस्तराः पृथक्त्वेन वा स्थिता इति। ततोऽवतरणेन संनिकृष्यमाणा भूः शैलानां शिखरेभ्योऽवरोहतीति जायते प्रतीतिः, शैलाश्चोन्मज्जन्त इव भुवः। उन्मज्जनं नामामीषां पृथिव्या नानात्वेन स्थितिः, तत उद्भवतामुदञ्चतामिव दृग्विषयावतरः । इदं चापरं तदानीं दृश्यं भवति - पूर्वं पलाशिनः पलाशप्रचयात्तिरोहितात्मानः एव नयनयोरयनं गताः, सम्प्रति स्कन्धा अपीति स्वरूपाविष्कारस्तेषाम्। एवं सरितोपि वैदूर्यकृततनूभावेनादृश्यमानजलौघाः सम्प्रति सामीप्ये सति सन्तायमाना इव स्पष्टमवभासन्ते। इदं चापरमद्भुतं दृश्यते कोपि देवो वा दानवो वा तिरोधायात्मानं सशैलद्रुमनिम्नगामिमां गां सम्प्रत्युत्क्षिपतीव। एवं हि त्वरिततममवतरति विमानं यथा तदारूढो नृपतिर्दुष्यन्तो चेतयते गतिमदिदं विमानं येनावतरामीति। अतएव परकृतं पृथिव्या उत्क्षेपणमुत्पश्यति। इदमिह वर्णनायां विमर्ष्टव्यं भवति-न हि कवेः कालिदासस्य विमानेन दिव आरोहणं शक्यक्रियं संभाव्यं वास्ति। अविषयो हि स देशस्तादात्त्विकस्य जनस्य। न हि यथेदानीं तथा तदानीं विहङ्गमानामिव गगनविहारोऽभून् मानुषाणाम्। वर्णना चैषा तथा स्फुटा तथा च सत्या यथा केनापि साम्प्रतिकेन विमानस्थेन समर्थेन जनेन शक्या निर्वर्तयितुम्। अहो अपूर्वा कापि प्रेक्षा कवेर्ययोपपन्नोयमत्यन्तमदृष्टमपि दुरासदमप्यर्थं समुत्प्रेक्षितुमलम्, अविकलं च यथातथं संनिधापयितुम्।

इदं मे दर्शनमुपमोत्प्रेक्षयोरर्थान्तरन्यासे च यः प्रभवति, योऽविहतगतिर्भवति, यस्य पद्ये पद्ये प्रियङ्करा अनवद्या रम्याः प्रत्यग्राश्चेमा अलंकृतयः स्फुरन्ति, अभिप्रेयाभिव्यक्तिकर्यश्च रसपोषकर्यश्च सत्य एव काव्यशरीरशोभामुत्कर्षन्ति स **कविः** स क्रान्तदर्शनः। तत्रैवान्वर्थोयं कविरिति शब्दः। आस्वाद्यतां तावदियमुपमा कालिदासीया -

**मन्दः कवियशःप्रार्थी गमिष्याम्युपहास्यताम्।**
**प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामनः।।**

महाकविरपि कविकुलकैरवसुधाकरोऽपि कालिदास आत्मानं मूढं मन्यते । इदं मे बालिश्यं यदहं मूढोऽपि कवियशः प्रार्थये, कविरिति प्रथितः स्यामिति कामये । दुर्लभं मे तदज्ञेनेति च न विभावये। नियतमेवमाचरँल्लोक उपहास्यतां यास्यामि। यथा वामनः कश्चित्प्रांशुना प्रलम्बवर्ष्मणा लभ्ये फले वृक्षस्थे गृध्यति, तदादातुं स्वल्पां स्वभुजामुन्नमयति न च पारयति तत्स्प्रष्टुं कुत एव ग्रहीतुम्। एवं चेष्टमानं तमवलोक्य बाढं हसति जन आत्मनोऽनीशः। तथा नैसर्गिको दुर्निरोधश्च स हासो भवति यथा यतिरपि संशितव्रतस्तं न संयच्छेत् ।

यदि च भवतां सन्देहालंकृतेरासिस्वादिषा, तर्हीयमास्वाद्यताम् -

**प्रवालनीलोत्पलनिर्विशेष-**
**मधीरविप्रेक्षितमायताक्ष्याः।**
**तया गृहीतं नु मृगाङ्गनाभ्य-**
**स्ततो गृहीतं नु मृगाङ्गनाभिः।।**

प्रायेण लौकिकेर्थे सन्दिहाना वयं परं क्लिश्यामहे निर्णयमनुधावितुमपारयन्तः। इह तु महाकविना सहैव सर्वथा सांशयिका अपि वयं कामप्यपूर्वां निर्वृतिं भजामहे। अहो अलङ्कारचारिम्णो माहात्म्यम् ।

दुर्वाससः शापेन प्रमुषितस्मृतिदुष्यन्तः शकुन्तलां प्रत्याख्यात्, अंगुलीयकदर्शने च सति प्रतिलब्धस्मृतिः स्वः परिग्रह एव मया निराकृत इति जातानुशयी यदा शकुन्तलां संगच्छति तदा तां क्षमयन्नाह -

**सुतनु! प्रत्यादेशव्यलीकमपैतु ते**
**किमपि मनसः संमोहो मे बलवानभूत्।**
**प्रबलतमसामेवं प्रायाः शुभेषु हि वृत्तयः**
**स्रजमपि शिरस्यन्धः क्षिप्तां धुनोत्यहिशङ्कया।।**

उत्प्रेक्ष्यतां तावत्पुरतः स्थितः कश्चिदन्धो यस्य सच्चिकीर्षया तत्सखो वा तद्बान्धवो वा तस्य शिरसि स्रजं क्षिपति। न च क्षेपात्पुरा चिकीर्षितं वेदयति स्रजयितुं त्वेच्छामीति। क्षिप्तमात्रायां च स्रजि किं नु वेदयतेन्धः। सर्पो मे शिरसि पतित इति। महानस्यो- द्वेगः। रक्षणीया असव इति ससंभ्रमो धूनयति शिरोऽवधुनाति च स्रजम्। नान्यच्चिन्तयते, नान्यदाद्रियते। अनवसरोऽर्थान्तरचिन्तायाः संशयितेषु प्राणेषु। इष्टं परिहरन्नपि नासौ विजानातीष्टं परिहरामीति। एवं प्रकृतेपि मुनिशापेन हतचेता दुष्यन्तः परिगृहीतपूर्वां कल्याणीं कल्याणगर्भां कुलसन्तानकरीं प्रियां जायां शकुन्तलामुपसृतां परकीयेति परिज्ञाय पराकरोति परपरिग्रहग्रहेण पांसुलः पातकी नारकी च भविष्या- मीति शङ्कमानः। अहो अप्रहतपूर्वो वाचामेष पन्थाः। किं नाम हारितरं दृष्टान्तान्तरं स्यात्। किं वाऽन्यच्छ्रेयो वस्तुसतत्त्वनिरूपणं स्यात्।

कविसम्प्रदाये हासादीनां धवलता प्रसिद्धा। सेयं धवलता केवलमुत्प्रेक्षामात्रं न भवति। दशनरुचोऽवदाता भवन्तीत्यनपलाप्योर्थः। हासे च मुखं व्यात्तं भवतीति दशना उत्कटदर्शना भवन्ति। तदेषां या स्फुरन्ती भाः, तां हासे संक्रमय्य कवयो हासस्य धवलतामास्थिताः। इमां च धवलतामाश्रित्य या उपमोत्प्रेक्षाः कविनोपज्ञातास्ता दृश्याः। ता हि

रस्यतमा भवन्तीत्यपरिहार्यास्वादाः। ऋतुसंहारे तावच्छरदि प्रगे कुमुदसंकोचं वर्णयन्कविराह-

**कुमुदमपि गतेऽस्तं लीयते चन्द्रबिम्बे,**
**हसितमिव वधूनां प्रोषितेषु प्रियेषु।**

अस्तं गते शशिनि कुमुदमपि संलीयते सावसादं प्रियेण विप्रयुक्तम्। तदिदं तदवस्थं निशाम्य द्रवते चेतः सचेतसः। अयं च कुमुदसंलयः प्रोषितभर्तृकाणां हसितसंलयं स्मारयति तेन सधमति निपुणं करुणरसपरिपोषः कृतः कविनोत्तरार्द्धेन।

प्रसिद्धमिदं हासधावल्यमाश्रित्य पूर्वमेघे कैलासवर्णनायां यत्तस्याचलस्याट्टहासतोत्प्रेक्षिता कविना तत्कस्य सहृदयस्य हृदयं नावर्जयति । आह खल्वेवम् -

**गत्वा चोर्ध्वं दशमुखभुजोच्छ्वासितप्रस्थसन्धेः**
**कैलासस्य त्रिदशवनितादर्पणस्यातिथिः स्याः।**
**शृङ्गोच्छ्रायैः कुमुदविशदैर्यो वितत्य स्थितः खं**
**राशीभूतः प्रतिदिनमिव त्र्यम्बकस्याट्टहासः।।**

अट्टहासो हि कियतश्चित्क्षणानेव व्याप्नुयात्, ततो विलयं यायात्, समुत्तुङ्गपर्वतावभासना तु दूरेऽपास्ता स्यादिति जानानः कविः प्रत्यहं प्रवर्तमानस्य भगवतोऽट्टहासस्य निचेकायोयमित्यपि समुत्प्रेक्षते। इयं च समुत्प्रेक्षा निर्निमित्ता सत्यसंभाव्यतालीढा प्रत्यायिका न स्यादिति निमित्त-मपि वास्तवं प्राह -शृङ्गोच्छ्रायैः कुमुदविशदैरिति ।

यदा कश्चिल्लीलयोपनतमभीष्टमर्थमुपभोक्तुका-मोपि केनाप्यपदेशेन वारितप्रसरो नेष्टे तद्भोक्तुं तस्य कोपमा प्रशस्यतमेति जिज्ञास्यं चेच्छ्रूयतां यदाह दुष्यन्तो निर्वर्णयञ्शकुन्तलाम् -

**इदमुपनतमेवं रूपमक्लिष्टकान्ति**
**प्रथमपरिगृहीतं स्यान्न वेत्यव्यवस्यन्।**
**भ्रमर इव विभाते कुन्दमन्तस्तुषारं**
**न च खलु परिभोक्तुं नैव शक्नोमि हातुम्।।**

विभाते कुन्दं सविकासमप्यवश्यायप्रसेक-पूर्णमिति भ्रमरो मकरन्दं पिपासुरपि न सहते पातुं न च कुन्दं विहातुम्। न चापसरति, किं तर्हि तत्रैव चिरं परिसरति भ्रमरो हि सः। रसेऽभिनवे लोलः स तं पश्यन्नेव कथं कुन्दसंनिधिं जह्यात्। एवं प्रकृते दुष्यन्तः शकुन्तलाया एवमनाकारितोपस्थितायाः शरीरलावण्यं निभालयंस्तेन बलादधृतचेता अपि ममायं परिग्रहो भवति न वेत्यनवधारयन्ममेयं भोग्येति परिग्रहीतुं न पारयति। न च हृदयेन परित्यक्तुम्। महाकविः कालिदास एवंविधेष्वर्थसामान्येषु सौन्दर्यनिर्भरमाधातुमीष्टे नेतरः ।

लोके यः प्रभूणां दासेषु समादरः, गुरूणां वा शिष्येषु, ज्यायसां वा कनीयःसु स तथा समुत्साहाय शक्तिसमुन्मेषाय च भवति यथा ते दासादयो दुःसाधेष्वपि तेषु तेषु कृत्येषु सरभसं प्रवृत्तिमन्तो भवन्ति सिध्यन्ति च। अयं भावः केन दृष्टान्तेन व्यक्ततां रस्यतां चोपनीयेत, केन वाऽर्थान्तरेण समर्थ्येत येन जनस्य वा महाजनस्य वा समं प्रत्यायकः स्यादिति कविः कालिदास एव वेद। कति नाम लोके न्वहमनुभवन्तोपीममर्थं कालिदासवद् विशदयितुमीशीरन्। कौतूहलं चेच्छ्रूयतां रसनिरन्तरा भणितिरेषा कवेः-

**सिध्यन्ति कर्मसु महत्स्वपि यन्नियोज्याः**
**संभावनागुणमवेहि तमीश्वराणाम्।**
**किं वाऽभविष्यदरुणस्तमसां विभेत्ता**
**तं चेत्सहस्रकिरणो धुरि नाकरिष्यत्।।**

अत्र पूर्वार्द्धे प्रतिपादितोर्थ, उत्तरार्द्धगतेनार्थेन समर्थ्यत इति सामान्यस्य विशेषेण समर्थनादर्थान्तर-न्यासोऽलङ्कारः, दृष्टान्तः इति तु राघवः। भवतु तत्तथा अन्यथा वा । इदन्त्ववश्याभ्युपेयं पूर्वत्रोदीरितोर्थ उत्तरार्द्धेन परिपोषं नीतो दृष्टान्तोपन्यासेन वा निदर्शितो यथा बुद्धिमुपारोहति चेतश्च चमत्करोति न तथा केवलः। आदित्यो हि महती देवता, अपरिच्छिन्न-मस्या ऐश्वर्यम्, अनवधिकं च सामर्थ्यमिति सहस्रकिरण इति व्यपदेशेन ध्वन्यते। सहस्रमनन्ता ह्यस्य देवस्य किरणा इति किमात्मनाऽसहायेन तमो भेत्तुं नालम्? बाढमलम्। तत्किं क्षत्तारमरुणं तत्रार्थे नियुङ्क्ते। पुरस्करिष्यामि स्वजनमिति। धुरि करणं सामर्थ्यं मे कुर्विति रथाग्रे निवेशनमेव पुरस्करणं सत्करणं वा तस्य भवति। स चारुणः स्वयमनूरुरिति पङ्गुतोपहतः सर्वथाऽक्षमो यत्र तत्र प्रसृतानां सन्तमसानामपाक्रियायाम्। एवमनीश्वरोपि यदीश्वरो भवति दुर्घटं घटयितुं स आदित्यानुग्रहः, स तत्कृतः सत्कारः। नात्र कारणान्तरं किमपि शक्यमभ्यू-हितुमिति कविर्नो निश्चिकायिषति ।

उर्वश्याः केशिनापहतायाः पुरूरवसा च प्रत्या-हताया मूर्च्छापायं क्रमिकमुपवर्णयन्कविर्यां मालोपमां बबन्ध सा कमपि शोभातिशयं धत्त इतीह संगृह्यते–

**आविर्भूते शशिनि तमसा मुच्यमानेव रात्रि-**
**र्नैशस्यार्चिर्हुतभुज इव च्छिन्नभूयिष्ठधूमा।**
**मोहेनान्तर्वरतनुरियं लक्ष्यते मुक्तकल्पा**
**गङ्गा रोधःपतनकलुषा गृह्णतीव प्रसादम्।।**

नहि शशिनः प्रादुर्भावेन सममेव रात्रिस्तमिस्रेण मुच्यते सहसा, अपि तु प्रारभ्यते तस्यास्ततो मोक्षो न तु परिसमाप्यते। तत्र काल उभयोरपि तेजस्तिमिरयोः सहावस्थितेः। मोहो नाम मूर्च्छा संमीलनमिन्द्रिया-णामिति साधूपमीयते तमसा। प्रबोधश्चालोकसम इत्युपपन्न उपमानोपमेयभावः। मूर्च्छापि बहुलं गता न त्वखिलम्। सौरं तेजः सायमग्निं संक्रमते, आदित्यो वा अस्तं यन्नग्निमनुप्रविशतीत्यादिभिः श्रुतिभिर्नैशो वह्निरधिकं दीप्यते, प्रायेण विधूमश्च भवति। न चात्यन्तमधूमः। भगवती भागीरथी स्फटिकविशद-मम्बुराशिं वहन्त्यपि कूलपातेन कादाचित्केन वार्षिकेण वा कालुष्यमुपैति, मलीमसोदका भवति, परं नचिरादेवापेतकालुष्या प्रसन्ना भवति। यदा च साऽनधिगतपूर्णप्रसादा प्रसन्नप्राया समस्ति तदवस्था सोपमा मोहाद्विमुच्यमानाया उर्वश्याः।

कालिदासे कीदृक् प्रकृतिवर्णनमिति विमृशामः। प्रकृतिशब्देनेह बाह्यवस्तुस्वभाव उच्यते मनुष्यादिप्राणिवर्गस्य च स्वभावः प्रवृत्तिर्वा। तेन सर्गसौन्दर्यवर्णना प्रकृतिवर्णनं भवति मनुष्यादि-हृदयनिरूपणं च। उभयत्रायं कविः परां सीमानमुपगतः प्रावीण्यस्य। स्त्रियो नाम कुतूहलिन्योपि निसर्गशालीना भवन्तीत्ययमर्थो यया रीत्या कविनोक्तः सा कामपि हृदयङ्गमां चमत्कृतिं वहति। एवं ह्याह मालविकामधिकृत्य नायकमुखेन –

**कार्त्स्न्येन निर्वर्णयितुं च रूप-**

**मिच्छन्ति तत्पूर्वसमागमानाम् ।**
**न च प्रियेष्वायतलोचनानां**
**समग्रपातीनि विलोचनानि॥**

इदं ह्यसकृदनुभूयते लोके इदम्प्रथमे वरवध्वोः समुपश्लेषे। आयतलोचनानामिति विशेषणं विशेष्यसमर्पकम्। साभिप्रायं चेदम्। आयतलोचना अपि सत्यस्ता योषाः कृत्स्नं रूपं नावलोकितुं पारयन्ते। कस्तत्र हेतुः? किमिच्छाविरहः। नेत्याह। इदं प्रथममुपनतः समागमः, तत्र कार्त्स्न्येन रूपदिदृक्षा कस्या न स्यादन्यत्र तत्कर्मण्यनर्हायाः। शालीन्यमेव सहजं तत्र हेतुरिति कविर्निपुणमीक्षते। शालीन्येन परवत्यस्ता दिदृक्षितेऽपि प्रिये चक्षूंषि विस्फार्य व्यापारयितुं नोत्सहन्ते।

सूर्यचन्द्रादीनां दशापरिवर्तोऽपि दशावैषम्यमनुभवन्तं लोकं येन प्रकारेण धैर्यमुपदिशति तमित्थमाह-

**यात्येकतोऽस्तशिखरं पतिरोषधीनाम्**
**आविष्कृतारुणपुरःसर एकतोर्कः।**
**तेजोद्वयस्य युगपद् व्यसनोदयाभ्यां**
**लोको नियम्यत इवात्मदशान्तरेषु।।**

**इदमत्र हृदयम्**-ओषधीनां पतिरपि भैषज्यकुशलः समृद्धिमानपि सन्निति ध्वनिः। अरुणो नामानूरुरुत्थानेऽभ्युदयेऽक्षमस्तं तथाभूतमपि पुरस्करोति, उदयं गमयति रविः। अत्र यः स्वयमुदियियासुः परमपि तत्राक्षममुदयं प्रापयति सोपि ध्वन्यते। सूर्याचन्द्रमसोरुभयोस्तेजसोरुदयास्तमयौ समुन्नतिभ्रंशौ लक्षयन् विषमस्थो जनः स्थाने समाश्वस्तः स्यात्। यदि भगवन्तौ पुष्पवन्तावप्यालोकाह्लादैकयोनी एवं दशापरिवर्तमश्नुवाते का कथेतरेषां जनिजुषाम्। प्रभातवर्णनमिदं नाप्रयोजनं कविसामर्थ्यप्रदर्शनमात्रप्रयोजनकं वाऽप्रसक्तम्। वेलोपलक्षणार्थमादिष्टः शिष्यस्तद्वर्णनायां प्रवृत्त इति नितरां प्रासावसरमेतदिति कः सुधीः सन्दिहीत। यश्च तेजोद्वयस्य व्यसनोदयोपन्यासः सोपि समासन्नशकुन्तलाविप्रयोगदूनचेतसोः सख्योराश्वासनायेति सुतरामौपयिकः।

इदं चावश्यमभ्युपेयं प्रकृतिं चेतनां संवेदनवतीं ज्ञप्तिमतीं वा प्रतिपादयन्नपि कविरुत्प्रेक्षितोयमर्थो न वास्तव इतीवादिशब्दप्रयोगेण व्यनक्ति। शकुन्तलायां पतिकुलं प्रति प्रस्थितायां मृग्योपि सखीभिरनसूयादिभिः समं दुःखसब्रह्मचारिण्यो भवन्तीति निदर्शयन्नाह –

**उद्गलितदर्भकवला मृग्यः परित्यक्तनर्तना मयूराः।**
**अपसृतपाण्डुपत्रा मुञ्चन्त्यश्रूणीव लताः।।**

अत्र पूर्वार्द्धे यथा मृगीणां शोकपरीतानां मुखगृहीतकवलानामर्धावलीढानामुद्गरणमुक्तं मयूराणां निरुत्सवानां च नर्तनविराम इत्युभयं वास्तवं भाति न तथोत्तरार्द्धे लतानामश्रुविहारः। इवशब्दो हि कृतस्यापि तस्य मिथ्यात्वं ब्रवीति।।

– देहली

[विशिष्टोऽयं लेखो 'भारती' पत्रिकायां पूर्वं (वर्ष-६, अङ्कः-६, चैत्रमासः, वि.सं.२०१२) प्रकाशितोऽधुनाऽऽदर्शरूपेण कौस्तुभ-जयन्त्यवसरे पुनः प्रकाश्यते।] – सम्पादकः

# तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ

❑ पण्डित-कालिकाप्रसादशुक्लः*

इदं धराधाम सर्गस्यादित एव बुद्धिवादस्य शास्त्रवादस्य च विशालं मानवमस्तिष्कस्य चरमविकास-सीमा मनीषिमल्लभूमिरिव जयतीति नास्ति प्रेक्षावतां तिरोहितम्। एकः पक्षोऽनपेक्षितशास्त्रतर्ककर्कशसाधारणमानवमस्तिष्कमेव प्रबल-प्रमाणत्वेन परिगणयन्, तदुर्वरप्रदेशात् प्रसूतं मतमेव सिद्धान्तभूतं मन्यमानः तदनुकूलमेव पन्थानमवलम्बितुमागृह्णाति स्वपक्षावलम्बिनः। अन्यश्च पक्षः कामं तद्विरुद्धवेदोदितहेयहान्युपादेयोपादानशबलित-पथस्य वेदमूलकातीतानागतवस्तुजातसाक्षात्कार-कलितान्तःकरण-ऋषिप्रणीतस्मृतिप्रतिपादितवर्त्म-नश्चावलम्बन एव प्राणिजातस्य श्रेयःप्रेयसी कलयति, समुपदिशति चानवद्यं तमेव पन्थानमाश्रयितुम्। विशेषतोऽनयोः पक्षयोः प्रथमस्य परिग्रहीता भौतिकवादेऽभिनिवेशनिविष्टः पाश्चात्त्यो देशो नितरां नेत्रातिथीक्रियते, द्वितीयस्य च शास्त्रप्रतिपादित-मार्गैकशरणो भारतः।

यद्यपि भरतभूमिरपि पक्षद्वय-स्यास्य द्वन्द्वादात्मानं मोचयितुं नाशकत्, परिणामतोऽत्रापि परस्परं कलहायमानानामास्तिकनास्तिकद्विविध-दर्शनानां दर्शनं समभूत्। परिस्थितिविशेषे विकासो ह्रासश्चापि द्विविधदर्शनानां समान एवासीत्। तथापि भारतस्य शास्त्रवादस्य विजयवैजयन्ती सर्वदैव समुल्लसन्ती, अजयत्, जयति, जेष्यति चेत्येवं भगवतो भूतभावनस्य कश्चनापरिहेयः सङ्केतोऽ-स्तीत्यत्र नास्ति मतद्वयस्यावकाशः।

अहो? भारतेऽपि बुद्धिवादः? तत्रापि शास्त्रवादस्य प्रतियोगितायाम्? अलीकमेतत्! अथवा वर्तते चेत् वर्तताम् भौतिकपदार्थचिन्तनाय चिरंजीवतात् पूर्वपक्षत्वेन शास्त्रवादस्य, सुखं तिष्ठतु समुद्ररत्नेन सह शुक्तिकेव, न तत्र कश्चन मत्सरः, तेन न किञ्चिच्छिन्नं शास्त्रवादस्य, प्रत्युत स्फटिकनिर्मलता प्रकाशिता भवति, स्वीकृता भवति चोपादेयता। परं विस्मयसागरस्तदैव वेलां विगलति, यदा बुद्धिवादा-भिनिवेशानां साहसं लौकिकबुद्ध्यचिन्त्यापरिमेय-भावेष्वपि तत्त्वविनिश्चयात्तथैव न विरमति यथा लौकिकभावेषु।

परन्तु बुद्धिवादकलितान्तःकरणैः कदापि न विस्मर्तव्यं यदचिन्त्याऽपरिमेयभावानां धर्मादीनां निर्णये शास्त्रमेव अभवति, नानपेक्षित-शास्त्रः कर्कशस्तर्कः 'तस्माच्छास्त्रं प्रमाणं ते कार्या-कार्यव्यवस्थितौ'। तर्कस्य वार्ता तावत् कोणे तिष्ठतु, अन्यानपेक्षप्रत्यक्षस्यापि मनाक् सामर्थ्यन्नास्ति धर्मादीनां पदार्थानां प्रामाण्ये, यतो हीन्द्रियसंयुक्तानां तत्तदिन्द्रियग्राह्यतत्तद्गुणानां द्रव्याणामेव प्रत्यक्षविषयत्वेन विद्यमानोपलम्भनत्वाद्भविष्यति धर्मेऽरूपे ब्रह्मणि च प्रत्यक्षविषयता गगनकुसुमायिता

* भट्ट-नागेश-विरचिताया

*परमलघुमञ्जूषायाः ज्योत्स्ना-टीकाकारः

भविष्यति, यद्यपि श्रेयस्करभाष्ये गोदानादि द्रव्यं, यागादिक्रिया, नीचैस्त्वादिगुणश्च फलसाधनत्वेन धर्मशब्देनोच्यते नापूर्वादि। य एव श्रेयस्करः स एव धर्मशब्देनोच्यते। न केवलं लोके, वेदेऽपि, 'यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्' इति 'यजति' शब्दवाच्यमेव धर्म समामनन्ति। तेषाञ्चैन्द्रियिकत्वात्, धर्मस्य प्रत्यक्षविषयता वज्रलेपायत एव। तथापि तेषां फलसाधनस्वरूपेण धर्मताऽस्ति, फलञ्च जन्मान्तरभावीति प्रत्यक्षगोचरता धर्मस्वरूपेण शशशृङ्गायमाणैवास्ति।

उक्तञ्चैतत् –

**'द्रव्यक्रियागुणादीनां धर्मत्वं स्थापयिष्यते।**
**तेषामैन्द्रियकत्वेऽपि न तादूप्येण धर्मता ।।१।।**
**श्रेयःसाधनता ह्येषां नित्यं वेदात् प्रतीयते।**
**तादूरूप्येण तु धर्मत्वं तस्मान्नेन्द्रियगोचरः ।।२।।'**

'धर्मः स्वनुष्ठितः पुंसां' 'धर्मः क्षरति कीर्तनात्' इत्यादिस्थाने यागादेरेव धर्मत्वस्य मीमांसाशास्त्रेण व्यवस्थापनात्, अन्यैः सर्वैश्च तथैवाभ्युपगम्यते। यद्येतादृशे प्रसङ्गे तर्कस्य कर्कशकरे धर्मस्य शिखा स्यात्तदा वराकस्य धर्मस्य दुर्दशैव स्यात्

यतो हि यागत्व-स्वर्गसाधनत्वयोर्व्याप्यव्यापकभावस्य काप्यगोचरीकृतत्वेन 'प्रमाणेन निश्चितायां व्याप्तौ साधनं साध्यं निश्चिनोती'ति नियमात् व्याप्तिग्रहाभावेन, तन्मूलकस्यानुमानस्यापि निरासात्, साहचर्यनियमस्य व्याप्तेरभावात्। वह्निधूमयोर्भोजनशालायां गृहीतमेव साहचर्यं पुरस्कृत्य पर्वते वह्निरनुमीयते धूमात्। युक्तिवादिनो नास्ति तद्वदिहापि। एवञ्च व्याप्तिग्रहाभावेऽवशैस्तर्कैकशरणैरत एव तार्किकैर्वक्तव्यं भवेत् 'यद् वह्निरेव दहति न जलमिति स्वभाव एव प्रमाणमि'ति, न किमपि युक्त्यंतरं समुपस्थाप्येत, तथैव यागः स्वर्गसाधनं, यागत्वात् (स्वभावात्) इति यागस्य कश्चन स्वभाव एव तादृशो येन स्वर्गं प्रापयतीत्येव तैर्वक्तव्यं भवेत्। परन्तु अग्नेर्दाहकतायाः प्रत्यक्षसिद्धत्वेन वह्नेर्दाहजननस्वभावस्य सोरस्ताडं प्रतिपादयितु शक्यत्वेऽपि यागे स्वर्गसाधनताया अप्रत्यक्षतया यागः स्वर्गसाधनस्वभाव इति निवेदयितुं मुखमपि कथमुद्घाटितं भवेत्। यदि आगमात् यागत्वस्वर्गसाधनत्वयो र्व्याप्यव्यापकभावं विनिश्चित्यानुमितीच्छयानुमितौ प्रवृत्तिश्चेत्तदा नास्त्यस्माकं काचनापि विप्रतिपत्तिः प्रत्युत महान् प्रमोद एव। सम्यगुक्तम् –

'हैतुकान् बकवृत्तींश्च वाङ्मात्रेणापि नार्चयेत्' इति। अतएव साधूक्तं महावैयाकरणेन भर्तृहरिपादेन–

**'हस्तस्पर्शादिवान्धेन विषमे पथि धावता।**
**अनुमानप्रधानेन विनिपातो न दुर्लभः।।**

(ब्रह्म का. ४२ श्लोकः)

जैमिनीयं मीमांसाशास्त्रमपि तदेव प्रतिपादयति–

**'आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना।**
**यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः।।'**

अस्येदं तात्पर्यं यत् आगमानपेक्षशुष्कतर्कस्य न किमपि मूल्यम्। एतत्सर्वं मनसि निश्चित्य प्रोक्तं –

**'न चागमादृते धर्मस्तर्केण व्यवतिष्ठते'**

– वाक्यपदी., ब्रह्म का. ३० श्लोकः।

योगाभ्यासजनितसंस्कारविशेषभावनाबलाज्जात-योगिप्रत्यक्षं धर्मनिर्णायकं भवेदित्यपि केषाञ्चिद् विदुषां मनोरथमात्रम्। भावना हि अनुभूतपदार्थगोचरनियतानुभूतेषु निश्चयरूपां स्मृतिं जनयति, सा च न प्रमाणं स्यात् यतो हि सा स्मृतिः।

इदमत्राकूतं यत् ऋषीणां यद् अतीन्द्रियार्थ-विषयकं प्रातिभं ज्ञानं भवति तदपि आगममूलमेव न स्वोत्प्रेक्षामूलम्। आगमप्रतिपादितजपतपः स्वाध्या-याचरणपरिपूतात्मनामेव ऋषित्वेन आर्षज्ञानस्य प्रतिभासंज्ञकधर्मविशेषजन्यस्यागममूलकत्वमेव नितान्तमौचितीमादधाति। वैपरीत्ये तु ऋषिप्रणीत-स्यागमत्वादागमप्रतिपादितस्याचरितुश्च ऋषित्वात् परस्पराश्रय आपतेत् – उक्तं च

**'एवं यैः केवलं ज्ञानमिन्द्रियाद्यनपेक्षिणः।**
**सूक्ष्मातीतादिविषयं जीवस्य परिकल्पितम्।**
**नर्ते तदागमात् सिद्ध्येन्न च तेनागमो विना'**

(श्लोकवार्त्तिक।) उक्तार्थाभिप्रायेणोक्तम् –

'ऋषीणामपि यज्ज्ञानं तदप्यागमपूर्वकम्।' (वाक्यपदीये ब्र का. ३०)।

मास्तु तावत् यत्र तर्कस्य पादो न प्रसरति तत्र तर्केण धर्मप्रमितिः परन्तु यत्र तर्कः सर्वथा समर्थः यथा 'नरकपालं शुचि प्राण्यङ्गत्वात्' अग्निषोमीय-पशुहिंसा नरकसाधनम् पीडाजनकत्वात्, ब्रह्मवधा-दिवत्, इत्यादिस्थले तर्केणैव धर्मप्रमितिः स्यान्नागमेन–इत्यपि केषाञ्चित्तार्किककल्पानां साहसमात्रमेव यतो हि अस्य प्रश्नस्यापातत एव रमणीयता वर्तते सद्विचारनिकषोपले त्रपुतामेव भजेत्।

यतो हि अनादिकालतः शिष्टानां परम्परातः अविच्छिन्नतया प्राप्तानि अत एव लोके प्रसिद्धानि धर्मा-धर्मादि-परोक्षवस्तु-निर्णायकानि श्रुतिस्मृति-प्रभृति-शास्त्राणि तर्केण न कदापि पराभवितुं शक्येरन्। लोकप्रसिद्धिपरम्परायाः पुरः तर्कस्य विद्वत्परिषदि तदेव मूल्यं भविष्यति यदेव कस्याञ्चित् प्रामाणिकव्यक्तेः समक्षं कस्यचित्प्रमत्तस्य। अत आगमस्य तर्कद्वारा बाध्यता न स्यात्, प्रत्युत नरकपालस्य शुचित्वं यागीयहिंसाया अहिंसात्वं च प्रतिपादयतागमेनैव तर्कः पराभूयेत,

**'धर्मस्य चाव्यवच्छिन्नाः पन्थानो ये व्यवस्थिताः।**
**न तांल्लोकप्रसिद्धत्वात् कश्चित्तर्केण बाधते।।'**

वाक्यपदीये ब्र. श्लो. ३१

येऽपि कर्कशतर्कैकशरणाः अनुग्रहाद् धर्मं, पीडातोऽधर्मञ्चानुमिमते, तेषां पन्थानमाश्रयतां जनानां मधुपाने गुरुतल्पगमनेऽपि भूयान् धर्मः प्रसज्येत, यतो हि तत्रापि भूयसी उपकारिता वर्तत एव। तस्मादनुमानेन परोक्षवस्तुनिर्णयेऽनर्थपरम्परामृगया न भवन्तु। तार्किकास्तदर्थं शास्त्रेण यन्निषिद्धं तदेवाधर्मः, यद्विहितं तदेव धर्मः तथा यस्य कर्मणो यत् फलं प्रतिपादितं तदेव फलं नान्यदिति समीचीनं पन्थानमाश्रयितुमागममेवावलम्बन्ताम्। तादृशनिश्चये

तदेवोक्तम् भट्टपादेन 'चोदनालक्षणो धर्मः' इति सूत्रे। श्लोकवार्तिकेऽपि –

**धर्माधर्मावबोधस्य तेनायुक्तानुमानगीः।**
**अनुग्रहाच्च धर्मत्वं पीडातश्चाप्यधर्मताम् ॥१॥**
**वदतो जपसीध्वादिपानादौ नो भयं भवेत्।**
**क्रोशता हृदयेनापि गुरुदाराभिगामिनाम् ॥२॥**
**भूयान् धर्मः प्रसज्येत भूयसी ह्युपकारिता।**
**अनुमानप्रधानस्य प्रतिषेधानपेक्षिणः ॥३॥**
**हृदयक्रोशनं कस्मात् दृष्टां पीडामपश्यतः।**
**तस्मादनुग्रहं पीडां तदभावमपास्य च ॥४॥**
**धर्माधर्मिभिर्नित्यं मृग्यौ विधिनिषेधकौ।**
**तस्माद् यद् यादृशं कर्म यत्फलोत्पत्तिशक्तिकम्।**
**शास्त्रेण गम्यते तस्य तादृशस्यैव तत्फलम्।**

न केवलमतीन्द्रियपदार्थावबोध एव तर्कस्या-सफलता अनुभूयते प्रत्युत लौकिकेष्वपि पदार्थेषु तर्कस्य सैव दुरवस्था सर्वतो भासते। यदि कश्चन बुद्धिवादी स्वां बुद्धिमवलम्ब्य सोरस्तार्ड प्रतिपादयेत् यत् 'शीतस्पर्शेन जलमनुमेयम्, उष्णस्पर्शेन तेजः' परन्तु मनोरथमात्रमेतत्तस्य यतोऽवस्थादेशकालभेदात् पदार्थानां शक्तिषु भूयान् भेदो दृश्यते। एवञ्च हेतूनां व्यभिचारात् अनुमितिः शशशृङ्गायमाणा स्यात्। तथाहि अवस्था-भेदात्- बीजानां मूषिकानाघ्राता-नामेवांकुरजननशक्तिर्नान्यथा पिपल्यौषधेरार्द्रस्य कफजननशक्तिः शुष्कस्य च त्रिदोषशमनशक्तिः, यादृशं बलं यौवने न तादृशं बलं परिणतवयसि। देशभेदात् जह्नुकन्याया एव शीतस्पर्शो न बलाहकाग्निकुण्डजलेषु। कालभेदात् हेमन्ते कूपोद-कमुष्णं ग्रीष्मे च शीतम्, ग्रीष्मे अग्नेरत्युष्णः स्पर्शो न तथा हेमन्ते। एवं भूयान् भेदो गणयितुमशक्यः। एवञ्च जलत्वसाधनेन उष्णत्वस्य शीतत्वस्य वा नानुमानं कर्तुं शक्यते तत्र तत्र व्यभिचारात्। अनुमातारो दृढं विश्वसन्ति यद् धूमो वह्निं न व्यभिचरति परन्तु इदन्तेषां विश्वासमात्रम्, अथवा अभिमानमात्रम्, अवस्था-देशकालभेदात् स्यादपि कश्चन तादृशो धूमो यो वह्निं व्यभिचरेदपि यथा शालूकादपि शालूको गोमयादपि। एवञ्च यदि लौकिकेषु पदार्थेषु एवमव्यवस्था तदाऽप्राकृतगम्ये पदार्थेऽनुमानस्य का दुरवस्था स्यात्। तत् साधूक्तं भर्तृहरिणा–

**'हस्तस्पर्शादिवान्धेन विषमे पथि धावता।**
**अनुमानप्रधानेन विनिपातो न दुर्लभः॥**

(वा. ब्र. का. ४२ श्लोकः।)

एतत्सर्वं पर्यालोच्यागमचक्षुरन्तरेण तर्कमात्रेण को मनीषी तत्त्वं निश्चेतुकामो भवेत्? तदुक्तम् –

**अवस्थादेशकालानां भेदाद् भिन्नासु शक्तिषु।**
**भावानामनुमानेन प्रसिद्धिरिति दुर्लभा॥**

– वा. ब्र. ३३

शाङ्करभाष्येऽप्युक्तं 'लौकिकानापि मणिमन्त्रौ-षधिप्रभृतीनां देशकालनिमित्त-वैचित्र्यवशाच्छक्तयो विरुद्धानेककार्यविषया दृश्यन्ते, ता अपि तावन्नोपदेशमन्तरेण केवलेन तर्केणावगन्तुं शक्यन्तेऽस्य वस्तुन एतावत्य एतत्सहाया एतद्विषया एतत्प्रयोजनाश्च शक्तय इति किमुताचिन्त्यस्वभावस्य, तस्माच्छब्दमूल एवातीन्द्रियार्थयाथात्म्यावगम' इति।

अयं दहति वह्नित्वादित्याद्यनुमानेन दाहजनकत्वानुमितिरपि शास्त्रतत्त्वावगाहनापटुसरलानां परप्रत्ययनेयमतीनां प्रतारणमात्रमेव, मणिमन्त्रादीनां प्रतिबन्धकद्रव्याणां समवधानेऽग्नित्वस्य दाहजनकत्वव्यभिचारस्य शतशोऽनुभवात्। एवञ्च वस्तुस्वभावो नानुमानेनावगन्तुं शक्यतेऽपितु आगमादेव।

अतएवोक्तं भर्तृहरिणा (वा.ब्र.३३) –

**'निर्ज्ञातशक्तेर्द्रव्यस्य तां तामर्थक्रियां प्रति।**
**विशिष्टद्रव्यसम्बन्धे सा शक्तिः प्रतिबध्यते'।**

सुकुमारमतीनां तर्कस्याव्यवस्थावार्ता तावत् कोणे तिष्ठतु महापुरुषाणां कपिलकणादादीनामपि परस्परमतिशयविप्रतिपत्तिदर्शनेन तेषामपि तर्काः नितरां दुर्व्यवस्थामेवातन्वन्ति प्रेक्षावतां मानसमानसे, यतो हि आजानबाहुमहर्षिकपिलपादैर्महता प्रयत्नेन प्रकृतिर्जगत्–कारणत्वेनोत्प्रेक्ष्यते, प्रातःस्मरणीयैः कणादपादैः परमाणुः तथात्वेनो(जगत्कारणत्वेन)–त्प्रेक्ष्यते। अत्रानुरूपैव बुद्धिर्भवतीति महर्षिकणादेन सत्यापितम्। अन्यैस्तर्कवादिभिरन्यथैव तर्क्यते। उक्तञ्च वाक्यपदीये (१.३४) –

**'यत्नेनानुमितोऽप्यर्थः कुशलैरनुमातृभिः।**
**अभियुक्ततरैरन्यैरन्यथैवोपपाद्यते।।'** इति।

यतो यत्नेन निर्णीता अपि आगमानपेक्षाः पुरुषोत्प्रेक्षामात्रनिबन्धनास्तर्का अव्यवस्थिता भवन्तीति नागमगम्येचिन्त्यापरिमेयपदार्थे केवलेन तर्केण प्रत्यवस्थातव्यम्। आह च भगवान् बादरायणः 'तर्काप्रतिष्ठानादि'ति।

– **व्याकरणाध्यापकः**, संस्कृत महाविद्यालयः,
महाराज–सयाजिरावविश्वविद्यालयः, **बड़ौदा**

[विशिष्टोऽयं लेखो 'भारती' पत्रिकायां पूर्वं (वर्ष-६, अङ्कः-१२, आश्विनमासः, वि.सं.२०१३) प्रकाशितोऽधुनाऽऽदर्शरूपेण कौस्तुभ-जयन्त्यवसरे पुनः प्रकाश्यते।] – सम्पादकः


# ऐसे बन सकते हैं आप भारती पत्रिका के ग्राहक :-

भारती पत्रिका का वार्षिक शुल्क रुपये 250/-, पंचवर्षीय शुल्क 1100/-, आजीवन सदस्यता ( 15 वर्ष ) शुल्क 3100/- मात्र है। आप केनरा बैंक की किसी भी शाखा में जाकर हमारे निम्नलिखित खाते में राशि जमा करा कर जमा रसीद की फोटो प्रति ई-मेल से या डाक द्वारा भिजवा देवें।

**खाते का नाम - भारतीयसंस्कृतप्रचारसंस्थान**
**खाता संख्या - 21391010912498**
**IFS Code - CNRB0002139**

# अद्यतनीयं निर्वीर्या विद्या

( महात्मनः श्रीविनोबाभावेमहाभागस्य प्रेरणाप्रदानि प्रवचनानि )*

( 1 )

अस्माकमयं देशः सुविशालो, जनसंख्या चात्रत्यातिमहती, विस्तारोऽपि च महान्, स्वराज्यमपि लब्धम् परन्तु देशस्य शक्तिर्देशवासिनां चारित्र्येण वर्द्धते। कस्यापि च देशस्य सेना बलीयसी भवति न ततः स देशो बलवान् भवति परं तद्देशस्य गुणेष्वेव तस्य शक्तिर्निर्भरा भवति। अतो यदि देशस्य विकासमभिलषामो देशस्योन्नतिमपेक्षामहे तदा देशवासिनो लोका गुणविकासं कुर्युरित्यावश्यकम्। विषयोऽयमतीव विचारविमर्शसापेक्षश्चिन्तनीयश्चास्ते।

इदानीं लोकैः सर्वकारस्य शिरसि महानेव गुरुतरो भारो निहितः। अधिकादधिकं ते केवलमल्पतरं सहयोगं प्रददति। महत्याः सेनायाः सङ्घटनाय धनस्यावश्यकता भवति, लोकाः करं दत्त्वा मन्वते यद्वयं नागरिकाः सुरक्षिताः स्म इति। परन्तु यावत्ते स्वयमेव निर्भीका न भवन्ति तावत् ते सुरक्षिता नैव भवितुं पारयन्ति। ते दुर्बला एव स्थास्यन्ति। वयमेवात्मनः संरक्षणं कुर्मो नायं विश्वासो लोकेषु जागर्ति। सैन्यबले विश्वासोऽस्ति, भोगविलासेष्वेव जीवनस्थितिराधारितास्ति। नित्यमेव हि लोकाश्चित्रपटावलोकनं कुर्वन्ति। अश्लीलं साहित्यं पठन्ति। व्यसनेषु निमग्नास्तिष्ठन्ति। रात्रौ जागरणमाचरन्ति प्रातर्नो जाग्रति। वर्षायां बिभ्यति। पुरुषेषु क्रियाशक्तिर्नावलोक्यते। सूर्यातपे कार्यसम्पादनस्य सामर्थ्यं नास्ति। अस्यां स्थितौ, यदि श्रूयते यद्धि युद्धमारभ्यत तत्र चास्माकं सैन्यं पश्चात्पदं जायमानमास्ते तदा किं नु बत भविष्यतीति महत्याश्चिन्ताया विषयोऽयम्। सर्वेऽपि च लोकाः स्वात्मानं दुर्बलं मत्वा चिन्तयेयुर्यदधुनास्माकं किं भाव्यमिति। मन्ये, देशस्य नैतिकं बलं विनष्टप्रायम्। कातरं देशं रक्षितुं सैन्यं न प्रभवति। अद्यत्वे देशस्य सर्वेऽपि च नागरिकाः सर्वेऽपि च बालकाः सर्वा अपि कन्याः सर्वे पुरुषाः सर्वाश्च स्त्रियो निर्भया भवेयुरित्यावश्यकम्। जीवनं व्यसनग्रस्तं न भवितुमर्हति। भोगोपकरणानि नो वृद्धिं गन्तुं योग्यानि। यदीत्थंविधा देशस्य प्रवृत्तिर्जायते, निर्भीकत्वं तपश्च विवर्द्धते तदैव देशो बलीयान् भवति। अस्यायमभिप्रायो यद्देशस्य गुणा विवर्द्धेरन्निति।

( 2 )

मन्यते, यदत्र देशेऽस्माकं पूर्वापेक्षया विश्वविद्यालया अन्येऽपि च विद्यालया वृद्धिं गताः। अद्यत्वे सर्वसाधारणोऽपि जीवनविकाशस्य प्रथमक्षणादेव विद्यालयं प्रति गतिशीलो भवति परन्तु स तत्र नो ज्ञानप्राप्तये गच्छति यतो ज्ञानं तु तस्य मस्तिष्के बलादुपस्थाप्यते ततः पुनः स किमर्थं तत्र गच्छति? यतो विद्यालयगमनात् स जीविकावृत्तिं लप्स्यते, अर्थाद् विनैव कर्मयोगाचरणात्तस्य जीविकायाः प्रबन्धो भावी। इत्थमनेन प्रकारेणाद्य

---

(**मूललेखकः**– श्रीकृष्णदत्तभट्टमहाशयः।
**अनुवादकः**– श्रीगणेशरामशर्मा, साहित्यरत्नम्, झालावाड़)

शिक्षितानां संख्यातीव वृद्धिं जगाम परं ज्ञानं तु नो ववृधे प्रत्युत कार्याद्विमुखीभावस्य प्रेरणाया एव विकासो बभूव एतत्प्रतिभाति। यावन्तो विश्वविद्यालया वृद्धिमेष्यन्ति तावानेव देशोऽयं निर्बलोऽयोग्यश्च बोभूयमानो भविता। यदि प्रजासु ज्ञानस्य जिज्ञासावृत्तिर्भवित्तर्हि देशः खलून्नतिमासादयिष्यति। देशस्याबालवृद्धं सर्वेऽपि जनाः क्षेत्रेषु कार्यसम्पादनाय व्रजेयुस्ततो निवृत्त्य सायं खल्वध्ययनं कुर्यू रात्रौ च शीघ्रमेव शयीरन्, प्रातः शीघ्रमेव प्रबुध्येयुः, षड्वादनवेलायां स्वकार्यनियोगे संलग्नाश्च भवेयुः। तत्पूर्वं घण्टाद्वयपर्यन्तमाध्यात्मिकमध्ययनं कुर्युः। अप्येतदसम्भवम्? यथाहारं विना दिनं न व्यत्येति तथैव ज्ञानलाभं विनापि च नैकमपि दिनं व्यर्थतां गन्तुं योग्यम्। विधिनानेन यदा ज्ञानप्रणयिनो वर्द्धिष्यन्ते तदैव देशोऽयमुन्नतो भावी। न केवलं विश्वविद्यालयानां संख्यावर्द्धनादेवैतद्भविष्यति प्रत्युत प्रत्येकं जनस्य ज्ञानतृषा वृद्धिं नेया भवति।

## (3)

लोकमान्यः श्रीमांस्तिलकमहाभागः कारागृहे ग्रन्थरचनामकार्षीत्, शर्मण्यभाषायाः फ्रेञ्चभाषायाश्चाध्ययनमपि सत्यपि वार्द्धक्ये सः कारागृह एव चक्रे। स खलु राजनीतिगतानि कार्याण्यपि चकार। अतः स निखिलमपि दिनं यावदद्ध्येतुमवकाशं नो लेभे। तस्मात् स निशीथं यावद्वेदानामध्ययनमाचचार। एतावती हि ज्ञानतृषा तिलकस्यासीत्। तत एव हि जीवनान्तं यावत्तस्य स्फूर्तिरप्रतिहताक्षुण्णा च तस्थौ। परं वयमिदानीं किं पश्यामः? यावन्तोऽपि सुशिक्षिता वर्तन्ते ते सर्वेऽपि विश्वविद्यालयान्मुक्तास्सन्तस्तत्क्षणमेव पाठ्यपुस्तकानि दूरमपस्थापयन्ति। पठनानन्तरं ते जीविकोपार्जनाय भृतिकर्मकरणमेव चिन्तयन्ति। बहवो जना एतदपि ब्रुवन्ति यद्बाल्य एव यावदपेक्षितमध्ययनं कर्तव्यमन्यथाध्ययनस्यावसरो नाग्रे समुपलब्धः स्याद्यतोऽग्रे तु गृहस्थाश्रमस्य प्रपञ्चो विद्यत इति। परमुपनिषदोऽस्मात्सर्वथा प्रतिकूलमेवावोचुः - 'ब्रह्मचारिणो विद्यार्थिनश्च स्वाध्यायमाचरेयुः परं तु गृहस्थाश्रमेऽपि च ते नाध्ययनमपत्यजेयुः'

- 'कुटुम्बे शुचौ देशे स्वाध्यायमधीयानः'

अस्यायमभिप्रायो यद्गृहस्थोऽपि जनः कुटुम्बे क्वचित् सुरक्षितं स्थानं परिकल्प्य निरन्तरमध्ययनशीलस्तिष्ठेत्। एतद्धि गृहस्थाश्रमवर्णनमुपनिषत्सूपलभ्यते । प्रत्येकस्मिन् कर्मणि किलाध्ययनं भवितुमर्हति। 'अग्नयश्च स्वाध्यायप्रवचने च' अग्निसेवया साकमेव स्वाध्यायप्रवचने भवितुमर्हतः। देशेऽस्माकं भगिन्यस्तु नित्यमेवाग्निसेवामाचरन्ति परन्तु तया सह स्वाध्यायोऽपि जायते किम्? 'अतिथयश्च स्वाध्यायप्रवचने च।' अतिथिसेवां कुर्वाणोऽपि च स्वाध्याय प्रवचने कुर्वीत। अर्थात् गृहस्थाश्रमस्य यावत्कर्तव्यानि समाचरञ्जनः स्वाध्यायप्रवचने कुर्यादित्युपनिषदि वर्णितम्।

## (4)

अद्यत्वे विद्यार्थिनां यज्जीवनं वर्तते तेन नैतद्वक्तुं शक्यते यत्ते सत्यमेव विद्यार्थिनः सन्ति, न ते विद्यार्थिनः परं ते तु परीक्षार्थिनः सन्ति। नैतेषु ज्ञानजिज्ञासैव विद्यते। अद्यत्वे ये हि छात्रालयाः ख्यातिं गतास्तेषां विषयेऽपि चैतदुच्यते यत्तत्र सर्वविधा

सुविधास्ति, विविधप्रकारा सुखसामग्री च तत्र विद्यमानास्ते परं भगवान् व्यासदेव उवाच –

**'सुखार्थिनः कुतो विद्या,**
**कुतो विद्यार्थिनः सुखम्'** इति।

सुखापेक्षिणो विद्यार्थिनः कुतो विद्यां लभेरन् विद्यार्थिनश्च कुतः सुखमाप्नुयुः। तथापि लोका इदानीं विद्यां सुखं च युगपदवाप्तुमभिलषन्ति । परिणामतः सा विद्या विद्या नैव भवति। इत्थमध्ययनं न चिरस्थायि भवितुमर्हति। पुनर्यत्राध्ययनस्य न्यूनता स्यात्तत्रोन्नतिः कथं सम्भवेन्नाम?

पंचवर्षीययोजनायां पर्याप्तसंख्यकानाम् पाठशालानामुद्घाटनं सुविनिश्चितम्। तेन तत्र शिक्षितानां भृतिकर्मलाभः सम्पत्स्यते तेषामनुद्योगशीलत्वं च न्यूनं भविष्यति। परन्तु शिक्षितानामद्यत्वे किं स्थानम्? अस्माकं जीवने बहवः कठिनाः प्रसङ्गाः समापतन्ति। तदा वयं मातापितृभ्यां सुहृदा नेतृभिश्च यदा कदा विचारविमर्शं कुर्मः, परं शिक्षकस्य सम्मतिः कदापि गृह्यतेऽस्माभिः? वस्तुतो गुरुः सर्वश्रेष्ठां सम्मतिं दातुं सक्षमो भवति, परमस्माकं जीवने गुरुरिदानीं विनष्टः। गुरुनिष्ठा नैवावशिष्यत। प्राध्यापकाः शिक्षकाश्च सन्त्येव परन्तु न ते गुरवो वर्तन्ते। इत्थं वयमेकं स्नेहस्थानं व्यनाशयाम। मातापित्रोः कर्तव्यं नाधुनावधि सर्वकारायत्तमभूत्तस्मादेव माता-पितरौ स्वास्तित्वेन विद्यमानौ स्तः। अन्यथा बालकस्य जन्मानन्तरं तत्पालनस्य पोषणस्य च सर्वकारकृता कापि श्रेष्ठा योजना वर्तत एव। तत्र बालकाः प्रेष्यन्ते तेषां पालनपोषणे च तत्र भवतः। अनेन प्रीतिगुणस्य विकासो नैव भविष्यति। ईश्वरस्तादृशीं योजनां व्यधत्त यत्प्रत्येकं बालको मातुरुदरादेवोत्पद्यते। अतो जन्मदिवसादारभ्यैव तया तत्प्रेम्णः पानं कार्यते। अस्माद्यावन्मातापितरौ विद्यमानौ भवतः तावन्न केवलं शरीरस्यैवापि तु प्रेमगुणस्यापि विकासो जायमानो भवति। यत्र गुरुशिष्यसम्बन्धो न भविता तत्रादरमात्रस्य विकासो न भावी। आपत्तिरुपस्थाप्यते यत् विद्यार्थिषु शिष्टता नास्ते इति। कस्मान्नास्ते? न तत्र बालकानामपराधो दोषो वापि तु शिक्षणयोजनाया एव दोषः। सर्वेऽपि शिक्षका भृत्यत्वं गताः। तस्मादाचार्याणां पदं हीनतां व्रजत् पतितम्। अधुना पंचविंशतिरूप्यकेभ्यश्चत्वारिंशन्मुद्रामितो वेतनस्तरो वृद्धिं गतो भवेत् परं तेन लोकजीवने तेषां स्तरवृद्धिर्न जाता स्यात्। नाधुना विद्यार्थिनां जीवने बलादरगुणस्य विकासो भवति। यस्यां च विद्याप्राप्तावादरगुण एव नास्ति **सा विद्या निर्वीर्या** भवति।

लेखोऽयं **'दैनिक हिन्दुस्तान'** नाम्नि हिन्दीपत्रे 'सन्त विनोबा के कुछ प्रेरणापूर्ण प्रवचन' इति शीर्षकाधः प्रकाशितः। तदस्माभिः संस्कृतज्ञानां पाठकानां कृते संस्कृतभाषयामनूदितः। लेखक-संपादकप्रकाश-केभ्यो हिन्दुस्तानपत्रस्य सादरम् आभारो निवेद्यते। **लेखकः**।

[विशिष्टोऽयं लेखो 'भारती' पत्रिकायां पूर्वं (वर्ष-८, अङ्कः-४, माघमासः, वि.सं.२०१४) प्रकाशितोऽधुनाऽऽदर्शरूपेण कौस्तुभ-जयन्त्यवसरे पुनः प्रकाश्यते।] – सम्पादकः

नारी-स्तम्भः

# राष्ट्रसेविका समितिः

❑ डॉ. राजेश्वरी भट्टः

'स्त्री राष्ट्रस्याधारशिला वर्तते'- तथ्यमिदं हृदि सन्धार्य नारीणां पूर्वं गौरवं पुनः प्रतिष्ठापयितुं कृतसंकल्पा, नारीणां च योगक्षेमं वहन्ती 'राष्ट्रसेविका समितिः' विश्वे विश्रुता महत्तमा नारीकल्याणसंस्था वर्तते। अस्माकं दौर्भाग्येन कालक्रमेण च नारीपूजकेऽस्माकं राष्ट्रे नारी शनैः शनैः समादरेण, किं बहुना समुचितमानवीय-मूल्यैरपि वञ्चिता जाता। बालविवाह-विधवोत्पीडन-भ्रूणहत्या-अशिक्षा-सम्पत्ति-लिङ्गभेदादिभिरनेकाभिः कुरीतिभिः ग्रस्ता नारी परिवारेषूपेक्षिता प्रायः भोग्यारूपेण जीवनं यापयामास। सम्मान्यायाः नार्या इदं विकृतं स्वरूपं राष्ट्रे शोचनीयमभवत्।

यद्यपि महिलासशक्तीकरणकेन्द्रेषु नारीणां समुन्नयनस्य दिशायां विभिन्नानां योजनानामायोजनानाञ्च क्रियान्वयनमक्रियत। किन्त्वस्मिन् क्रमे विश्वविश्रुता 'राष्ट्रसेविका समितिः' इति महिलासंघटनस्य संस्थापिका 'लक्ष्मी बाई केलकर' विशेषेणोल्लेखनीया वर्तते या नारीणां सुविकासाय राष्ट्रीय-स्वयंसेवक-संघसंस्थापकस्य राष्ट्रम्प्रति समर्पितस्य डॉ. केशव बलिराम हेडगेवार-महाभागस्य सहयोगेन प्रेरणया च २५ अक्तूबर १९३६ तमे वर्षे 'विजयादशमी' महोत्सवे राष्ट्रीय-स्वयंसेवक-संघस्य दर्शनेनानुप्राणिता 'राष्ट्रसेविकासमिती 'ति महिलासंघटनस्य स्थापनां कृतवती।

राष्ट्रं प्रति समर्पिता, नारीश्रेयसे कृतसंकल्पा लक्ष्मीबाई केलकर-महोदया ०६ जुलाई १९०५ तमे वर्षे नागपुरसंज्ञके महानगरे राष्ट्रनिष्ठपरिवारे जनिमलभत। नारीणां सशक्तीकरणं जागरणञ्च तासां जन्मसिद्धाधिकारोऽस्तीति भव्यभावनया भरिता लक्ष्मीबाई बाल्यादेव आत्मबल-स्वावलम्बन-त्याग-दान-देशभक्तिसदृशैः सद्गुणैः सुविभूषिताऽऽसीत्। स्थापनाकालादियं समितिः नारीकल्याणस्य दिशायां सततमारोह-मानाऽस्ति। संक्षेपेण समितेरस्या उद्देश्यं राष्ट्रनिर्माण-आत्मरक्षा-परिवारप्रबन्धन-सार्थकशिक्षा-समाजसेवा-सांस्कृतिकमूल्यानां संरक्षणमस्ति। एतदर्थं राष्ट्रसेविका समितिर्महि-लानां बौद्धिक-सांस्कृतिकविकासाय यथासमयं शाखा-शिविर-पथसंचलन-सैन्यप्रशिक्षणादीनां कार्यक्रमाणां माध्यमेन स्वलक्ष्यं साधयति। स्थापनाकालादेव सुयोग्या समर्था समित्याः प्रमुखं पदं निर्वहन्तीनां सञ्चालिकानां छत्रच्छायायां पुष्पिता पल्लवितेयं समिती राष्ट्रेऽनन्या सञ्जाता। सम्प्रति गणितविषये प्रवीणा परमविदुषी वी.शान्ता कुमारी अखिलभारतीय-स्तरे राष्ट्रसेविकासमित्याः प्रमुखसंचालिकापदं विभूषयति। निखिलेऽपि भारतवर्षे लक्षत्रयादप्यधिका राष्ट्रसेविकाः सेवाकार्ये संलग्नाः सन्ति। ५८४ उपखण्डेषु समित्याः ४३५० शाखाः कार्यरताः सन्ति। तासु महिलाछात्रावासानां संचालनं, बालिकानां कृते निःशुल्कशिक्षा-व्यवस्था, संस्कारकेन्द्राणां संचालनं, स्वयं सहायतासमूहानां संघटनादयः प्रमुखरूपेणोल्लेखनीयाः सन्ति। राष्ट्रीय-स्वयंसेवकसंघस्य भगिनीरूपेण संरक्षितेयं संस्था नूनं नारी-कल्याणकृते कल्पवृक्ष इव

फलदायिनी वर्तते।

## हिन्दीअनुवाद

स्त्री राष्ट्र की आधारशिला है, इस तथ्य को हृदयस्थ कर स्त्रियों के पूर्व गौरव को पुनः प्रतिष्ठित करने के लिए कृतसंकल्प और स्त्रियों के योग-क्षेम को वहन करती हुयी 'राष्ट्र सेविका समिति' विश्व में प्रसिद्ध नारी-कल्याण के लिए महती संस्था है। हमारे दुर्भाग्य से और कालक्रम से हमारे मातृ-पूजक राष्ट्र में नारी शनैः शनैः समादर, अधिक क्या कहें, समुचित मानवीय मूल्यों से भी वञ्चित हो गई हैं। बाल-विवाह, विधवा-उत्पीड़न, भ्रूण-हत्या, अशिक्षा, सम्पत्ति और लिङ्ग-भेद आदि अनेक सामाजिक कुरीतियों से ग्रस्त नारी परिवारों में प्रायः उपेक्षित और भोग्यास्वरूप में जीवन व्यतीत करती थी। सम्माननीय नारी का यह विकृत स्वरूप राष्ट्र में शोचनीय हो गया था।

यद्यपि अनेक महिला-सशक्तीकरण केन्द्रों में नारियों के समुन्नयन की दिशा में अनेक योजनाओं और आयोजनों का क्रियान्वयन किया जाता था। किन्तु इस क्रम में विश्वविश्रुत 'राष्ट्र सेविका समिति' इस महिला-संघटन की संस्थापिका 'लक्ष्मी बाई केलकर' विशेष रूप से उल्लेखनीया है, जिन्होंने नारियों के सुविकास के लिए राष्ट्रीय स्वयंसेवक संघ के संस्थापक 'डॉ. केशवराव बलिराम हेडगेवार' महोदय के सहयोग और प्रेरणा से २५ अक्टूबर १९३६ को विजयादशमी-महोत्सव में राष्ट्रीय स्वयंसेवक संघ के दर्शन से अनुप्राणित 'राष्ट्र सेविका समिति' नामक इस महिला-संघटन की स्थापना की। राष्ट्र के प्रति समर्पित और नारी-कल्याण के लिए कृतसंकल्प लक्ष्मीबाई केलकर ने ६ जुलाई १९०५ को नागपुर महानगर राष्ट्रनिष्ठ परिवार में जन्म लिया।

नारी-सशक्तिकरण और जागरण उनका जन्मसिद्ध अधिकार है - इस भव्य भावना से भरित लक्ष्मीबाई केलकर बाल्यकाल से ही आत्मबल, स्वावलम्बन, त्याग, दान, देशभक्ति जैसे सद्गुणों से सुशोभित थी। स्थापना-काल से ही यह समिति नारी-कल्याण की दिशा में निरन्तर अग्रेसर है।

संक्षेप में इस समिति का उद्देश्य राष्ट्रनिर्माण, आत्मरक्षा, परिवार-प्रबन्धन, सार्थक शिक्षा, समाज-सेवा और संस्कृतिक मूल्यों का संरक्षण है। इसलिए राष्ट्र सेविका समिति महिलाओं के बौद्धिक और सांस्कृतिक विकास के लिए यथासमय शाखा, शिविर, पथ-संचलन, सैन्य प्रशिक्षण आदि कार्यक्रमों के माध्यम से अपने लक्ष्य को साध रही है। स्थापना-काल से ही सुयोग्य और समर्थ समिति के प्रमुख पद का निर्वहन करती हुई संचालिकाओं की छत्र-छाया में पुष्पित और पल्लवित यह समिति राष्ट्र में अनन्या हो गई है। वर्तमान में गणित विषय में प्रवीण परम विदुषी वी. शान्ता कुमारी अखिल भारतीय स्तर पर राष्ट्र सेविका समिति के प्रमुख संचालिका पद को सुशोभित कर रही है। सम्पूर्ण भारतवर्ष में तीन लाख से अधिक राष्ट्र-सेविकायें सेवाकार्यों में संलग्न हैं। ५८४ उपखण्डों में समिति की ४३५० शाखाएँ कार्यरत हैं। उन में महिला-छात्रावासों का संचालन, बालिकाओं के लिए निःशुल्क शिक्षा-व्यवस्था, संस्कार-केन्द्रों का संचालन, स्वयं सहायता समूहों का संघटन आदि प्रमुख रूप से उल्लेखनीय है। राष्ट्रीय स्वयंसेवक संघ की भगिनी रूप में संरक्षित यह संस्था वास्तव में नारी-कल्याण के लिए कल्पवृक्ष के समान फलदायिनी है।

- पूर्व विभागाध्यक्षा (संस्कृतविभागे)
लालबहादुरशास्त्री-कॉलेजः, तिलकनगरम्,
जयपुरम्।

आयुर्वेद-स्तम्भः

# विरुद्धस्वरूपात्मकस्याहारस्य परिहारः

❑ प्रो. बनवारीलालगौडः
राष्ट्रपतिसम्मानितः, पूर्व-कुलपतिः

**आत्महितं चिकीर्षता समाहिताग्निना पुरुषेण सर्वदा बुद्ध्या सम्यगिदं मम हितमिदं ममाहित-मित्यवेक्ष्यावेक्ष्याहारो विहारश्च करणीयः। एवमेव सर्वेषां कर्मणां (प्रवृत्तीनां) सम्यक्प्रतिपादनेन तथाहितकर्मपरित्यागेन हितकर्माचरणेन च स्वदिनचर्या व्यवस्थापनीया।**

अपने कल्याण की इच्छा रखने वाले सात्म्य से व्यवथापित अग्निवाले व्यक्ति के द्वारा सदैव यह मेरे लिए हितकर है, और यह अहितकर है इस बुद्धि से अच्छी प्रकार से देख देख कर उचित आहार और विहार करना चाहिए। इसी प्रकार सभी कर्मों (प्रवृत्तियों) के सम्यक् अनुशीलन से तथा अहितकर कर्मों के सर्वथा त्याग से एवं हितकर कर्मों के आचरण से अपनी दिनचर्या को व्यवस्थित करना चाहिए।

**क्रमेऽस्मिन् प्रज्ञापराधमूलाहितप्रवृत्तिरपि परिहरणीया, हितार्था प्रवृत्तिस्तु हितकारिणी भवति। सामान्यतया चासात्म्येन्द्रियार्थसंयोग-प्रज्ञापराधपरिहाराभ्यामनागताबाधप्रतिषेधरूपा चेष्टोक्ताभवति। उत्पन्नविकारप्रतिषेधोपायास्तु यथोक्तेन चिकित्सासिद्धान्तेन चिकित्सकैरेव सम्पादनीयाः भवन्ति।**

इस क्रम में प्रज्ञापराध से उत्पन्न अहितकर प्रवृत्तियों का भी परिहार करना चाहिये, हित के लिए की जाने वाली प्रवृत्तियाँ तो कल्याणकारिणी होती हैं। सामान्यतया असात्म्येन्द्रियार्थ-संयोग तथा प्रज्ञापराध के परिहार द्वारा ही भावी रोगों की रोकथाम करने वाली चेष्टा कही गई मानी जाती है। उत्पन्न विकारों (रोगों) के निवारण के उपाय तो चिकित्सकों के द्वारा यथोक्त चिकित्सा सिद्धान्तों के अनुसार ही सम्पादन करने योग्य होते हैं।

**तस्मात् शास्त्रेषु प्रतिपादितानां क्रियारूपाणां कर्मणां सम्यगनुष्ठानमारोग्यहेतुः, विशेषेण तु सद्वृत्तानुष्ठानरूपाणि कर्माणि सर्वदा हितकार-काणि भवन्ति। तस्मात् कारणादात्महितं कर्तुमिच्छता, स्मृतिमास्थायावधानेन सद्वृत्तोप-देशमनुष्ठेयम्। सतां वृत्तमनुष्ठानं देहवाङ्मनः प्रवृत्तिरूपं सद्वृत्तमिति कथयन्ति तज्ज्ञाः। सद्वृत्ते तु दिनचर्याक्रमे ऋतुचर्याक्रमे च यदुपयुक्तः सेवनीयानामसेवनीयानाञ्चौषधद्रव्याणामाहार-विहारयोश्च क्रमस्तज्ज्ञैर्निर्दिष्टः सः यथावत्कर-णीयः। क्रमेऽस्मिन् विरुद्धस्वरूपात्मकस्या-हारस्य परिहारो विशेषेण करणीयः।**

इसलिए शास्त्रों में बताए गए क्रियास्वरूपक (करनेयोग्य) कर्मोंका सम्यक् पालनकरना आरोग्य का कारण होता है। विशेष रूप से सद्वृत्त (सदाचार) के पालनस्वरूप कर्म सदा ही हितकारक और कल्याणकारी होते हैं। अतः अपने कल्याण की इच्छा

रखने वाले व्यक्ति के द्वारा स्मृति को स्थित करके (व्यवस्थित करके) सावधानीपूर्वक सद्वृत्तोपदेश (सदाचार-सम्बन्धी निर्देश) का पालन किया जाना चाहिए। विषय के विशेषज्ञ कहते हैं कि सद्वृत्त वही है जो शरीर, वाणी और मन की शुद्ध (श्रेष्ठ, अनिन्द्य) प्रवृत्तियों के रूप में प्रकट होता है। सद्वृत्त के अन्तर्गत दिनचर्या और ऋतुचर्या के क्रम में जिन सेवनीय और असेवनीय औषध-द्रव्यों, आहारों और विहारों का उपयुक्त क्रम (सेवन या त्याग) बताया गया है, वह (क्रम) उसी प्रकार करना चाहिए। इस क्रम में विरुद्धस्वभाव वाले आहार (असंगत या परस्पर विरोधी आहार) का परिहार (त्याग) विशेष रूप से करना चाहिए।

**पथ्यात्मकस्याप्याहारस्य विरुद्धत्वं बहुभिर्हेतुभिः सम्पद्यते। आचार्यश्चरकः सेवनीयानां द्रव्याणामाहारस्य च विरुद्धत्वं कथं भवतीति निर्दिशति, यथा हि-**

**यच्चापि देशकालाग्निमात्रासात्म्यानिलादिभिः।**
**संस्कारतो वीर्यतश्च कोष्ठावस्थाक्रमैरपि।।**
**...इत्यादयः( चरक. सूत्र. 26/ 87 )**

पथ्य (हितकर) माने जाने वाले आहार का भी विरुद्धत्व अनेक कारणों से उत्पन्न हो सकता है। आचार्य चरक सेवनीय द्रव्यों का एवं आहार का विरुद्धत्व कैसे होता है यह बताते हैं, जैसे कि-

देश (स्थान), काल (ऋतु), अग्नि (पाचनशक्ति), मात्रा (परिमाण), सात्म्य (अनुकूलता), अनिल (वातादि दोष), संस्कार , वीर्य (शक्ति), कोष्ठ, अवस्था (वय या शारीरिक दशा), क्रम (क्रमके विरुद्ध) इत्यादि।

**एते सर्वे प्रकाराः पृथक्शः विस्तृतरूपेणोल्लेख-नीयाः सन्ति। एतेषां विस्तृतवर्णनस्यात्रावश्य-कता न वर्तते, अत्र तु केवलस्य संयोग-विरुद्धस्यैव च वर्णनं विधीयते। यतो हि जनाः ज्ञानेनाज्ञानेन वा अस्यैव सेवनं विशेषेण कुर्वन्ति।**

ये सभी प्रकार (विरुद्धता के विविध प्रकार) पृथक् रूप से उल्लेखनीय हैं। इन के विस्तृत वर्णन की यहाँ आवश्यकता नहीं है। यहाँ तो केवल संयोग विरुद्ध (संयोजन से उत्पन्न असंगति) का ही वर्णन किया जा रहा है, क्योंकि लोग जान-बूझकर या अज्ञानवश इस (संयोगविरुद्ध) का ही विशेष रूप से सेवन करते हैं।

**संयोगविरुद्धता-**

**संयोगविरुद्धं तु, यत्र द्वौ वा बहवो द्रव्यप्रकाराः परस्परं गुणविरोधात् संयोगं न सहन्ते। परस्पर-गुणविरुद्धानां द्रव्याणाम् एकत्र प्रयोगो विरुद्धो भवति, यथा- दधिपयसोः, मत्स्यपयसोश्च सहैवोपयोगः। कारवेल्लरस-दुग्धयोः संयोगः। मधु चोष्णमुष्णार्तस्य च मधु मरणाय। मधुसर्पिषी समघृते, मधु वारि चान्तरिक्षं समघृतं, मधु पुष्करबीजं, मधु पीत्वोष्णोदकं ....... इति विरुद्धानि।**

**संयोगविरुद्धता-**

संयोगविरुद्ध वह स्थिति है जिसमें दो या अधिक द्रव्य परस्पर गुणों के विरोध के कारण संयोग को सहन नहीं करते हैं। परस्पर विरोधी गुणों वाले द्रव्यों का एक साथ प्रयोग विरुद्ध हो जाता है। जैसे-

दधि और दूध का एक साथ उपयोग, मत्स्य (मछली) और दूध का एक साथ उपयोग, कारवेल्ल (करेले) के रस और दूध का संयोग (ये सभी विरुद्ध संयोग हैं)। और उष्ण मधु या उष्ण से पीड़ित व्यक्ति के मधु (शहद) का सेवन मरण के लिये है, मधु और सर्पिष् (घृत) का समान मात्रा में मिश्रण, मधु और अन्तरिक्ष जल का समान मात्रा में मिश्रण, मधु के साथ पुष्करबीज का सेवन और मधु पीकर उसके ऊपर गर्म जल पीना – ये सभी संयोग विरुद्ध माने गए हैं।

**संयोगविरुद्धस्य परिहारः-**

**विरुद्धसंयोगे सत्यपि कदाचिदाहारः विरुद्धतां न यातीत्यपवादोऽप्यत्र सङ्केतमात्रेण निर्दिश्यते। यथा हि-**

**1. दुग्धं दधि च परस्परसंयोगविरुद्धे इति शास्त्रेषु प्रसिद्धम्, तथाप्यन्यैर्द्रव्यैः सह प्रयुक्ते संयुक्तेऽपि ते द्वे दधिदुग्धे हानिरहिते भवतः, यथा-भावमिश्रेण भावप्रकाशनिघण्टौ कृतान्नवर्गे 'पश्चात् परिवेष्याणि' इति वर्णनप्रसङ्गे व्यञ्जननिर्माणक्रमे रसालानामकस्य व्यञ्जनस्य निर्माणं विशिष्टेन संस्कारेणान्यद्रव्यसंयोगेन च कृतम्। तत्र तु दधिदुग्धसंयोगे सत्यपि विरुद्धता न सम्पद्यते।**

**संयोगविरुद्ध का परिहार ( अपवाद ):**

विरुद्ध-द्रव्यों का संयोग होने पर भी कभी-कभी आहार विरुद्धता को प्राप्त नहीं करता है, यह अपवाद भी यहाँ पर सङ्केतमात्र से निर्दिष्ट किया जा रहा है। जैसे कि-1. दूध और दही का परस्पर संयोग शास्त्रों में संयोग विरुद्ध के रूप में प्रसिद्ध है, तथापि अन्य द्रव्यों के साथ संयुक्त भी ये दोनों दही और दूध हानि रहित होते हैं, जैसे कि भावप्रकाश निघण्टु के 'कृतान्नवर्ग' में 'पश्चात् परिवेष्याणि' के वर्णनप्रसङ्ग में व्यञ्जन के निर्माण के क्रम में रसाला-नामक व्यञ्जन का निर्माण विशिष्ट संस्कार और अन्य द्रव्यों के संयोग से किया गया है। वहाँ तो दही और दूध का संयोग होने पर भी विरुद्धता नहीं होती है।

**2. संयोगविरुद्धक्रमे चक्रपाणिः कथयति यत्-**

**तथाऽम्लेत्यादौ अम्लग्रहणेन लब्धानाप्यम्लाम्रातकादीनामभिधानं विशेषविरोधसूचनार्थम्। सर्वग्रहणेनैव द्रवाद्रवाम्ले प्राप्ते पुनर्द्रवाद्रववचनं 'सर्व' शब्दस्य द्रवाद्रवाम्लकार्त्स्न्यार्थता-प्रतिषेधार्थम्। पयसेति तृतीययैव सहार्थे लब्धे पुनः सहेत्यभिधानं केवलाम्लादियुक्तस्यैव विरोधितोपदर्शनार्थं; तेन, अम्लपयःसंयोगे गुडादिसंयोगे सति विरुद्धत्वं न दुग्धाम्रादीनाम्।**

संयोगविरुद्ध के संदर्भ में चक्रपाणि कहते हैं कि-

अम्ल इत्यादि में अम्ल के ग्रहण से आम्र (आम), आम्रातक (आमडा) आदि का ग्रहण हो जाने पर भी उनका नामतः उल्लेख करना विशेष विरोध की सूचना के लिये है। यहाँ 'सर्व' शब्द के प्रयोग से द्रवस्वरूपक अम्ल एवं अद्रवस्वरूपक अम्ल का ग्रहण हो जाने पर भी पुनः 'द्रव' और 'अद्रव' शब्दों का उल्लेख 'सर्व' शब्द के सभी द्रव और अद्रव अम्लद्रव्यों के व्यापक (कार्त्स्न्य) स्वरूप के निषेध के लिये है (अर्थात् इस से सभी द्रव और अद्रव

अम्लद्रव्यों का व्यापक रूप में ग्रहण न करके आचार्य चरक ने जिन संयोगविरुद्ध द्रव्यों का उल्लेख किया है उन्हीं का ग्रहण किया जाना चाहिये।) 'पयसा' इस वाक्य में तृतीया होने के कारण 'सह' का प्रयोग गृहीत हो जाता है, फिर भी 'सह' शब्द का पुनः प्रयोग करने का उद्देश्य यह बताना है कि केवल अम्लादि द्रव्योंके साथ हीं इसका विरोध है। इससे यह निष्कर्ष निकलता है कि अम्लपदार्थों एवं दूध के संयोग में गुड़ आदि अन्य द्रव्यों का संयोग होने पर दुग्ध और आम्र इत्यादि का संयोगविरुद्धत्व नहीं होता।

**एषः संयोगः 'आम्ररस-'नामके विशिष्टे व्यञ्जने भवति, 'पञ्चामृतनामके' विशिष्टे कल्पेऽपि विरुद्धद्रव्यसंयोगस्यान्यद्रव्यसंयोगेन निराकरणं भवति, अत एव तत्र विरुद्धात्मकता न भवति।**

यह संयोग (दूध और अम्लरस आदि का मिश्रण) 'आम्ररस' (अमरस) नामक विशेष व्यञ्जन में होता है। 'पञ्चामृत' नामक विशेष कल्प (संयोगात्मकनिर्माण) में भी विरुद्ध-द्रव्यों का संयोग अन्य द्रव्यों के संयोजन से निष्प्रभावी हो जाता है। अतः इन दोनों ही परिस्थितियों में विरुद्धात्मकता नहीं होती।

**2. संस्कारयुक्ते संयोगेऽविरुद्धत्वम्-**

**संयोगविरुद्धं यथा- 'तदेव निकुचं पक्वं न माष' इत्यादिनोक्तं; यत् संस्कारादिविरुद्धगुणकथनं विना साहित्यमात्रेण विरुद्धमुच्यते, तत् संयोगविरुद्धम्। मत्स्यपयसोस्तु यद्यपि सहोपयोगो विरुद्धत्वेनोक्तः, तथाऽप्यसौ गुण-विरुद्धत्वेन कथित इति गुणविरोधकस्यैवो-दाहरणम्। विरोधश्च विरुद्धगुणत्वे सत्यपि क्वचिदेव द्रव्यप्रभावाद्भवति; तेन षड्रसाहारोप-योगे मधुराम्लयोर्विरुद्धशीतोष्णवीर्ययोर्विरोधो नोद्भावनीयः।**

**संस्कारयुक्त संयोग में अविरुद्धत्व -**

संयोगविरुद्ध का उदाहरण 'तदेव निकुचं पक्वं न माषः' आदि वचनों से बताया गया है। जो संस्कारादि विरुद्धगुणकथन है वह तो संयोग के बिना ही विरुद्ध कहा जाता है (वह तो संस्कार के कारण विरुद्ध है)। मछली (मत्स्य) और दूध का एक साथ सेवन शास्त्र में विरुद्ध कहा गया है, परन्तु यह वास्तव मे गुणविरुद्धता के आधार पर है, अतः यह गुणविरोधक (गुणों के परस्पर विरोध से उत्पन्न) का उदाहरण है। और विरोध भी विरुद्धगुणता होने पर भी कभी-कभी द्रव्य के विशिष्ट प्रभाव के कारण होता है। इसीलिए जब षड्रसयुक्त आहार (छः रसों वाले भोजन) का सेवन किया जाता है, तब मधुर और अम्ल रस वाले पदार्थों के तथा शीत और उष्णवीर्य के परस्पर विरोध के होने पर भी विरुद्ध नहीं मानना चाहिये।

**एतादृग्विधो ह्येषः विरुद्धः द्रव्यान्तरसंयोगेन परिहरणीयः, यथा-**

**- मूलकस्य दुग्धेन सह संयोगः विरुद्धो भवतीति कथयत्याचार्यश्चरकः (च.सू. 26/84), तत्रैव चाचार्येण क्षीराम्लयोः सह प्रयोगेऽपि विरुद्धत्वं निर्दिष्टम्, किन्तु तेनैव च मूलकाद्यतैलनिर्माणक्रमे मूलकस्वरसस्य दुग्धस्य च निक्षेपः तथा दध्नोऽम्लद्रव्याणां**

**काञ्जिकस्यापि च निक्षेपः सहैव कृतः। तैलस्यास्य वातव्याधौ पानमपि निर्दिष्टम्। यथा-**

**मूलकस्वरसं क्षीरं तैलं दध्यम्लकाञ्जिकम्।**
**तुल्यं विपाचयेत् कल्कैर्बलाचित्रकसैन्धवैः.......**
**तत्सिद्धं पीतमत्युग्रान् हन्ति वातात्मकान् गदान्॥**

**इति मूलकाद्यं तैलम्॥( च.चि. 28/167-169 )**

इस प्रकार का यह विरुद्ध अन्य द्रव्यों के उचित संयोग द्वारा निष्प्रभावी (निराकृत) किया जा सकता है। उदाहरणार्थ –

आचार्य चरक ने कहा है कि मूली (मूलक)का दूध (क्षीर) के साथ संयोगविरुद्ध होता है (च.सू.26/84)। उसी स्थान पर आचार्य ने दूध और अम्ल पदार्थों के सह-प्रयोग को भी विरुद्ध बताया है। किन्तु, इन्हीं दोनों द्रव्यों – मूलक और दूध – का प्रयोग आचार्य चरक ने मूलकाद्य तैलके निर्माण में किया है, जहाँ मूलकस्वरस (मूली का रस), दूध, दही, अम्ल द्रव्य (खट्टे पदार्थ) तथा काञ्जिक इन सबका संयुक्त प्रयोग किया गया है। इस तैल का वातविकारों के उपचार में पान (पीने) के लिए भी निर्देश है। यथा-

मूली का रस, दूध, तैल, दही, अम्ल और काञ्जिक – इन सबको समान मात्रा में लेकर बला, चित्रक और सैंधव के कल्क के साथ पकाया जाए। यह सिद्ध तैल पीने पर अत्यन्त प्रबल वातजन्य रोगों का नाश करता है।

**अत एवात्र स्पष्टं भवति यद् यद्यपि मूलकदुग्धयोः संयोगः सामान्यतःविरुद्धो भवति तर्ह्यपि यदा ह्येषः विशिष्टसंस्कारेणान्यद्रव्याणाञ्च संयोगेन संसाधितो भवति तदा सः विरुद्धतां न यात्यपित्वौषधरूपेणोपयोगी भवति।**

अतः यहाँ यह स्पष्ट होता है कि यद्यपि मूली और दूध का संयोग सामान्यतः विरुद्ध माना गया है, परंतु जब यह विशिष्ट संस्कार और अन्य द्रव्यों के संयोग से संसाधित किया जाता है, तब वह विरुद्धता को प्राप्त नहीं होता, अपितु औषध के रूप में उपयोगी हो जाता है।

**अत्र विशेषसंस्कारवशाद्द्रव्यान्तरसंयोगाच्च विरुद्धत्वं न दृश्यते। घृतमध्वोः तुल्यमानसंयोगः सामान्यतः विरुद्धः; किन्तु द्रव्यान्तरयोगेन 'अगस्त्यहरीतकीलेहे' सःतुल्यमानसंयोगोऽपि विरुद्धत्वं नावहति। यतो हि तत्र द्रव्यान्तर-संयोगात् संस्कारविशेषाच्च तस्य विरुद्धत्व-मपास्तम्।**

यहाँ विशेष संस्कार (प्रक्रिया) और अन्य द्रव्यों के संयोजन के कारण वह संयोग (जो सामान्यतः विरुद्ध माना जाता है) विरुद्धता को प्राप्त नहीं होता। घृत और मधु का समान मात्रा में संयोग सामान्यतः विरुद्ध माना गया है, किन्तु जब यही दोनों द्रव्य अन्य औषध- द्रव्यों के साथ मिलकर 'अगस्त्यहरीतकीलेह' में प्रयुक्त किए जाते हैं, तब यह समान मात्रा वाला संयोग भी विरुद्ध नहीं रहता। क्योंकि वहाँ अन्य द्रव्यों के संयोग और विशिष्ट संस्कार के कारण उस संयोग की विरुद्धता नष्ट हो जाती है।

**यद्यपि दुग्धं दधि च परस्परविरुद्धे इति शास्त्रेषु**

**प्रसिद्धम्, तथापि विरुद्धद्रव्येऽपि यदा सम्यक् प्रकारेण संस्कारः क्रियते अथवा द्रव्यान्तर-संयोगः विधीयते, तदा तद्विरुद्धत्वमपास्तं भवति। यथा-**

**पञ्चामृतयोगे दुग्धं, दधि, घृतं, मधु, शर्करा इत्येतानि पञ्च द्रव्याणि यथासंस्कृतं संयोगेन प्रयुक्तानि, तत्र दुग्ध-दधी विरुद्धे घृत-मध्वोरपि परस्परविरोधित्वं शास्त्रेषु प्रसिद्धम्। तथापीत्ये-तेषामेकत्र संयोगः शर्करायाश्च पञ्चमद्रव्यत्वेन निक्षेपः समेतां पञ्चद्रव्याणामालोडनात्मकश्च सम्यक्संस्कारः सर्वेषां विरोधितामपनयति।**

यद्यपि शास्त्रों में यह प्रसिद्ध है कि दूध और दही परस्पर विरुद्ध हैं, तथापि जब विरुद्ध माने जाने वाले द्रव्य का सम्यक् संस्कार किया जाए या अन्य द्रव्यों के साथ उचित संयोग किया जाए, तब उसकी विरुद्धता समाप्त हो जाती है। यथा-

पञ्चामृत योग में दूध, दही, घृत, मधु, और शर्करा – ये पांच द्रव्य, उचित संस्कार और संयोजन के साथ प्रयोग किए जाते हैं। इनमें दूध-दही विरुद्ध हैं और घृत-मधु का परस्पर विरोध भी शास्त्रों में प्रसिद्ध है। तथापि, इन (चारों) द्रव्यों का एक साथ संयोग और शर्करा के पञ्चम द्रव्य के रूप में डाला जाना तथा सभी पाँचों द्रव्यों का आलोडनात्मक सम्यक् संस्कार सभी द्रव्यों की विरुद्धता को दूर करता है।

**व्याख्याकारोऽरुणदत्तोऽपि लिखति–**

**विरुद्धमम्लं पयसा सह सर्वं फलं तथा' ( अ.हृ.सू. 7/31 )- इत्यत्र सहग्रहणं तु नियमार्थम्। सहैकध्यमम्लेनोपयुज्यमानं विरुद्धम्। यदा त्वम्लेन गोरसादिना क्षीरशाकसञ्ज्ञकव्यञ्जन-करणार्थं पयः संस्क्रियते तदा तस्य द्रव्यान्तरत्वा-पत्तेर्विरोधो नास्ति।**

व्याख्याकार अरुणदत्त भी लिखते हैं –

दूध के साथ अम्ल (द्रव्य) तथा सभी फल विरुद्ध हैं। यहाँ सहग्रहण (साथ में सेवन) केवल नियम के लिये है। सह अर्थात् अम्ल के साथ सेवन किया जाता हुआ विरुद्ध है।

जब अम्ल गोरसादि (दूध-दही आदि) से क्षीरशाक नामक व्यञ्जन निर्माण के उद्देश्य से दूध का संस्कार किया जाता है, तब उसके द्रव्यान्तर की प्राप्ति (अन्य द्रव्य के रूप में परिवर्तन) के कारण कोई विरोध या विरुद्धता उत्पन्न नहीं होती।

**एवमेव दधिक्षीरादिना घृतं पच्यते तत्राऽप्यविरोध एव, द्रव्यान्तरत्वात्। पूर्वस्याऽपि सहशब्दस्यैवं प्रायमेव प्रयोजनमभ्यूह्यमिति। अपि च, क्षीरे भुक्ते उत्तरकालमप्यम्लं न भोज्यमिति प्रतिपादनार्थं च सहग्रहणम्। तथा चोक्तमष्टाङ्गसङ्ग्रहे यत् 'सर्वं चाम्लं पयसा सहैकध्यं तदुत्तरं वा विरुद्धम्' इति।**

इसी प्रकार, जब दही और दूध आदि के साथ घृत पकाया जाता है, तब भी अन्य द्रव्य (घृत) के संयोग के कारण विरोध उत्पन्न नहीं होता। पूर्व में प्रयुक्त सहशब्द का प्रयोग भी 'प्रायः'प्रयोजन के लिये है, यह अध्याहार या अनुमान करना चाहिये अर्थात् इनका संयोग सर्वत्र विरुद्ध हो यह आवश्यक नहीं है । केवल एक साथ सेवन ही नियमसिद्ध विरुद्धता का

कारण है। इसके अतिरिक्त यह भी है कि दूध को खाने के बाद भी अम्लपदार्थ का सेवन नहीं करना चाहिए यह बताने के लिए ही सह शब्द का ग्रहण किया गया है। अष्टाङ्गसङ्ग्रह में भी कहा गया है कि दूध के साथ एकत्र रूप में (साथ में) या दूध के बाद में प्रयुक्त किए गये सभी अम्ल द्रव्य विरुद्ध होते हैं।

**आयुर्वेदाचार्यैर्निर्दिष्टं यत् पयसा सह सर्वं फलं न सेवयेत्- इत्यत्र फलमित्यनेन 'आम्राम्रातकादीनां' चरकोक्तानां फलानां पयसा सह प्रयोगो निषिध्यते। सर्वशब्दः सर्वत्र न सम्बन्धनीयः, यतो न सर्वं फलं पयसा सहाभ्यवहर्तुं विरुद्धम्। अपि तु किञ्चिदेव। क्षीरशाकस्तु विशिष्टविधिना विनिर्मितं सेवनीयं व्यञ्जनं पृथक् लेखे विवेचनीयम्।**

आयुर्वेदाचार्यों के द्वारा कहा गया है कि दूध के साथ सभी फल सेवन नहीं किए जाने चाहिए, यहाँ फल यह कह देने से 'आम्राम्रातकादि' चरकोक्त द्रव्यों का दूध के साथ प्रयोग निषिद्ध किया जाता है। सर्वशब्द सर्वत्र सम्बद्ध करने योग्य नहीं है क्योंकि सभी फल दूध के साथ खाना विरुद्ध नहीं है अपितु कुछ फल ही विरुद्ध है। क्षीरशाक तो विशिष्टविधि से विनिर्मित सेवन करने योग्य व्यञ्जन है यह पृथक् लेख में विवेचन करने योग्य है।

**एवं दृश्यते यत्संस्कारविशेषमाध्यमेन द्रव्यान्तर-संयोगेन च विरुद्धस्वरूपस्य परिहारोऽपि क्रियते कदाचिन्न तु सर्वदा। यदा द्वे विशिष्टे द्रव्ये परस्परं केवलं संयुक्ते भवतस्तदा संयोगविरुद्धत्वं भवति। तत्र यदि द्रव्यान्तरयोग उपयुक्तसंस्कारो वा क्रियते, तदा विरुद्धत्वस्य परिहारो भवति। अतोऽत्र चक्रपाणिना, अरुणदत्तेन, अन्यैश्च व्याख्याकारैः प्रतिपादितं यत् संयोगविरुद्धत्वं कदाचित् परिहारयोग्यमपि भवति।**

इससे यह स्पष्ट होता है कि विशेष संस्कार और अन्य द्रव्यों के संयोजन के माध्यम से भी विरुद्ध स्वरूप का परिहार भी कभी-कभी किया जाता है किन्तु यह सर्वदा नहीं होता। यदि केवल दो विशिष्ट द्रव्य परस्पर संयुक्त होते हैं, तो वह संयोगविरुद्ध माना जाता है। किन्तु यदि उसी संयोग में अन्य द्रव्यों का संयोजन या उचित संस्कार किया जाए, तो उस संयोग की विरुद्धता का परिहार हो जाता है। अतः चक्रपाणि, अरुणदत्त और अन्य व्याख्याकारों द्वारा यह प्रतिपादित किया गया है कि संयोगविरुद्धत्व कभी-कभी परिहारयोग्य भी होता है।

बरषत हरषत लोग सब, करषत लखै न कोइ ।
तुलसी प्रजा सुभाग ते, भूप भानु सो होइ ॥

# इस साल की दीपावली हर घर खुशहाली



श्री भजनलाल शर्मा
माननीय मुख्यमंत्री

श्री नरेन्द्र मोदी
माननीय प्रधानमंत्री

रोटी, कपड़ा, मकान, स्वास्थ्य सेवाएं एवं वाहन समेत

## अनेक वस्तुएं हुई सस्ती

### दैनिक उपयोग की वस्तुएं

| वस्तु | पहले | अब |
|---|---|---|
| हेयर ऑयल, शैम्पू, साबुन, टूथपेस्ट | 18 % | 5 % |
| मक्खन, घी, पनीर, नमकीन, भुजिया | 12 % | 5 % |
| बर्तन | 12 % | 5% |
| बच्चों की बोतलें व डायपर | 12 % | 5% |
| सिलाई मशीन | 12 % | 5% |

### शिक्षा

| वस्तु | पहले | अब |
|---|---|---|
| पेंसिल, शार्पनर, चॉक | 12 % | Nil |
| मैप्स, चार्ट्स | 12 % | Nil |
| कॉपी व नोटबुक | 12 % | Nil |
| रबर (Eraser) | 5% | Nil |
| क्रेयॉन | 12 % | Nil |

### हेल्थकेयर

| वस्तु | पहले | अब |
|---|---|---|
| जीवन व स्वास्थ्य इंश्योरेंस | 18 % | Nil |
| 33 जीवन रक्षक दवाएं | 12 % | Nil |
| आयुर्वेदिक दवाएं | 12 % | 5% |
| थर्मामीटर | 18 % | 5% |
| मेडिकल ऑक्सीजन | 12 % | 5% |
| डायग्नोस्टिक किट, ग्लूकोमीटर व स्ट्रिप्स | 12 % | 5% |

### किसान एवं कृषि क्षेत्र

| वस्तु | पहले | अब |
|---|---|---|
| ट्रैक्टर टायर | 18 % | 5 % |
| ट्रैक्टर | 12 % | 5 % |
| बायो-पेस्टिसाइड्स | 12 % | 5% |
| ड्रिप इरिगेशन, कृषि मशीनें | 12 % | 5% |

### वस्त्र, कपड़ा एवं जूते

| वस्तु | पहले | अब |
|---|---|---|
| सिंथेटिक, धागा | 18% / 12% | 5 % |
| सिंथेटिक फाइबर और धागा | 18% / 12% | 5 % |
| कालीन, मैट्स, टेक्सटाइल, बैग, कढ़ाई | 12 % | 5 % |
| ₹2500 तक के जूते | 12 % | 5 % |

### इलेक्ट्रॉनिक्स

| वस्तु | पहले | अब |
|---|---|---|
| एसी | 28% | 18% |
| टीवी (32 इंच से ऊपर) | 28% | 18% |
| मॉनिटर व प्रोजेक्टर | 28% | 18% |
| डिश वॉशिंग मशीन | 28% | 18% |

### पर्यटन, ऊर्जा एवं उद्योग

| वस्तु | पहले | अब |
|---|---|---|
| होटल ठहराव (₹7500 प्रतिदिन तक) | 12 % | 5 % |
| सौर ऊर्जा, पवन ऊर्जा उपकरण | 12 % | 5 % |
| सीमेंट | 28 % | 18% |

### हैण्डीक्राफ्ट एवं कला

| वस्तु | पहले | अब |
|---|---|---|
| लकड़ी, पत्थर, धातु की मूर्तियां | 12 % | 5 % |
| हस्तनिर्मित कागज | 12 % | 5 % |
| चित्रकारी, पेंटिंग | 12 % | 5 % |

### ऑटोमोबाइल

| वस्तु | पहले | अब |
|---|---|---|
| हाइब्रिड कार, छोटी पेट्रोल/डीजल कार | 28% | 18% |
| 2 व्हीलर मोटरसाइकिल (350CC तक) | 28% | 18% |
| मालवाहक वाहन | 28% | 18% |

## 22 - 29 सितम्बर, 2025

## जीएसटी बचत उत्सव

**घटी जीएसटी मिला उपहार - धन्यवाद मोदी सरकार**

सूचना एवं जनसंपर्क विभाग, राजस्थान

प्रेषण-प्रत्येक माह की ५ तारीख आर.एम.एस. ( पी.एस.ओ. ) जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८-५७

डाक पंजीयन
Jaipur City/405/2024-26




*With best compliments from :*

Regd. Office & Works : HAMIRGARH
Distt. BHILWARA-311025 (Raj.)
Tel. : 01482-286102, 03, 05 & 06
E-mail : bhilwara@kanoria.org
Website : www.ainfrastructure.com
CIN : L25191RJ1980PLC002077
GST No.: 08AABCA7493D1ZO

**Kanoria Energy**
**& Infrastructure Limited**

(Formerly Known as A Infrastructure Limited)

**MANUFACTURER OF MAZZA AC PIPES KIRTI BRAND**

411, IIIrd Floor, Shalimar Complex, Church Road, JAIPUR-302001 (Raj.)
Ph. : 0141-4019691, 2370566 • E-mail : jaipur@kanoria.org

स्वत्वाधिकारी-भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम् अध्यक्षः प्रोफेसर बनवारीलालगौडः, प्रकाशको मुद्रकश्च राम स्वरूप अग्रवाल द्वारा न्यू जय शिवा प्रिन्टर्स, गोपालबाड़ी, जयपुरम् दूरभाषः २३६५७२१ पत्रसंकेतः- भारतीभवनम्, बी-15, न्यू कॉलोनी, जयपुरम्-३०२००१ • दूरभाषः ०१४१-२३७१०१४

प्रतिष्ठायाम्,